This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2305 विषय पुराण

नाव षोडशावर्णविधम्

लेखक / लिपीकार व्यंकटेश (लिपीकृ)

पृठ 129 काळ ______ पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2305

त्वे ॥ श्रवणाद्यसंभवेन तत्पूर्वकज्ञानाभावेन पुरुषार्थासंभवात् ॥ परावृत्तस्य श्रव
णादौ संयोजनं ॥ न केवलं सर्वक्रियात्यागेन वर्त्तनं ॥ तथात्वे ॥ अलसादीनाम
पि तत्क्रियात्वस्य पुरुषार्थहेतुत्वप्रसंगात् ॥ उपरतिर्नाम विहितानां कर्मणां
विधिना परित्यागः ॥ अयमेव संन्यास इत्युच्यते ॥ अर्थांतरं च विहितानि क
र्माणि कर्तृत्वाद्यभिमानरहितः सन् फलमनपेक्ष्य करोति सापि उपरतिरित्यु
च्यते ॥ नान्यादृशात् सुषुप्त्यादिरप्यधिकारहेतुत्वप्रसंगात् ॥ तितिक्षा नाम शी ना० ५
दैववैराग्य तोष्णादिद्वंद्वसहिष्णुता ॥ तत्रापि द्वंद्वेषु प्राप्तेषु सहनमेव तितिक्षा ॥ न तु स्कृ
रतया तापादिसहिष्णुत्वं ॥ तथात्वे ॥ कर्षकादीनामपि तत्साधनवत्त्वेन अधि
कारित्वप्रसंगात् ॥ मनः परावृत्तस्य श्रवणादिष्ववस्थापनं ॥ दमो नाम ज्ञानेंद्रि
याणां कर्मेंद्रियाणां श्रवणादिव्यतिरिक्तविषयेभ्यः ॥ समाधानं नाम परावृ
११रावृत्तस्य श्रवणानुकूलव्यापारेषु स्थापनं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मीनृसिंह
मननग्रंथ
॥८॥

स्वापन्नं

तं मनोवासनावशात् ॥ विषयेषु यथा न भवति तथा श्रवणादिव्यतिरिक्तविषयेभ्यः वर्णकर
परावृत्तस्य श्रवणादिष्वेवं नान्यदन्योन्यकलहादिशांतिकरं कर्म तस्याधिकारि
ण्यनुपयोगात् [illegible] ॥ श्रद्धानाम पूर्वकर्मसु एषु विश्वासः तादृशविश्वा
सः गुरुवेदांतवाक्येश्वरेषु निपुणतयास्थापितश्चेत् न कर्मादिषु । तद्विश्वा
सस्यैव तद्विरोधितया ज्ञानहेतुत्वाभावात् श्रद्धा ॥ मुमुक्षुत्वं नाम मोक्षेच्छा ॥
समस्तप्राणिषु मोक्षोऽस्माकं भवत्विति या इच्छा सा सैव ॥ किं तर्हि गृहे दह्यमाने
तद्गृहे विद्यमानपुत्रकलत्रादयः किं बभूवुरिति विचार्य तानुद्धरिष्यामी
ति तद्गृहप्रविष्टपुरुषः ॥ अग्निना तप्यमानः तान् पुत्रादीन् विहाय परावृ सन्नूर
त्तः शीतलजलं अनुप्रविशति ॥ तद्वत् संसारे तापत्रयाग्निसंतप्तः सन् तला
दृशतापदूरीकरणासमर्थान् सद्गुरून् यत्र कुत्रचित् स्थितानपि परि

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोध्यूलत्साधनानिकान्यपेक्षितानीतिसंपाद्य सन् तिष्ठति॥तस्येषणायाए
वमोक्षेच्छेतिनाम॥ए तत्साधनचतुष्टयं श्रवणात्पूर्वं संपाद्य श्रवणाभ्यासः क
र्तव्यो नो चेत् ज्ञानानुत्पत्तिः॥गुरवोपि अनधिकारिणां नोपदिशेयुः॥कथमित्यु
क्ते शूद्रस्ययागेकारितेतस्य शूद्रस्य स्वर्गफलं यथा न सिध्यति॥शूद्रस्य
उपनयने क्रियमाणेपि यथा ब्राह्मण्यं न सिध्यति॥तद्वदेवसाधनचतुष्ट
यसंपत्त्यभावे श्रवणे क्रियमाणेपि ज्ञानफलं न सिध्यति॥तर्हि श्रवणादीनि
व्यर्थानीतिशंकानकार्या॥तस्मात् श्रवणात् कस्यचिद् दृष्टस्योत्पत्तिः॥ए
तादृशं साधनचतुष्टयं श्रवणात्पूर्वं नास्ति चेदपि श्रवणसमकाले हरी
दृश्यतां॥किमर्थमित्युक्ते केवलं नित्यानित्यवस्तुविवेकेन नालं॥लोके
शास्त्रज्ञाः। सर्वेपि नित्यानित्यवस्तुविवेकवंत एव॥ते विषयासक्ताः संतः
एव गुरुमुखेन विचारा ज्ञेयं

श्रवणादिसाधनानि: विवेकचतुष्टयं

४ तर्हि प्रपंचे चेतनं किं अचेतनं किं मित्युक्ते वर्णीकरे

त्मा नात्मा च मिलित्वा प्रपंच इत्युच्यते ॥ तत्र आत्मा प्रपंचातीत एव तादृशस्य
प्रपंचातीतस्यात्मनः प्रपंचांतःपातित्वं कथं व[क्तुं] शक्यत इति चेत्तत्र श
क्यत एव ॥ कथं ॥ चेतनाचेतनात्मक एव प्रपंचः किल प्रतीयते ॥ तस्मात्
प्रपंचातीतमात्मानं प्रपंचांतःपातित्वेन वर्णयंति ॥ प्रपंचस्य चेतनाचेत
नात्मकतया प्रतीतावेव प्रपंचातीतमात्मानं प्रपंचांतःपातित्वेन वक्तुं शक्य
त इति पृष्टे शक्यत एवेति वक्तव्यं ॥ कथमित्युक्ते आत्मा तावत् चेतनः ॥
चेतनस्वरूप आत्मा प्रपंचेन यदा न मिलति तदा प्रपंचः चेतनाचेतनात्म
कतया न प्रतीयते ॥ तस्मात्प्रपंचातीतमात्मानं प्रपंचांतःपातित्वेन वर्णितं तर्हि ८ जीवजातं ८
प्रपंचे चेतनं किं अचेतनं किमित्युक्ते ॥ यैः तु गच्छति यत्तु ऊर्ध्वं गच्छति शृणो
ति जिघ्रति येन ज्ञानेन तत् ज्ञानं चेतनं ॥ पृथिवीजलपर्वतवृक्षादयः अ

९ रचाउचा रचाउच विजानाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आतं

चेतनं ॥ ननु प्रपंचः अनेकैः पदार्थैः मिलित्वा प्रतीयते ॥ तत्कथमुच्यते पदार्थ
द्वयमिति ॥ वक्तुं शक्यत एव ॥ कथं ॥ प्रपंचः आत्मेति अनात्मेति च पदार्थ
द्वयं ॥ अनात्मपदार्थः एक एव कार्यरूपेण परिणामी भूत्वा अनेकपदार्थ
त्वेन विपरिणतः ॥ तैः अनेकपदार्थैः मिलितः आत्मा च अनेक वत् प्रतीय
ते ॥ तादृश आत्मा कतिप्रकारैर्भासत इत्युक्ते जीव इति ईश्वर इति च
द्विधाभासते ॥ तर्हि जीवेश्वरावपि कतिविधौ भासेते इत्युक्ते जीवः अने
कधाभासते ईश्वरोप्यनेकधा भासते ॥ तर्हि जीवः अनेकधाभासतु ॥ ई
श्वरस्तु एक एव कथमनेकधाभासत इति पृष्टे भासत एव ॥ कथं ॥ पुण्य
क्षेत्रादिपट्टणादौ च ग्रामादौ गृहादौ च ईश्वरः अनेकधाभासते ॥ तत्र
तत्र प्रतीयमानाश्च शिलादारुताम्रप्रतिमादि किल प्रतीयते ॥ ईश्वर ए

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वपृथक्त्वभासत इति कथं वक्तुं शक्यत इत्युक्ते वक्तुं शक्यत एव ॥ कथं ॥
म्न शिलादारुताम्रप्रतिमादिषु सर्वेषां ईश्वरत्वबुद्धिरेव ॥ प्रतिमादि
बुद्धिः कथमपि नास्ति ॥ तेषु प्रतिमादिबुद्धिरेव अस्ति ईश्वरत्वबुद्धिर्वं
नास्ति चेत् पूजाभिषेकार्थं लक्षावधि द्रव्यव्ययः किमर्थं क्रियते लो
कैः ॥ तस्मादीश्वरत्वबुद्धिरस्ति ॥ तर्हि अनात्मस्वरूपेषु प्रतिमादिषु
ईश्वरत्वबुद्धिः कथं वक्तुं शक्यत इति पृष्टे वक्तुं शक्यत एव ॥ कथं ॥
सर्वात्मना हेयभूताः ॥ देहेंद्रियादयः ॥ तेषु अहमिति आत्मबुद्धेः पुरु
षस्येव ॥ तादृशताम्रप्रतिमादिषु ईश्वरत्वबुद्धिर्वक्तुं शक्यत एव ॥
ननु देहेंद्रियादयः हेया इति कथं वक्तुं शक्यत इति चेत् शक्यत
एव ॥ कथं स्थूलकृशो पिताभ्यां च उत्पन्नमिति हेतोः ॥ मलमूत्राभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्मितमितिहेनोश्रस्त्रक्चंदनादिभिःताद्दशाशरीरादीनांसुगंधित्वंसंपाद
नीयमितिचेत्शरीरादीनामेवस्पर्शवशात्स्रक्चंदनादयःहेयाःदुर्गंधाभ
वंति॥शरीरंमृतंचेदपिस्थितस्यपुरुषस्य अर्थच्छेदादिक्लेशान्संपादयति॥
तस्मादिदंशरीरंहेयमेवनसंदेहः॥एतेदोषाःपूर्वोक्तताम्रप्रतिमादिषुनसंत
ितिताद्दशताम्रप्रतिमादिषुसमर्पितस्रक्चंदनादयः॥परान्कृतार्थान्कुर्व
ंतीतिताद्दशताम्रादिप्रतिमाद्येगहानावपिउपकाराय प्राप्नुवंतीतिताद्दशता
म्रप्रतिमादिषुईश्वरत्वबुद्धिरुचितैवतर्हि अनात्मपदार्थः॥एकःकार्यरूपेण
८रि विपर्यणाम्य अनेकधा अवभासते॥तेनसहमिलितो अन्योपि पदार्थ॥अने
कधाभासितुंशक्नोतीत्यर्थेदृष्टांतवचनमस्तिवेतिचेत् अस्त्येव॥कथं आत्मा
एकेवपृथिवीकार्यरूपेणविपरिणम्यपर्वतवृक्षवनप्रकारगोपुरमंडप
गृहकुड्यकुसुलघटशरावादिरूपेणभासते॥तैर्मिलितः॥आकाशः
घटाकाशमठाकाशइत्यादिसंज्ञाभिर्भासिते॥तद्वदेवकार्यरूपेणपरिण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मीनृसिंह
मननग्रंथ
॥१२॥

२ विषयः

तैः अनात्मभिः मीलितः॥ आत्मा देवदत्तो यज्ञदत्तेत्यादिसंज्ञाभिः अनेकधाप्रतीय वर्णक २
ते॥ एतादृशः पृथिव्याकाशदृष्टांतः॥ अवच्छिन्नेपक्षे बहुशक्यते॥ प्रतिबिंब
पक्षे दृष्टांतउच्यते॥ कथं एकमेव जलं उपाधिवशात्॥ समुद्रतडाककूपवा
पिकुंभजलादिरूपेण अनेकधाप्रतीयते [illegible]
[illegible] णादिषु प्रतिबिंबितः॥ तेषु जलेषु प्रतिबिंबितसूर्यो पि अनेकधाप्र
प्रतीयते॥ एवमात्मा अनात्मकार्येषु प्रतिबिंबितः॥ अनेकधाप्रतिभासते॥
एवंप्रतीतावपि अनात्मकार्याणां अंतःकरणादीनां धर्माः॥ आत्मानं कालत्र
येपि न स्पृशंति॥ कथमित्युच्यते॥ तादृशा जलगतदोषाः चलनादयः॥
तस्मिन् जले प्रतिबिंबितसूर्यं यथा न स्पृशंति॥ तद्वदंतःकरणविकाराः॥
अंतःकरणप्रतिबिंबितजीवं न स्पृशंति॥ अंतःकरणादीनां अधिष्ठातृ
प्रत्यगात्मानं न स्पृशंतीति केवकथा॥ एतावन्मात्रमेव न। यथा पृथिवीवि
काराः॥ पृथिवीकार्याणां विकाराः अपः पृथिव्याः आधाराः तमाकाशं ॥१२॥

अंतःकर
णादिषु
५

१= आदिशब्देन पृथिव्यादि

नस्यप्रशांतिः॥ तद्यद्दनात्मनः स्वरूपं अज्ञानं अज्ञानकार्यं देहेंद्रियादि१ धर्मी श्च॥
अज्ञानस्य अज्ञानकार्याणां च आधारभूतं प्रत्यगात्मानं नस्यप्रशांति॥ अनेनप्र
कारेण आत्मानात्मविवेकं संपाद्य तादृश आत्मास्वरूपमिति यः जानाति स एव मु
क्त इति वेदांतानां घंटारवः॥ एतस्मिन्नर्थे संशयलेशोपि नास्तीति सिद्धं॥ छ॥
आत्मानात्मविवेकेन पुंसः संसंसारनिवृत्तिः॥ तद्विना जन्मकोट्यापि बंधच्छे =नाशः४=
दो न विद्यते॥१॥ इति श्रीमननग्रंथे आत्मानात्मविवेकनिरूपणं नाम तृतीयव
र्णकं समाप्तं॥ छ॥ श्रीलक्ष्मीनृसिंहार्पणमस्तु॥ श्रीरस्तु॥ छ॥ छ॥ छ॥
॥ श्रीलक्ष्मीनृसिंहाय नमः॥ जनयदुःखमस्येतत्किं स्वरूपमुतान्यतत्॥ स्व
म्यगागंतुकं चेति चिंत्यते मनसा मया॥१॥ प्राणिनां दुःखमागंतुकं वा स्वाभा
विकं मिति विचारे आगंतुकमिति वक्तव्यं॥ स्वाभाविकमिति वक्तुं न शक्यते ए
व॥ तथाउच्यमाने दुःखनिवृत्त्यै केपि यत्नं न कुर्युः॥ कुर्वंति यत्नं॥ तस्माच्च दुःखं
स्वाभाविकमिति वक्तुं न शक्यते॥ आगंतुकमेवेति वक्तव्यं॥ दुःखस्वाभाविक

नोचेद्दुःखस्वाभाविकमित्युक्ते

१ ननु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मीनृसिंह
मननगंथ
॥श्रे॥

४ तो

१ इयमुक्तिर्न घटते

मेवभवतु दुःखनिवृत्त्यर्थमपि यत्नः क्रियतामित्युक्ते उच्यते ॥ किमिदं स्वा
भाविकत्वं नाम स्वरूपमेव जातमिति चेत्ता स्वरूपस्यैव नाश आपद्यते ॥
भवत्विति चेत् निवृत्तदुःखो यः कश्चन न स्यात् ॥ तस्मात् दुःखस्वाभावि
कं न ॥ ननु दुःखस्य स्वाभाविकत्वेऽपि कुतो न निवृत्तिरिति चेत् ॥ न निवृत्तिरेव
कथं दृष्टांतमुखेन निरूपयामः ॥ दृष्टांतमेव निरूप्यते ॥ पिचुमंदपत्राणां
स्वाभाविकतिक्तत्वात् तादृशात्तिक्तत्वमपहाय केवलपिचुमंदपत्रास्थितिः
न दृष्टा ॥ तद्वदेवात्मनः यदि दुःखस्वाभाविकमुच्यते तर्हि दुःखनिवृत्तिः
कथमपि न स्यात् ॥ तस्मादात्मनः दुःखस्वाभाविकं न किंतु आगंतुकमेव ॥
ननु दुःखस्वाभाविकमेवास्तु तन्निवृत्तिरपि क्रियतां ॥ यथाग्नेः औष्ण्यं
स्वाभाविकत्वेऽपि तादृशस्वाभाविकौष्ण्यनिवृत्त्यर्थं मणिमंत्रौषध्यादिसे
वनया पश्चात्सा विभावो दृष्टः ॥ अन्योऽपि दृष्टांतः ॥ जलस्पर्शः स्वाभाविको
ऽपि अग्निसंपर्कात् निवृत्तौ उष्णत्वस्यैवाविर्भावदर्शनात् ॥ तद्वदात्मनो

वर्णक४
॥श्रे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि दुःखे स्वाभाविके दुःखस्य उत्कृष्टकर्मोपासनादिभिः निवृत्तिः। सुखाविर्भावो
पि भवतीत्युच्यमाने। तादृशदुःखस्य तात्कालिकपरिभव एव न त्वात्यंतिकं निवृ
त्तिः॥ कथं। अग्न्यादीनां तात्कालिकमेव परिभूतानां उष्णादीनां कालांतरे आ
विर्भावः यद्वद्दृश्यते। तद्वदात्मनोपि उत्कृष्टकर्मोपासनाफलभूतसुखादेः ना
शे पुनर्दुःखाविर्भावे च आत्यंतिकनिवृत्तिर्नेति निर्वचनं॥ एतावदेव न। एवं
प्रकारेणोक्तमोक्षस्यापि जन्यत्वमनित्यत्वं चापद्येत। भवत्विति चेन्न। तदसं
मतमिदं। एतावदेव न। आत्मा आनंदस्वरूप इति अभिव्यंजकानां श्रुति
स्मृतीतिहासपुराणागमाभियुक्तवचनानां वैयर्थ्यं स्यात्॥ एतावदे
व न। सुषुप्त्यवस्थायां समाध्यवस्थायां तूष्णीमूतावस्थायां च स्थित
त्वादात्मनः स्वाभाविकं चेत् दुःखं तर्हि उपलभ्येत। एतादृशावस्था
त्रयेपि प्राणिनां दुःखरहितोहमिति अनुभवसद्भावाच्च आत्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मीनृसिंह
मननग्रंथ
॥१६॥

नः दुःखं स्वाभाविकमिति अंगीकर्तुं न युक्तं॥ अंगीकारे तु सुखस्यैव वैयर्थमाप
द्येत॥ तस्मादात्मनः दुःखं स्वाभाविकमिति न वक्तव्यं। तर्हि कथं वक्तव्यमित्युक्ते
दुःखमागंतुकमेवेति वक्तव्यं॥ तर्हि केन दुःखमायातीत्युक्ते शरीरपरिग्रहेणे
ति निर्णयः। तस्मात् यस्मिन् यस्मिन् शरीरपरिग्रहोऽस्ति तस्मिन् तस्मिन् दुःख
मिति व्याप्तिः॥ नन्वेवं वक्तुं न शक्यते॥ राजप्रभृतिभिः सुखमेवानुभूयत इति
हेतोः यत्र यत्र शरीरपरिग्रहः॥ तत्र तत्र दुःखानुभव इति कथमुच्यत इति चेत्
उच्यत एव। कथं। राजप्रभृतिभिरपि दुःखमेवानुभूयते॥ तद्दुःखं कीदृशमित्युक्ते
उच्यते। राजप्रभृतीनां देहस्य रोगादौ समापाते दुःखं॥ पुत्राद्यभावे दुःखं॥ पु
त्रादिभिः यथोक्तकरणाभावे दुःखं॥ पुत्रादिमरणे दुःखं॥ बलवच्छत्रुभिः रा
३ कासु ज्यमाक्रांतं चेत् दुःखं॥ पत्न्यः केषांचित्कोपवशात् औषधप्रयोगके वश्यत्वनिमि
दुःखं॥ राज्यैश्वर्याभावे दुःखं॥ अधिके वर्षे दुःखं॥ जरावस्था मम संप्राप्ता म
रिष्यामीति च दुःखं॥ इत्याद्यनेकदुःखानि बहुधा॥ राजप्रभृतिषु दृश्यत इति॥ ॥१४॥

वर्णक ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ यत्संख्याकं परितोषिकं द्रव्यं तस्मात्किंचिदधिकं काकिणिकामात्रं लब्धं १ इति
चेत् तदा अहं सुखी मन्ये ...
ते सुखस्वरूपा इति मोहेनैवोक्तिः। मोहेन दुःखं सुखवद्भासते वा पक्षे भासत ए
व। कथं। भारवाहकस्य कुडवमात्रभारस्य प्रस्थमात्राधिक्ये न यत् दुःखं तत्
परिगणय्य संतोषमेव करोति॥ एवमांदोलिकादिवाहनवाहकाः स्वामिनः
ग्रामांतरप्रयाणे संतुष्यंति तदभावे दुःखयंति॥ कुम्भकाराश्च भिक्षादिकर्मण्यु
पलभ्यमाने संतुष्यंति तदभावे दुःखयंति। हस्तिपकाः॥ वनात् नूतनगजान
यनादिक्रियोपलब्धौ संतुष्यंति। तदभावे दुःखं प्राप्नुवंति॥ तस्मादेतेषां दुः
खान्येव सुखवद्भासंते॥ तद्वत् राजप्रभृतीनां मोहेन दुःखमेव सुखवद्भासते।
तस्मात् राजप्रभृतीनामपि सर्ववर्तमानानां दुःखकल्पनावश्यंभाव्या॥ तर्हि विवे
किनामपि दुःखमस्ति वेति पृच्छे चेत् स्यादेव॥ विवेकी ना[illegible]शरीरवान्॥ बाह्यशरीर
भाववान् अशरीरिणः विवेकव्यवहारो नास्तीति वक्ता शरीरवानेव विवेकी
वक्तव्यः॥ अतः विवेकिनो दुःखमस्ति। कथं। उच्यते॥ विवेकापि क्षुत्तृष्णाशीतोष्ण
द्वंद्वान्यनुभवति। उदरशूलदुःखं शिरोदुःखं च व्याघ्रादिसर्पादिभ्यः भय
कंपादीननुभवति॥ अतो विवेकी नामपि दुःखमस्त्येव॥ तर्हि विवेकिनो

वैनाशिकपदीकोनांकाकिशिकः।
भे ३

॥१६॥

वर्णक॰ ४

अविवेकिनश्च को भेद इति चेत् उच्यते भेदो वर्त्तत एव। कथं विवेकी तावत् सर्वाणि दुःखानि अंतःकरणधर्मत्वेन आत्मनः साक्षिणो मे न संतीति पश्यति। अविवेकी तु एतानि दुःखानि स्वात्मन्येवारोपयति। अन्यच्च पुत्रादिषु सुखिषु दुःखिषु सकलेषु विकलेषु वा स्वयमेव सकलो विकल इति। अन्यनिष्ठान् सर्वविकलधर्मान् स्वस्मिन्नारोपयति। संतप्यते। अतः अनयोः भेदः निर्दिष्ट इति स्पष्टमेव। तर्हि देवानामपि दुःखमस्ति वेति पृष्टे अस्त्येव। कथं देवानां शरीरमस्ति वा न वेति विचारे अस्त्येव। देवानामपि शरीरमस्तीति केन हेतुना अवगम्यत इति चेत्। शास्त्रेण वा गम्यते। तच्छास्त्रं देवानां दुःखं चास्तीति अवगमयति। तस्माद्देवानामपि दुःखमस्त्येव। कथं। उच्यते। अन्योन्यसुखेन कौर्येण। अन्योन्यशापेन। बलेन च एकस्य ऐश्वर्यं एकेनापह्रियते। एकस्य पत्नी एकेनापहार्यते। केरपि राक्षसैरागत्य देवान् भ्रंशं खलोभिर्वा सर्वदेशमाक्रम्य। वर्त्तमानराक्षसोपद्रवैर्न पुण्यकर्मक्षयाद्देवलो

९ देवानामसुराणां च ८ प्रजापतिः प्रजा असृजत इति

११ वर्त्तमानेन च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाशो भवती साधुनेकदुःखानि देवानां संतीति श्रुतिस्मृतीतिहासपुराण
निजगुः॥ तस्माद्देवानामपि दुःखमस्त्येव॥ यदि देवानामपि जन्मसम
तया दुःखं स्यात्॥ तर्ह्यस्माकं कथमुपास्याभूत्वा ऽभिष्टफलदायकास्यु
रिति चेत् शृणु रे व॥ कथं लोके राजप्रभृतयः स्वतो दुःखवंतो ऽपि ऐश्वर्यादि
सामग्री संपत्त्यास्माकमुपास्याभूत्वा भिष्टफलदायकाः भवंति॥ एवमे
व देवा अपि स्वतो दुःखवंतो ऽपि योगैश्वर्यादि बल संपत्त्यास्माकमुपास्या
भूत्वा फलानि ददत्येव॥ तर्हि देवा आनंदरूपा इति शास्त्रेणोच्यते
किंलता दशशास्त्रस्य कस्मिन्नर्थे तात्पर्यमिति चेत्॥ विवेकी पुरुषः श
रीरेण सुकृतवान् दुःखमनुभवन्नपि अंतःकरणधर्मत्वेन जानाति॥
तद्वदेव देवा अपि दुःखमंतःकरणनिष्ठत्वेन जानंति॥ तस्माद्दे
वा आनंदस्वरूपा इति शास्त्रमभिधत्ते॥ तर्हि देवानां दुःखमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मी ... मनन ... ॥१८॥ वर्णक ४

स्त्वीति प्रतिपादकशास्त्रस्य किं तात्पर्यमिति चेदुच्यते। यत्र यत्र शरीर
परिग्रहः तत्र तत्र दुःखमिति हिरण्यगर्भशरीरमभिव्याप्य भासते॥ अत
स्सशरीरमुक्त्यर्थं यत्नो न विधीयतां॥ अशरीरत्वमुक्त्यर्थमेव यत्
नो विधेय इति शास्त्रस्य तात्पर्यमवगंतव्यं॥ तर्हि सशरीरमुक्तिपक्ष
अशरीरमुक्तिः काचिदस्ति चेत्तर्हि तदर्थं यत्नो विधातव्यः॥ त
त्रैव मानं न पश्यामः। कथं सशरीरमुक्तिभाजिनीयमि क्षत्रादी नि
सप्तताद्दश्यंते॥ अशरीरमुक्तिस्तु प्रत्यक्षतः कौपिनोपलभ्यते॥ किंच
योगिनो पियोगमहिम्ना लोकांतरं गत्वा सशरीरमुक्तान्दृष्ट्वा समाग
ता इति शास्त्रप्रवचनवत्॥ अशरीरमुक्तान्दृष्ट्वा आगता इति शास्त्रे
णापि नोच्यते॥ तस्मात्सशरीरमुक्तोहं अनेककालं सशरीरमुक्त एव
सन्नुषित्वा आगतोस्मीति शास्त्रे [illegible] मिति सशरीरमुक्तिरनेक

॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सप्तदशपत्रस्यायं शोधः आस्मिन्पत्रेवर्तते ॥

तत्र दुःखं द्वेषादिपूर्वोक्तया च शरीरपरिग्रहः यत्र यत्र नास्ति तच्च तत्र दुःखाभा
व इति च अन्वयव्यतिरेकाभ्यां सिद्धं एवमात्मनः शरीरपरिग्रहेण दुःख
मस्तीति दुःखं स्वाभाविकमिति वक्तुं न शक्यते। आगंतुकमेवेति वक्तव्यं। तर्हि
इदं शरीरं केन हेतुना समायातं इत्युक्ते कर्मणा संचितपंचीकृतपंचमहाभूते
भ्यः समायातमिति प्रतीयते। केवलपंचीकृतपंचमहाभूतनिर्मितमित्युच्यमा
ने। सर्वत्र पंचमहाभूतानां विद्यमानत्वात् सर्वत्र शरीरमुत्पद्येत नोत्पद्यते इ
ति हेतोः केवलं पंचमहाभूतनिर्मितमिति वक्तुं न शक्यते। अन्यच्च पंचमहाभू
तानि शुक्लशोणिताकारेण यत्र परिणतानि तत्र शरीरोत्पत्तिरिति वक्तुं न
शक्यते। नित्यं स्त्रीपुरुषसंयोगेन शुक्लशोणितसंभवात् शरीरमुत्पद्येत
नोत्पद्यते किल। तर्हि स्त्रीपुरुषसंयोगेन शुक्लशोणितादिकं नास्त्येवेत्यु
च्यमाने। प्रत्यक्षोपलंभेन तस्य परिहृतत्वात् स्त्रीपुरुषसंयोगाभावे किल
शुक्लशोणितयोरनुत्पत्तिर्वक्तव्या। यद्यपि स्त्रीपुरुषसंयोगे शुक्लशोणित

मस्ति शुक्लशोणितसंयोगो नास्ति इत्यपि न स्त्रीपुरुषयोः रतिर्नो
च्यत इति शुक्लशोणितयोः संयोग एव नास्तीति वक्तुं न शक्यत इ
ति। शक्यत एव। तर्हि शुक्लशोणित एव देशकालादिकमवेक्ष्य श
रीराकारं भवतीति अपि वक्तुं न शक्यते। प्राणिनां वैचित्र्यं न स्यात्
तर्हि प्राणिवैचित्र्यं कुतः जायत इति चेत् जायत एव। तन्निरूपयामः। इदं
प्राणिवैचित्र्यं देशकालतो भवतीति वक्तुं न पार्यते। देशकालादीनां सर्व
प्राणिसाधारण्यात्। सर्वस्य जगतो वैचित्र्यं दृश्यते एकरूपेणैव वक्तुं
न शक्यते। देशकालादयः साधारणाः किल जगद्वैचित्र्यमस्तीति चेत् तैः
साधारणकारणैः देशकालादिभिः किंचिदपि जगद्वैचित्र्यं न स्यादिति दे
शकालादिभिः जगद्वैचित्र्यमस्तीति वक्तुं न शक्यते। तर्हि कस्माद्ध[illegible]दास्वै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालं अशरीरमुक्तः सन् आगतोस्मि इति शास्त्रेणोक्तमिति सशरीरमुक्ति
रस्ति अशरीरमुक्तिर्नास्तीति प्रतीयत इति चेत् तथा न वक्तव्यं ॥ कथं ॥ सु
षुप्तिसुखं सकलप्राणिनां यथा प्रत्यक्षं तथा अशरीरमुक्तिरपि प्रत्यक्षैव ॥
सुषुप्तिसुखं प्रत्यक्षं चेत् मुक्तिसुखं कथं प्रत्यक्षं भवेदित्युक्ते ॥ अद्वितीय
सुखस्वरूपतया सर्वसुषुप्तिष्वनुसममिति कृतां सुषुप्तिसुखं प्रत्यक्षमेव ॥ नव
तथा मुक्तिसुखं प्रत्यक्षं स्यादेव तर्हि सुखं प्रत्यक्षं सुषुप्तिमुक्त्योः सम
मिति वक्तुं सुषुप्तिरेव मुक्तिरिति वक्तुं कुतः न शक्यत इति चेत् ॥ सुषु
प्तौ अज्ञानं पुनरुत्तिष्ठति मुक्तौ तु अज्ञानं पुनर्नोत्तिष्ठति इति तयोर्भे
दः ॥ तस्मात् सुषुप्तिसुखवत् मुक्तिसुखमपि प्रत्यक्षमेवेति सशरी
रमुक्तेः अशरीरमुक्तिरेव प्रत्यक्षा योगी तु रूपः अशरीरमुक्तं इत्थं
मया आगतमिति न वदतीति पर्युक्तं ॥ तद्वपि ॥ अशरीरमुक्तो हं अश री२
रीरमुक्त एवं स्थित्वा आगतोस्मीति न वदतीत्युक्तं ॥ तद्वपि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(लक्ष्मीनृसिंह)
(मननगंथ ॥१८॥) अशरीरमुक्तिरस्तीसर्थे प्रमाणं॥सशरीरमुक्तिरस्तीसर्थे येन क्षत्रा (वर्णिक ४)
द्यः प्रमाणमिति यत् उक्तं॥ तत्सर्वं स्वर्गलोकविषयं सत् अनित्यंसं (२=वाक्यं=)
त॥ [illegible]संसारात् प्रत्यक्षमुपलभ्यत इति ब्रह्मलोकविषयमेव जातं॥ (तेषां)
तस्मात्तेन नक्षत्राद्यः सशरीरमुक्तिकल्पने प्रमाणं न भवंति॥ (२)
शास्त्रमेव खलु प्रमाणं शास्त्रं विना प्रमाणांतरं नास्त्येव॥ अशरी
रमुक्तिरस्तीत्यर्थे शास्त्रयुक्त्यनुभावाः संतीति अशरीरमुक्तौ
(७>कर्तव्यः) विवयतो विधेयः॥ सशरीरमुक्तौ यत्नौ विहितश्चेद पिंडः खनि (न विधेयः ७॥)
वृत्तिर्न भवतीति शास्त्रयुक्तिभ्यां सम्यगवगम्यते॥ इतः परं अनु
(१ अनु) भवो निरूप्यते॥ कोसौ अनुभवो नाम सुसौ शरीरपरिग्रहाभावाद् (श्रु)
वडः खाभावः॥ जाग्रत्स्वप्नयोस्तु शरीरपरिग्रहसत्वात् दुःख (दिवसु)
(१=पदादि वस्तु) अयं [illegible] मि प्रमाणातीत्युक्तेः असाधारणत्वात् (१=पुष्प ॥१७॥)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिणान्यसाधारणकारण ता निचैद

रणकुलालादिव्यापारवैचित्र्येण समुत्पाती तिप्रतीयते ॥ तस्मात् पं
चीकृतभूतानि शुक्लशोणितकारणदेशकालादीन पेक्ष्य असा
धारणकारणान्तरमप्यपेक्ष्य विचित्रशरीराद्याकारेण परिणाम्य
सते इति वक्तव्यं ॥ तत्कारणान्तरं किमित्युक्ते कर्म एवेति निश्चितं ॥ ततो हि
कर्मणः एतादृशं सामर्थ्यं अस्तीति केवलकर्मणा शरीरमुत्पद्यता
मित्युक्ते कर्म निराश्रयं सत् कुत्रापि न तिष्ठतीति त्रिदर्पणं वैस्पष्ट
त्वाच्चहेतोः ॥ केवलकर्मणा शरीरोत्पत्तिर्न संभवति ॥ तर्हि कस्मा
दित्युक्ते कर्मणा संयुक्तपंचीकृतपंचमहाभूतेभ्यः शरीरोत्पत्ति
रिति विजानीहि ॥ एवमुक्त वशात् कारणद्वयं शरीरोत्पत्तौ वि
जानीयात् ॥ तत्कारणद्वयं किमित्युक्ते एकं कर्म अपरं पंचमहाभूता
नि ॥ तत्र निमित्तकारणं कर्म वैचित्र्येण शरीरवैचित्र्यमित्यर्थः स्पष्टं

श्रीसि॰
मननग्रंथ
॥१८

तः॥ यथा घटोत्पत्तौ केवलं उपादानभूतं मृदेव कार्यं॥ नोत्पद्यते केवलं
निमित्तभूतकुलालादिव्यापारेणापि कार्यं नोत्पद्यते॥ कुलालव्या
पारः मृदमाश्रित्य स्थितः सन् कार्यं जनयति॥ मृदपि एकरूपे
णास्थिता चेदपि कुलालव्यापारेण कार्यवैचित्र्यं यथा संपादय
ति॥ तद्वत् दार्ष्टान्तिकेपि केवलपंचमहाभूतैः शरीरं नोत्पद्यते।
केवलकर्मणा च शरीरं नोत्पद्यते॥ किंतु॥ कर्मसहितपंचमहा
भूतेभ्यः॥ शरीरोत्पत्तिः॥ कर्म वैचित्र्यं॥ दृष्टांतेपि उपादानभू
तमृदि सत्यपि कुलालादिव्यापारं विना घटः नोत्पद्यते॥ तद्वदुपा
दानकारणीभूतेश्वरसृष्टपंचमहाभूतानि कार्यं भौतिकप्र
पंचः॥ सर्वं स्थितं चेदपि स्वप्रियं स्वात्माहमिति ज्ञानेन निमित्त
कारणभूतकर्मप्रपस्य नश्यति॥ तस्य शरीरं पुनर्यातीति सिद्धं॥
नी

वर्णक ४
वाक्य

पा शारीर
वैचि

॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रपंचस्य कालत्रयेबाध्यत्वेपिप्रतीतिरस्तिप्रतीतावपिनास्तीसेवंयस्यापि
अन्वयः सर्वदा॥तस्यपुनर्जन्मनास्तीतिसिद्धं॥एतादृशबंधमोक्षौअन्वय
३न व्यतिरेकौसिद्धौ॥अन्वयव्यतिरेकौचकर्मणिसतिशरीरंकर्माभावेश
रीराभावः॥इतिस्वरूपेणज्ञेयौ॥इदंकुत्रानुभूयते॥जाग्रतिस्वप्नयोः
स्थूलसूक्ष्मभोगप्रदस्यकर्मणः सत्वात्शरीरमस्ति॥सुषुप्तौतदभा
वात्शरीराभावः॥तस्मात्कर्मणिसतिशरीरंकर्माभावेशरीराभावः॥
इतिश्रुतिस्मृतियुक्त्यनुभवैःसिद्धं॥सशरीरस्यदुःखित्वंमात्तिरव्या
कृतायतः॥अतोऽशरीरमुक्त्यर्थंयत्नंकुर्यादतन्द्रितः॥१॥नभूतपंच
कैनापिकर्मणाकेवलादपि॥उभाभ्यांमिलिताभ्यांचशरीरमुपजा
यते॥२॥नच्छरीरानवाप्तिश्चज्ञानादेवनचान्यतः॥अतःसर्वप्रयत्ने
नज्ञानाभ्यासपरोभवेत्॥३॥इतिश्रीमननग्रंथेशरीरनिर्णयनिरूपणंना
मचतुर्थवर्णकंसमाप्तं॥४॥श्रीलक्ष्मीनृसिंहार्पणमस्तु॥श्रीरस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न. सिं.
लक्ष्मीनृसिंह
मननगर
॥१६॥

॥ श्रीलक्ष्मीनृसिंहाय नमः ॥ अथ पंचमवर्णके कर्मकृतिविधं विवृच वर्णकृ. ५
यामः ॥ पुण्यकर्म पापकर्म मिश्रकर्मेति त्रिविधं कर्म ॥ यत्कर्म कु वाक्य
रुते तदभिसंपद्यत इति ॥ पुण्येन पुण्यो भवति ॥ पापः पापेनेति ॥ पुण्ये
न पुण्यलोकं नयति ॥ पापेन पापमुभाभ्यामेव मनुष्यलोकं ॥ अन्यत्रैव
तरं कल्याणतरं रूपं कुरुते पित्र्यं वा गांधर्वं वा दैवं वा प्राजापत्यं वा ब्रा
ह्मं वैतस्यादिश्रुतेः ॥ एतेषां फलान्यपि त्रिविधानि ॥ तानि कानि ॥ पु
ण्यकर्मणा देवादिशरीरप्राप्तिः ॥ पापकर्मणा तिर्यगादिशरीरप्राप्तिः ॥
मिश्रकर्मणा मनुष्यादिशरीरप्राप्तिः ॥ एतत्त्रिविधकर्मणामुत्कृष्टम
ध्यमसामान्यफलानि निरूपयामः ॥ पुण्योत्कर्षस्य हिरण्यगर्भशरी
रप्राप्तिः ॥ पुण्यमध्यमस्य इंद्रादिशरीरप्राप्तिः ॥ पुण्यसामान्यस्य य
क्षराक्षसपिशाचादिशरीरप्राप्तिः ॥ एवं पापोत्कर्षीस्वरसंतापकं गुच्छनि र२
कृष्टपापतरुविशेषः ॥ गुल्मे वृश्चिककृमिकामक्षिकादिशरीरप्राप्तिः ॥ ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पापमध्यमात्स्थावराम्रफनसनारिकेलमहिषाश्वगर्द्दभादिशरीरप्राप्तिः॥
पापसामान्यात् गोगजाश्वखरतुलस्यादिशरीरप्राप्तिः॥ एवं मिश्रोत्क-
र्षस्य निष्कामकर्मानुष्ठानयोग्यशरीरप्राप्तिः॥ मिश्रमध्यमस्य स्व-
श्रमोचितकाम्यकर्मानुष्ठानयोग्यशरीरप्राप्तिः॥ एवं मिश्रसामान्य-
स्य चंडालपुल्कसव्याधादिचांडालविशेषलुब्धकादिशरीरप्रा-
प्तिरिति विवेकः॥ एवं मिश्रोत्कर्षे निष्कामकर्मानुष्ठानेन चित्तशुद्धि-
द्वारा साधनचतुष्टयसंपत्तिः॥ तद्द्वारा च सद्गुरुलाभेन श्रवणमन-
ननिदिध्यासनजन्यतत्त्वसाक्षात्कारेण जीवन्मुक्तिरिति॥ तस्मात्
विवेकी पुरुषः कर्मतारतम्यं विचार्य मिश्रोत्कर्षेण जीवन्मुक्तिसुखं
प्राप्नोति तथा यत्नं विदधीत॥ एतानि पुण्यपापमिश्रकर्माणि येन
क्रियंते त्रिविधकरणेन॥ तत्र केन कानि क्रियंत इत्युक्ते सविशेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ःपं मिश्रकर्म
चिंता निर्विशेषचिंता परलोकचिंता परेषां हितप्राप्तिचिंता भक्तिज्ञा
नवैराग्यचिंतेत्यादि मनसा क्रियमाणं पुण्यकर्म ॥ सर्वदा विषय
चिंता परेषामहितचिंता वेदशास्त्राणामप्रामाण्यचिंता धर्माध
र्मांघभावचिंतेत्यादि मनसा क्रियमाणं पापकर्म ॥ एतानि मनसा
क्रियमाणानि पुण्यपापमिश्रकर्माणि ॥ वेदपठनं शास्त्रपठनं गी
तासहस्रनामपठनं गायत्रीपंचाक्षरादिजपः भगवन्नामसंकी
र्तनं परोपकारवार्त्तेत्यादिवाग्भिः क्रियमाणं पुण्यकर्म ॥ वाक्कुडति
सर्वेंद्रियाणां उपलक्षणं इतरदपिकरणं स्वस्वोचितं कर्म करोति ॥
सर्वदा महतां दूषणं परेषामवाच्यवादः ॥ असत्यभाषणं पैशुन्य
वादः इत्यादिवाग्भिः क्रियमाणं पापकर्म ॥ वेदशास्त्रगीतापठनं
जपकालेषु लौकीकवार्त्ता असत्यभाषणं चेत्यादिवाग्भिः क्रिय

ईश्वरविशेषविशेषचिंतायां ध्यानकाले क्रियमाण
पाठप्रचारादिकं मनसा क्रियमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माणं मिश्रकर्म ॥ एतानि वाग्भिः क्रियमाणानि पुण्यपापमिश्रक
र्माणि ॥ पुण्यतीर्थेषु स्नानादयः देवतानमस्कारादयः ॥ अंगप्रद
क्षिणादयः परेषां पीडनं यथा न भवति तथा वर्त्तनमित्यादि कायिकं
पुण्यकर्म ॥ सर्वदा परहिंसाकरणं परस्त्रीसंगमः बलेन परद्र
व्यापहरणं चोरीकरणं विटैः सह संचरणमित्यादि कायिकं
पापकर्म ॥ ब्राह्मणभोजनानिमित्तं ब्राह्मणानामेव पीडनं पर
द्रव्यापहरणेन अप्पादानं परद्रव्यमपहृत्य देवालयगोपुरादि
के करणं मठादिकरणं प्रभुत्वादिना बलात्कारेण कर्मकारिणां द्रव्य
मदत्वैव कर्मकरणमित्यादीनि कायिकमिश्रकर्माणि ॥ एतानि ज्ञातका
नि ॥ एवं त्रिविधकर्माणि क्रियंते ॥ एतद्विचारस्य किं फलमित्युक्ते
मुख्यफलं ॥ अवांतरफलं चेति द्विविधं ॥ मुख्यफलं तावत् एत

श्री

परये
गा गा
गामि
भिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥
त्रिविधकरणैः क्रियमाणं कर्म भवति ॥ आत्मा तावत् एकमपि क
र्म न करोति । तादृशः अकर्त्ता आत्माहमिति निश्चयो मुख्यफलं ॥ अ
वांतरफलं तु आत्माहमिति निश्चयाभावेपि एतानि त्रिविधकरणानि
पुण्यकर्मसु विधेयानि नो चेत् प्रमादवशात् पुण्यकर्मसु विधातुं न
शक्यं चेदपि त्रिविधकरणानि मिश्रकर्मसु वा विधातव्यानि । सर्व
प्रकारैः त्रिविधकरणानि पापकर्मसु अविधाय स्थातव्यानीदम
वांतरफलं ॥ एकस्य फलद्वयं कथमिति चेत् भवत्येव ॥ कथं कुल्या
क्षानारोप्य तत्फलमानी पुरुषस्य प्रथमो विनियोगः क्रियते मुख्यफ
लं ॥ पश्चात् पिपासितैर्भक्षुप्रक्षालनादीनि चानीय विनियोगः क्रि
यते ॥ तदवांतरफलं ॥ तद्वदेतद्विचारस्यापि फलद्वयं ॥ ननु सर्वे पु
रुषाः अहमिदं कर्माकरवमिति वदंतीति तेषामनुभवेन कर्तृ
त्वमात्मनिष्ठत्वेन प्रतीयते ॥ तस्मात् कर्तृत्वमात्मनिष्ठमिति चेत् ॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ ननु आत्मनिष्ठकर्तृत्वमात्मनि प्रतीयत इति

आत्मनो निर्विकारत्वात् तस्य कर्तृत्वं वक्तुं न पार्यते ॥ न शक्यते ॥ तर्हि
इदं कर्तृत्वं आत्मनि प्रतीयते इति आत्मनि आगन्तुकमिति वक्तव्यं
स्वाभाविकमेवेति कुतो नोच्यत इति चेत् ॥ तादृशस्वाभाविककर्तृ
त्वापोहनाय केपि यत्नं कुर्वीरन् मुमुक्षवः ॥ कर्तृत्वनित्यत्व सर्वं यत्ने
विरुध्यते इति आत्मनः कर्तृत्वस्वाभाविकं न ॥ ननु आत्मनः कर्तृत्वं
स्वाभाविकं न ॥ ननु आत्मनः कर्तृत्वं स्वाभाविकं अस्तु तादृशाक
र्तृत्वापोहनाय यत्नो विधेयश्चेत् ॥ स्वाभाविकं नाम स्वरूपमेवेति ॥
स्वरूपनाशार्थमेव यत्नो विहितैः कृतः स्यात् ॥ तच्चानेष्टं ॥ ए
तावदेव न ॥ स्वाभाविककर्तृत्वस्य नित्यत्वात् स्वरूपमेव नश्यतीति
कर्तृत्वेन विमुक्तः अकर्तायः कश्चन न स्यात् ॥ तस्मात् कर्तृत्वं स्वा
भाविकं न ॥ ननु स्वाभाविन ॥ ननु स्वाभाविकमेवास्तु क

८ स्वाभाविकं चास्तीति चेत् ९ आत्मनः कर्तृत्वं ९
९ आत्मनः कर्तृत्वं कं

८ किंचात्मनः कर्तृत्वं नास्ति ... मा सति प्रतीयत ॥

किं स्वभावजं

१ किल ... मणिमंत्रौषधीर्यपात् तथा आत्मनः ... विक कर्तृ
त्वस्यापि निवृत्तिः उत्कृष्ट कर्मोपासनयाप्यस्तु इति चेन्न

त्वं निवृत्तिरप्यस्तु॥ यथा अग्नेरुष्णत्वं स्वाभाविकं तन्निवृत्तिस्तु
मणिमंत्रादिभिः कर्तुं शक्यते॥ तद्वदात्मनोपि कर्तृत्वं स्वाभाविकं त
न्निवृत्तिस्तु मणिमंत्रादिभिः कर्तुं न शक्यते॥ तद्वदात्मनोपि कर्तृ
त्वं स्वाभाविकं चेद [illegible]त्वं निवृत्ति[illegible]रुत्कृष्टकर्मोपासनाद्यनुष्ठा
नेन कर्तुं शक्यते इति चेत॥ अग्नेरुष्णत्वं कालांतरे मणिमंत्रा
दि विनियोगे नैभवति॥ तद्वदात्मनोपि कर्मोपासनाफलनाशो
कर्तृत्वं यथापूर्वं आविर्भवेत॥ एतावदेव न॥ कर्तृत्वनिवृत्तिस
पमुक्तेः जन्यत्वेन नित्यत्वं च स्यात॥ अन्य आत्मा अकर्तेति प्रति
पादक श्रुत्यादेरपि वैयर्थ्यं मापेत॥ इदमपि न सुषुप्तौ आत्मा सा
ति तस्मिन् कर्तृत्वं प्रतीयेत॥ न प्रतीयते खलु तस्मात् आत्मनः
कर्तृत्वं स्वाभाविकं न॥ ननु सुषुप्तौ आत्मनः कर्तृत्वं कुतः प्रत

Left margin: [illegible] ॥२२॥ — आविर्भावो ५ — २५

Right margin: वाक्य — स्यपथा ५ — ॥२२॥

यत्नं॥ कर्तृत्वस्य प्रयोजनाभावात् न प्रतीयते॥ कथं॥ उच्यते॥ तक्षादृ
=शिल्पकारादीनां अस्मिन्नर्थे व्याससूत्रं यथा तक्षोभयथा
वास्यादीनि करणानि अपेक्ष्य कर्ता दुःखी भवति॥ अनपेक्ष्य तु स्व
रूपेण कर्ता सुखी भवति॥ तथा आत्मापि बुध्यादीनि करणान्यपे
क्ष्य कर्ता संसारी अनपेक्ष्य तु स्वतोऽकर्ता परमानंदः स्वरूपः॥ दृ
नांस्य कार्यं प्रति कर्तृत्वम् अस्ति चेदपि स्नानभोजनशयनविहार
कालेषु वास्यादिकरणसंयोगाभावात्॥ कर्तृत्वं यथा न प्रती
ते॥ वास्यादिकरणसंयोगे च प्रतीयते॥ तद्वदात्मनोपि सुषुप्ते
कर्तृत्वम् अस्ति चेदपि त्रिविधकरणसंबंधाभावात् कर्तृत्वं न प्र
तीयते॥ जाग्रत्स्वप्नयोस्तु तत्सत्वात् प्रतीयत इति चेदुच्यते॥
तूष्णीभूतावस्थायां करणसंयोगो वर्त्तत इति अकर्तृरूपिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्तृत्वं प्रतीयेत ॥ न प्रतीयते खलु ॥ तस्मादात्मनः कर्तृत्वेन स्वाभावि
कं आगंतुकमेवेति सिद्धं ॥ आगंतुकं नाम अन्यनिष्ठधर्मस्य अन्य
निष्ठत्वप्रतीतिः ॥ तथा प्रतीयते वेत्सु क्व प्रतीयत एव ॥ कथं ॥ नौका
यामारूह्य गच्छतां अज्ञानेन नौकानिष्ठं चांचल्यं तीरस्थवृक्षादौ
तीरस्थवृक्षादिनिष्ठमचांचल्यं नौकानिष्ठत्वेन यथा प्रतीयते ॥
तद्वत् त्रिविधकरणनिष्ठकर्तृत्वं अज्ञानेनात्मनिष्ठतया प्रतीयते ॥
आत्मनः अकर्तृत्वं त्रिविधकारणनिष्ठतया प्रतीयते ॥ अन्यो
पि दृष्टांतः ॥ चंद्रं पश्यतः पुंसः मेघनिष्ठं चांचल्यं चंद्रनिष्ठत्वे
न प्रतीयते ॥ चंद्रनिष्ठमचांचल्यं मेघनिष्ठत्वेन प्रतीयते ॥ तद्वदा
त्मनः कर्तृत्वमागंतुकमेव ॥ तर्हि एतत्त्रिविधकरणानां कर्तृ
त्वमस्ति चेदात्मनिष्ठतया प्रतीयत इति वक्तुं न शक्यते ॥ त्रि

विधकरणान्यचेतनानीतितेषांकर्तृत्वंवक्तुंनपार्यते॥कथं॥
लोकेचेतनानामेवकरणसापेक्षत्वात्कर्तृत्वंदृश्यते॥नोचेत्
अचेतनत्रिविधकरणस्यैवकर्तृत्वमुच्येत॥तर्हिचेतनत्वंकरणां
तरमपिकल्प्येत॥तथाकल्पयितुमशक्यत्वात्॥त्रिविधकरणानां
कर्तृत्वंनवक्तव्यमित्युक्तेवक्तव्यमेवकथं॥लोकेअचेतनानामेवकर्तृ
त्वंदृष्टमितित्रिविधकरणानामेवकर्तृत्वंवक्तुंशक्यते॥लोकेयत्र
कुत्रापिनदृष्टमितिचेत्वाय्वादिषुदृष्टत्वात्॥कथं॥अचेतनस्यवायोः
करणंचेतनत्वंचानपेक्ष्यैववृक्षादिघुसाटनक्रियांप्रतिकर्तृत्वद
र्शनात्॥अन्यच्च॥प्रवाहस्यापिकरणंचेतनसंधानपेक्ष्ये
वतीरापुष्ठेदनक्रियांप्रतिकर्तृत्वंदृष्टं॥तस्मात्अचेतनानामेव
तीरपुष्ठेद

न ७
च

नान्दसिंह ममनग्रंथ ॥२५॥

२२

त्रिविध्यकरणानां चेतनत्वे करणांतरं चानपेक्ष्यैव त्रिविध्यकर्मकर्तृ
त्वं संभवति॥ तर्हि एतानि त्रिविध्यकरणान्यपि केनचित्प्रेरिता
नि संति त्रिविध्यकर्माणि कुर्वंति वा स्वत एव कुर्वंति वेत्युक्ते
स्वत एव कुर्वंतीति ब्रूमः॥ तथोच्यमाने पृ थ्व्यादीन्यपि क
रणानीति कृत्वा तेषामपि अन्यप्रेरणं विनैव कर्तृत्वमापतित॥
तथा न दृष्टमिति॥ अन्यप्रेरितान्येव कर्तॄणि भवंति॥ तर्हि
चेतनेन प्रेरितानि संति कर्तॄणि भवंति॥ अचेतनेन प्रेरि
तानि संति कर्तॄणि भवंति वेति विचारयामः॥ चेतनप्रे
रितान्येव कुर्वंतीत्युक्ते चेतनस्यात्मनो निर्विकारत्वात्॥

कर्मका. वाक्य

प६

॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेतनप्रेरितान्येकुर्वंतीतिवक्तुंनशक्यते॥ अचेतनप्रेरितान्ये
वकुर्वंतीत्युक्तेघटोपिघटांतरंप्रेरयेत्॥ घटांतरप्रेरितस्यापिघ
टस्यजलाहरणक्रियासंभाव्येत॥ तथानदृष्टं॥ मयारेवालयंका
रितंमयासहस्रभोजनंकारितमितिकारयितृत्वमात्मनिष्ठतया
प्रतीयतइति आत्मनएवकारयितृत्वमित्युक्तेपि आत्मनोनिर्वि
कारत्वात्कारयितृत्वमपिन॥ तर्हिएतस्यकारयितृत्वानुभवस्य
कागतिरितिचेत्॥ अन्यनिष्ठमेवकारयितृत्वमात्मनिप्रतीयतइ
तिकारयितृत्वमागंतुकमेव॥ अन्यनिष्ठकारयितृत्वमात्मनिप्र
तीयतइति किमर्थमुच्यते॥ स्वाभाविकमेवास्त्विति चेत् स्वाभा
विकत्वेतन्निवृत्तौकेपियत्नंनकुर्युः॥ मुमुक्षवश्चयत्नंकुर्वंति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादात्मनः कारयितृत्वं स्वाभाविकं न॥ ननु स्वाभाविकं॥ ननु स्वा
भाविकमस्तु॥ तन्निवृत्तौ यत्नोपि क्रियतामिति चेत्॥ स्वाभाविकत्वं स्वरू
पमेवेति स्वरूपनाशार्थमेव यत्न इत्यापद्यते॥ न च स्वरूपनाशार्थं केपि
यतंते॥ तस्मात्स्वाभाविककारयितृत्वनिवृत्त्यर्थं यत्नं इति संभावनामा
त्रमपि न॥ किंच॥ स्वाभाविकस्य कारयितृत्वनिवृत्तौ स्वरूपमेव नश्य
तीति कारयितृत्वेन विमुक्तः अविकारयिता पुरुषः कोपि न स्यात्॥ का
रयितृत्वं स्वाभाविकं न॥ ननु स्वाभाविकमप्यस्तु तन्निवृत्तिरप्यस्तु॥ य
था अग्नेरुष्णत्वं स्वाभाविकमपि मणिमंत्रादिना निवर्त्तते॥ तद्वदात्मनः
कारयितृत्वं स्वाभाविकं चेदपि उत्कृष्टकर्मोपासनानुष्ठानेन निवर्त्तत इ
ति चेत्॥ अग्नेरुष्णत्वं कालांतरे मणिमंत्रादिवियोगेन पुनराविर्भवति॥
तद्वदुत्कृष्टकर्मोपासनाफलनाशे कारयितृत्वमाविर्भवेत्॥ एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुच्यते चेत्कारयितृत्वनिवर्तिरूपमुक्तेः अन्यत्वमनित्यत्वं च स्यात्॥
अन्यच्च॥ आत्मनः अकारयितृत्वप्रतिपादकश्रुतिः व्यर्था स्यात् सुषुप्ता
वपि आत्मनः सत्वात्कारयितृत्वं प्रतीयेत न प्रतीयते॥ ननु सुषुप्तौ आत्मस
त्वे तव मते कारयितृत्वमवश्यं भवति॥ यथा उपाध्यायस्य अध्यापकत्वम
स्ति चेदपि नियम्यशिष्यसैमैसन्निधानाभावे वध्यानाभावे उपाध्याय
त्वं न प्रतीयते॥ तत्सत्वे च तत्प्रतीतिः॥ राजप्रभृतीनामपि नियंतृत्व स्वा
भाविकत्वे नियम्यमंत्रिपुरोहितप्रभृत्यादिसमधानाभावेन प्रतीयते
तत्समवधाने च नियंतृत्वप्रतीतिः॥ तद्वदात्मनोपि सुषुप्तौ कारयितृत्व
स्वाभाविकेपि नियम्यानां त्रिविधकरणानामसन्निधानाद्प्रतीतिः॥ जा
ग्रत्स्वप्नयोः तत्संनिधानात्प्रतीतिरिति चेन्न॥ तथोच्यमाने मूर्छाभू
तावस्थायां करणसंपर्कसम्भवात्कारयितृत्वं प्रतीयेत॥ न प्रतीय

३ षक

४ ननु मुमुक्षो आत्मनः कारयितृत्वं विधमानमपि न प्रातीयते। तत्कथं॥

आन्दक्रियास
नननगंथ
॥२६॥

५ तर्ह्यचेतनो कारयितृत्वं चेत् घटोपि घटांतरेण प्रेर्यते

तिःखलु॥ तस्मात् आत्मनः कारयितृत्वं स्वाभाविकं न॥ किंत्वागंतुकमेव॥ आ
गंतुकं नाम अन्यनिष्ठधर्मः अन्यनिष्ठत्वेन प्रतीयते चेत् स आगंतुकः॥ ज
पाकुसुमनिष्ठलौहित्यं स्फटिकनिष्ठतया यथा प्रतीयते॥ तद्वदेव रागद्वे
षादिनिष्ठकारयितृत्वम् अज्ञानेनात्मनिष्ठतया प्रतीयते॥ आत्मनिष्ठाकार
यितृत्वम् अज्ञानेन रागद्वेषादिनिष्ठतया प्रतीयते॥ तथा च घटप्रेरितघटां
तरस्य जलाद्याहरणं प्रति कारयितृत्वं स्यात् इति पूर्वमुक्तं॥ तत्र उत्तरं कि
मिमुक्ते तत्र योग्यता नास्तीति प्रेरकत्वाभावः॥ यत्रास्ति योग्यता तत्र तत्प्र
तीतिः॥ यथाग्निना संयुक्तायःपिंडैः चतुरंगबलानि संहियंत इति प्रे
चेतनस्याग्नेः अचेतनपाषाणादिप्रतिप्रेरकत्वं पश्यामः॥ अन्यच्च॥
[illegible]तशरीरस्य स्वज्ञातिजनैः क्रियमाणां उत्तरक्रियां प्रति कारयितृत्वं द
श्यते॥ तथा च चेतनरागद्वेषादीनां त्रिविध्यकरणैः क्रियमाणा त्रिविध

वर्णीक
वाक्य
॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मप्रतिकारयितृत्वं दृश्यते॥ नन्वेवमात्मनः सर्वान्तर्यामित्वप्रतिपादके श्रु
तिः कस्मिन्नर्थे तात्पर्यम् इति चेत्॥ आत्मनो निर्विकारित्वादस्मदादिवत्क
र्तृत्वं न॥ आदित्यसन्निधानेन सर्वप्राणिनः स्वस्वकार्येषु यथा प्रव
र्तन्ते॥ अयं लोहचुंबकैः स्वक्रांतसन्निधानेनापश्चलयति॥ तद्वदात्मस
न्निधानेन समस्तजगत् चलतीति श्रुतिस्मृत्यादीनां तात्पर्यमेवज्ञेयं॥
अनयास्तुत्यात्मनः निर्विकारत्वसिद्धिर्निरवद्या॥ कथं॥ आदित्यसन्नि
धानेन सर्वप्राणिनः व्यापारयंति चेदपि प्राणिनिष्ठविकाराः आदित्यसंय
यास्य प्रोक्तुः॥ अयस्क्रांतसान्निध्येनायश्चलति चेदपि अयोनिष्ठ
विकाराः अयस्क्रांतं न स्पृशंति॥ तद्वदात्मसन्निधानेन विचेष्टितज
गन्निष्ठविकाराः॥ आत्मानं न स्पृशंति तस्मादात्मनो निर्विकारत्वं सि
तः सिद्धं यत हि अस्य विचारस्य फलं किमित्युक्ते यथा देवादीनां ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृत्स्पंदनक्रियादेरधिकारिभिः क्रियमाणस्पंदनक्रीडाव्यापाराभि
मानेन तेषां नियंता स्वस्थः प्रभोऽहं द्वितीयघटिकायामेव स्पंदनक्री
डां कारितवानिति यथा प्रतीयते॥ तद्वत् रागद्वेषादिनिष्ठकारयितृत्वं
मध्यासेनात्मनिष्ठतया प्रतीयते॥ विचार्यमाणे त्वात्मनः कारयितृत्वं
नास्ति॥ तस्मादकारयिता निर्विकारात्माहमिति निश्चयः एवं विचा
रफलं॥ अस्मिन्नर्थे संशयलेशोऽपि सिद्धं॥ त्रिविधैरेव करणैः पु
ण्यं पापं च मिश्रकं॥ क्रियते न मया कर्मैवेवं बुद्धिर्विमुच्यते॥ १
रागाद्यैरेव निर्वर्त्यं प्रेरकत्वं न मे क्वचित्॥ इति यस्य दृढा बुद्धिः
स मुक्तः स च पंडितः॥ १२॥ इति श्रीमननग्रंथे कर्मव्यतिरिक्तात्मा
कर्तृत्वबोधकज्ञाननिरूपणं नाम पंचमवर्णकं समासं॥ ५॥ ५॥

श्च
नास्तीति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीलक्ष्मीनृसिंहायनमः॥रागाद्यैः श्रद्धयासुक्तो बद्धो मुक्तो भवेन्न
रः॥तद्रागादिकृतिविध्वंकेन स्यादितिचिंत्यते॥१॥यैः रागद्वेषादिभिः
प्रेरितानि त्रिविधकरणानि त्रिविधकर्म कुर्वंति ते रागद्वेषादयः क
तिविधाइति विचारयामः॥रागइति।द्वेषइति।कामइति।क्रोधइति।
लोभइति।मोहइति।मदइति।मात्सर्यइति।ईर्षेति।असूयेति।दंभ
इति।दर्पइति।अहंकारइति।इच्छेति।भक्तिरिति।श्रद्धेति षोडशावि
धाः॥तेषांभेदोपुच्यते।स्त्रीविषयतयाप्राप्तचित्तवृत्तिः रागइत्यु
च्यते॥एकेन अपकारे कृते तस्य प्रत्यपकारः कर्तव्यइति चित्तवृत्तिर्द्वे
षइत्युच्यते॥गृहआरामक्षेत्रधनधान्यादिकं संपादयामीति चित्त ८३
वृत्तिः॥कामइत्युच्यते॥स्वेन संपादितपदार्थानामन्येन विघ्ने का
रिते तस्मिन्न्यग्ररूपतया चित्तवृत्तिः क्रोधइत्युच्यते संपादितप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दार्थाः कस्मिन्न विविषयेन व्ययितव्या इति चित्तवृत्तिर्लोभ इत्युच्यते ॥ ऐश्व
र्यमदेन कुत्सा कुत्सयोरज्ञान चित्तवृत्तिर्मोह इत्युच्यते ॥ सर्वसंपत्सम्प
न्नोऽहं अभिकुलीनः जनवानस्मि कोन्योस्ति सदृशो मया पश्यत्वं ततेदेव
चलतीति चित्तवृत्तिर्मद इत्युच्यते ॥ स्वस्मात् अन्यस्मिन्नापि केनचिद्वर्त्त
मानेतस्योत्कर्षासहनरूपचित्तवृत्तिर्मात्सर्य इत्युच्यते ॥ परस्य दुःखं नो
सत्वं कथमिति चित्तवृत्तिरीर्ष्येत्युच्यते ॥ अस्माकं यथा सुखसंप्राप्तिः त
था परस्य सुखं आप्तुं नार्हतीति चित्तवृत्तिरसूया ॥ स्वकृतधर्मस्य
विज्ञातापयावहुमन्येरन्निति चित्तवृत्तिर्दंभ इत्युच्यते ॥ स्वयमेवाधि
कः अन्ये सर्वे मत्तुल्या न भवंतीति चित्तवृत्तिः दर्प इत्युच्यते ॥ अरे मूढ
मां न जानासि किं त्वं मां शिक्षितुं प्रवृत्तोसि अहं एतत्कार्यमारब्धवान्
तत्कार्यं विहाय न तिष्ठामीति चित्तवृत्तिः अहंकार इत्युच्यते ॥ अनि

५ मनुचोस
ने

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

वार्या: शौचादिक्रिया: कर्तव्या इति चित्तवृत्तिरिच्छा ॥ गुरुदेवतादिषु प्रीतिर्भ
क्ति: ॥ गुरुवेदांतवाक्ययागादिक्रियासु विश्वास: श्रद्धा ॥ एतै: प्रकारै रागा
द्वेषादीनां स्वरूपं निरूपितं ॥ एतद्विचारफलं रागाद्यहंकारपर्यंतं यत्नं
विना आगतानां त्रयोदशानां वशात: त्रिविधै: करणै: कर्म करोति चेत् तस्य
नरकान्निवृत्तिर्नास्ति ॥ तस्माद्रागाद्यहंकारपर्यंतं चित्तवृत्ती: परावर्त्य
सर्वप्रकारै: इच्छा श्रद्धा भक्तिरूपा: करोति चेत् क्रमेण क्षिप्रं संसारबंधा
न्मुच्यते ॥ तस्मात् इच्छा श्रद्धा भक्ती: संपादयेत् इच्छया कर्तुं शक्यां क्षुत्पिपासादि
निवृत्तिं मूत्रपुरीषविसर्जनं च न करोति चेत् ॥ तात्कालिक एव बाधां संप्राप्नोति ॥
८ना तां निकरोति चेत् ॥ तात्कालिकमेव साधनं भवति ॥ एतावन्मात्रेण स्वर्गनरक
प्राप्तिर्नास्तीत्येव गंतव्यं ॥ एते रागद्वेषादय: सुषुप्त्यवस्थायां लीनीभूतावस्था
वसंतीति यां समाध्यवस्थायां च नैकमपि नास्ति ॥ जाग्रत्स्वप्नयो: रागद्वेषादय: संती
२ ति कर्मास्ति ॥ तस्माद्रागद्वेषादय: संति चेत् कर्मास्ति नो चेत् नास्तीति अन्व

५ क्षमते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ दृश्यते वेत्फले

मनन ॥२९॥

यव्यतिरेकसिद्धं॥ एते रागद्वेषादयः केनेन भवंतीत्युक्ते अभिमानेन भवंतीतिब्रू
मः॥ सर्वेषामपि अभिमानपूर्वकं प्रवृत्तिर्दृश्यत एव॥ कथं॥ स्त्रीजनस्याहं स्त्री
ति अभिमानोत्पद्यते इति। तत्र रागादिपूर्वकं भर्तृशुश्रूषायां गृहसंरक्षणे पाका
दिक्रियायां च प्रवृत्तिर्दृश्यते॥ तथा पुरुषाणामपि अहं पुरुष इत्यभिमानोत्प
द्यते इति॥ तत्र रागादिपूर्वकं दारापरिग्रहे कृष्यादौ धनधान्यार्जने च प्रवृत्तिर्दृश्य
ते॥ तथा सर्वेषां जनानामपि वर्णाश्रमाद्यभिमानेन स्वस्वोचितव्यापारेषु राग
दिपूर्वकं प्रवृत्तिर्दृश्यते॥ तस्माद्रागादीनामभिमान एव कारणं॥ तर्हि एतद्वि
चारफलं किमित्युक्ते मुमुक्षुः सर्वेषु वस्तुषु रूढमभिमानं विहाय स्थितश्चे
त् दुःखान्मुक्तो भवति॥ तस्मादभिमाने सति रागादीनामुत्पत्तिः॥ तदभावे त
दभावः॥ यथा जाग्रत्सुषुप्त्योरन्वयव्यतिरेकौ सिद्धौ॥ तर्ह्ययमभिमानः केन
भवतीति चेत् अविवेकादि सर्वेहि॥ कथं॥ सर्वेपि पुरुषाः॥ वयं ब्राह्मणाः॥
वयं वैश्याः वयं क्षत्रियाः वयं शूद्रा इत्यादि अभिमानवंतः किल॥ अय

वर्णक वाक्य ॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ त्वेन पूर्वोक्तदोषप्राप्तेः

किमवलं

अभिमानः इदमेव अवलंबेवायातीति विवेकः केषामपि नास्तीति स एवाविवे
कः ॥ तर्हि अयमभिमानः ब्राह्मणत्वादि किमवलंब्यायातीत्युक्ते ॥ शरीरमवलंब्या
यातीति न हि ते शरीरं तु क्षत्रियादीनामपि साधारणमिति तेषामपि अहं ब्राह्म
ण इत्यभिमान आपद्येत ॥ तथा तु न दृष्टमिति ॥ ब्राह्मणत्वाद्यभिमानः शरीरम
वलंब्यायातीति न वक्तव्यं ॥ उत शिखायज्ञोपवीताद्यवलंब्यायातीत्युक्तेपि शि
खायज्ञोपवीतादि क्षत्रियादीनामपि साधारणमिति तेषामपि अहं ब्राह्मण इत्य
भिमान आपद्येत ॥ तथा न दृष्टमिति ब्राह्मणत्वाद्यभिमानः शिखायज्ञोपवीताद्य
वलंब्यायातीति न वक्तव्यं ॥ उत एकैकस्यावयवस्य ब्राह्मणत्वाद्यभिमान उच्यते
ति च ॥ तदवयवानां भिन्नाभिनामानि संतीति ॥ [illegible] अवयवाः इतरेषां कुलानामपि
३ म साधारणमिति तेष्ववयवानामपि ब्राह्मणत्वाद्यभिमान आपद्येत तथा न दृष्टं ना ४
तर्हि विशिष्टमातृपितृकुलजन्यत्वात्प्राप्तशरीरशिखायज्ञोपवीतादीन्यव
लंब्य ब्राह्मणत्वाद्यभिमान इति चेत् ॥ विशिष्टमातृपित्रादिभिः सत्कर्मशाली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥ ॥

मनरवदंतमल्लमूत्रादीनामपि ब्राह्मणत्वाद्यभिमान आपद्यते॥ तथा नह्यस्
ति खलु॥ केरपि कस्यचिदपि ब्राह्मणत्वादिनिर्वचनं कर्तुं न शक्यते॥ तर्हि
अयं ब्राह्मणत्वादिव्यवहारः कस्य इति चेत्॥ अभिमानमिति तु सव इति सं
घात इति च अनेकवस्तुसमूहस्य तत्तन्नामानि यथा आयांति॥ तदुक्तनि
र्वचनीये देहेंद्रियादिसंघातस्य व्यवहारे ब्राह्मण इति क्षत्रिय इति वैश्य
इति शूद्र इति स्त्रीति पुरुष इति शास्त्रीति देवदत्त इत्यादि समस्तनाम
नि देहेंद्रियादिसंघातं विषयीकुर्वंतीति॥ देहेंद्रियादिसंघातस्यैवा॥
त्मनः कालत्रयेपि एतानि नामानि न संतीति ज्ञानाभावः अविवेकः॥ ए
तेनाविवेकेनाभिमानः संपद्यते॥ एतद्विचारफलं किमिति चेत् आ
त्मनः कालत्रयेपि ब्राह्मणत्वादयो न संति॥ देहेंद्रियसंघातस्यै
व ब्राह्मणत्वादय इति ज्ञेयं॥ अयमविवेकः केन भवतीत्युक्ते

वर्णक
वाक्य

॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अज्ञानादिसर्वोच्यामः॥ तदज्ञानं कीदृशमित्युक्ते स्वरूपज्ञानमित्यवे
हि॥ स्वरूपाज्ञानं कीदृशमित्युक्ते ब्राह्मणक्षत्रियइतिवैश्यइत्यादिनाशरी
रमेवयमितिजानंति॥ नतुशरीरव्यतिरिक्तमात्मानंकेपिजानंति॥ एतदे
वस्वरूपाज्ञानं॥ तर्हिएतेशास्त्रज्ञाः शरीरव्यतिरिक्तमात्मानंजानंत्येव॥
कथमुच्यतेकेपिशरीरव्यतिरिक्तमात्मानंनजानंतीति॥ उच्यते॥ कर्ताभो
क्तापरिछिन्नश्चसन् लोकांतरगामीजीवोहमितिजानंति॥ नतुअकर्ता
अभोक्ताअपरिछिन्नश्चसन् असंगः असंसारीअद्वितीयः वेदांतवेद्यआ
त्माहमितिजानंति॥ एतादृशात्माज्ञानमेवअज्ञानं॥ अनेनाज्ञानेन अविवे
कः संपन्नः॥ इदमज्ञानंकेनहेतुनासंभवतीत्युक्ते अनादित्वात्‌ नकेनापिभ
वतीतिब्रूमः॥ कथं॥ अज्ञानस्वरूपंकीदृशमितिविचार्यमाणेज्ञानेनबाध्य
तइतिसद्रूपतयावक्तुंनशक्यते॥ अहमज्ञइत्यज्ञानानुभवात्‌ शशविषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिं
सहगंथ
॥२१॥

ध ध

णावद्दृष्टंतासद्विस्यपिवक्तुंनपार्यते॥विरुद्धकर्मीकोसासदसद्विस्यपिन॥साव
यवमित्युच्यमानेमूलकारणत्वंभज्येत॥निरवयवत्वेजगदाकारतयापरिण
मित्वंनस्यात्॥विरुद्धकर्मीकोसाउभयात्मकत्वमपिन॥एवंभिन्नमित्युक्तेऽद्व
द्वितीयत्वहानिःस्यात्॥इष्टापत्तौ॥तत्प्रतिपादकश्रुतिवैयर्थ्यात्॥किंच॥आ
त्मसत्तातिरिक्तसत्तायाऽभावात्॥आत्मनःभिन्नपदार्थस्यवक्तुमशक्यत्वात्॥
अभिन्नमित्युक्तेआत्मनःशक्तिर्नभवेत्॥इष्टापत्तौ॥तत्प्रतिपादकश्रुतेर्वैय
र्थ्यापातात्॥किंच॥मायायाअपिचेतनत्वंस्यात्॥अचेतनत्वंभज्येत॥आत्म
नःचेतनाचेतनत्वमापद्येत॥मायेत्यपिवक्तुमनस्यात्॥आत्मेत्येवंवक्तुमर्हत्त्व
त्॥ननुआत्मैवंवक्तव्यइतिचेत्॥अनात्मेतिमायेतिप्रकृतिरितिप्रधानमि
ति अविद्येति स्वाश्रयवर्तित्वेनपृथक्सत्ताप्रकाशशून्यत्वेनचमायेत्युच्यते॥
=यावत्कारणंकार्यंतिष्ठतितावत्प्रकृतिरव्याकृतमित्युते॥=विक्षेपमात्र
प्रगटीकरणेनशुद्धसत्वप्रधानमित्युच्यते॥=प्रलयइतिमहासुषु

वर्णक
वाक्य

॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९ सर्वात्मना शरीरपरिग्रहाभावे आत्यंतिक
दुःखनिवृत्तिः ॥ ३६ ॥ शरीरपरिग्रहः

सर्वात्मना कदा नस्यतीत्यकले ९

तिरितितैम इति अज्ञानमिति ॥ व्यवहारमात्रप्रगटीकरणत्वेन च बंधावभासस्या
पत्वेन वाऽविद्येत्युच्यते ॥ प्रकाशविरुद्धस्वभावत्वेन तम इत्युच्यते ॥ ज्ञाननि
वर्तकत्वेन आवरणविक्षेपशक्तिमत्वेन चाज्ञानमित्युच्यते ॥ चित्सरतंत्रत्वेन
वा चिद्व्यतिरिक्तालब्धस्वरूपसत्ताकत्वेन च चिच्छक्तिरित्युच्यते ॥ अनात्म
प्रतिपादकशब्दैरुच्यत इति आत्मेति वक्तुं न शक्यते ॥ तस्मान्माया आत्मनः अभिन्नेति व
क्तुं न शक्यते ॥ भिन्नाभिन्नमित्यपि न ॥ विरुद्धत्वात् तर्हि किंरूपं वक्तव्यमित्युक्ते अनिर्वच
नीयमेवेति वक्तव्यं ॥ इदमनिर्वचनीयमिति ॥ तेनाविवेकस्योत्पत्त्याभिमानसंभवे
न जनितरागद्वेषादिभिः संभूतकर्मणा संभूतशरीरपरिग्रहे पाविर्भूतदुःखस्व
स्य ॥ सर्वात्मना कर्माभाव इति ब्रूमः ॥ कर्माभावस्तु सर्वात्मना रागद्वेषाद्यभावे ॥ राग
द्वेषाद्यभावस्तु सर्वात्मना अभिमानाभावे ॥ अभिमानाभावस्तु सर्वात्मना विवेकाभा
वे ॥ अविवेकाभावस्तु सर्वात्मना अज्ञानाभावे ॥ अज्ञानं तु अद्वितीयब्रह्मात्मैक्या
परोक्षज्ञानेन निवर्तते ॥ कर्मणा अज्ञाननिवृत्तिर्न ॥ अज्ञानस्य कर्मणश्चाविरोधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥३२॥

वर्णकर्तृ
वाक्य

२८

भावात्॥ अज्ञानेन अस्य अधिकावृद्धिरेव॥ यथा अमावास्यायांतमसः अविरोधि
मेघावरणंतमोननिवर्तयतीति॥ अधिकमेवकरोति॥ तदंधकारस्यविरोधिना
सूर्यप्रकाशेनयथांधःकारनिवृत्तिः॥ तद्वद्ज्ञानविरोधिनाऽद्वितीयब्रह्मा
त्मैक्यापरोक्षज्ञानेनाज्ञाननिवृत्तिः॥ आत्मज्ञानोत्पत्तिस्तु आत्मविचारेणजाय
ते॥ कर्मोपासनयोगैर्ज्ञानंनोत्पद्यतेवेतिपृष्टे॥ ज्ञानस्यवस्तुतंत्रत्वात्पुरुषतं
त्रेणकर्मणाअंतःकरणशुद्धिमात्रमेवनतुज्ञानोत्पत्तिः॥ किंच॥ ज्ञानस्यप्रमाण
जन्यत्वात्मानसक्रियात्मकोपासनयाचित्तैकाग्र्यमेव॥ ज्ञानंनोत्पद्यते॥ यो
गस्यापिमानसक्रियात्मकत्वेनअणिमाद्यैश्वर्यसंपादनद्वाराज्ञानस्यज्ञान
मोक्षस्य फलीभूतत्वेतत्कल्पतायाअविघ्नएव॥ ज्ञानंनोदेति॥ तर्हिज्ञानोत्पादकंकिमि
तिचेत्॥ आत्मानात्मविचारादेव॥ यथागायत्रीशालिग्रामरत्नादीनांतत्वज्ञा
नेतत्तदुचितपरिक्षानिघर्षणविचारैरुत्पद्यते॥ स्नानध्यानप्राणायामादि
भिःयथानोत्पद्यते॥ तथाआत्मज्ञानंआत्मानात्मविचारेणैवोत्पद्यते॥

सेवा संध्या

॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मोपासनादिभिः नोपलभ्यते॥ तस्मान्मुमुक्षुभिः सर्वप्रयत्नैः आत्मानात्मवि
चार एव सर्वदाऽभ्यसनीयः॥ तथा सति संसारबंधात् शीघ्रमेव जीवन्मु
क्तिसुखं अनुभवतीति सिद्धांतः॥ दुःखहेतुश्च देहस्याद्देहहेतुश्च कर्म
तत्॥ कर्महेतुश्च रागादिर्मानो रागादि कारणं॥१॥ अविवेको मानहेतु
... ज्ञानं तस्य कारणं॥ ज्ञानान्न श्येत् द ज्ञानं तज्ज्ञानं सद्विचारतः॥२॥
अज्ञानबीजमविवेकमहांकुरो यो देहाभिमान विटपं बकुरागशाखं॥
कर्मप्रजस्तबकदेहफलानुमेयं ज्ञानासिनार्त्ति ... समेषु सुधीश्छिनत्ति॥३॥
इति श्रीमननग्रंथे सारनिरूपणं नाम षष्ठमवर्णकं समाप्तं॥६॥ श्रील
क्ष्मीनृसिंहार्पणमस्तु॥ श्रीरस्तु॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥
श्रीलक्ष्मीनृसिंहाय नमः॥ आत्मानात्मविवेकेन मुनिर्मुच्यति बंधनात्॥
कआत्मा को देहः को वानात्मा वेसत्र चिंत्यते॥१॥ आत्मानात्मविवेकेन ज्ञा

श्री ... (left margin, vertical): ३ ... मनन ... शाला ... ७ मे

उं कः (top right)

श्रीनृसिंह
मठग्रंथ

वर्णक
वाक्य

नोत्पत्तिःपूर्वमुक्ता॥ताद्यमात्मानात्मविचारं निरूपयामः॥आत्मातावत्शरी
रत्रयविलक्षणः॥अवस्थात्रयसाक्षीपंचकोशव्यतिरिक्तःसच्चिदानंदस्व
पः॥अनात्मानामसमष्टिव्यष्ट्यात्मकंशरीरत्रयं जाग्रदाद्यवस्थात्रयं॥पंचको
शाश्च॥तस्यलक्षणंतु अनृतजडदुःखात्मकं॥समष्टिव्यष्टिस्वरूपंकीदृश
मितिचेत्दृष्टांतपूर्वकमाह॥महाजनइतिवनमितिग्रामइत्यादिसमष्टिः॥
पुरुषः॥वृक्षः॥गृहमित्यादिव्यष्टिः॥एवंअनेकपदार्थानांसंमेलनेनव्य
वहारेसमष्टिः॥एकैकपदार्थस्यव्यवहारेव्यष्टिरितिबोध्यं॥तथासर्वेषां
प्राणिनांत्रिणिशरीराणिसमष्टिः॥एकैकस्यप्राणिनःएकैकंशरीरत्रयंव्य
ष्टिरिति ज्ञेयं॥एतच्छरीरत्रयेसर्वेषांप्राणिनांस्थूलशरीरंसमष्टिःस्थूल
शरीरं॥सर्वेषांप्राणिनांसूक्ष्मशरीरंसमष्टिःसूक्ष्मशरीरं॥सर्वेषांप्रा
णिनांकारणशरीरंसमष्टिकारणशरीरं॥एतत्समष्टिलक्षणं॥एकै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्यप्राणिनः स्थूलशरीरं व्यष्टिः स्थूलशरीरं ॥ एकैकस्यप्राणिनः सूक्ष्मशरीरं व्यष्टि
सूक्ष्मशरीरं ॥ एकैकस्यप्राणिनः कारणशरीरं व्यष्टि कारणशरीरं ॥ अनेनप्रका
रेणसमष्टिर्व्यष्टिश्च किमर्थमितिचेत् ॥ आत्मनोजीवत्वेश्वरत्वप्राप्तये ॥ ननुजी
६च वत्वमीश्वरत्वं समष्टिव्यष्ट्युपाधितः अनादित्वेन प्राप्तमिति न विद्मः ॥ कथं तर्हि
जानंतीत्युक्ते वास्तवमिति जानंति ॥ इति ज्ञाते दोषस्तु यावत्पर्यंतं वास्तवमित्युच्यं
ते तावत्पर्यंतं तेषां संसारान्निवृत्तिर्नास्ति ॥ तस्मात् सर्वप्रजामात्रभ्रांता प्र
तिः जीवत्वेश्वरत्वे उपाधिना प्राप्ते इति वक्तुं समष्टिव्यष्टी विभज्य वदति
तर्हि केनोपाधिना जीवत्वमीश्वरत्वं च प्राप्नोतीत्युक्ते समष्टिशरीरत्रयो
पाधिना ईश्वरत्वं व्यष्टिशरीरत्रयोपाधिना जीवत्वं ॥ एतादृशेश्वरत्वे सम
तथापि ष्टिकारणशरीरमेव मित्युक्ते नालं ॥ उपासनार्थं समष्टिस्थूलसूक्ष्मश
१० रीरयोरावश्यकत्वात् ॥ मुख्याधिकारिणः समष्टिकारणशरीरोपा
धिक आत्मा उपास्य अहमेवेश्वरोऽस्मीत्येतदुपासनया तत्प्राप्तिः फलं

२यधी

श्रीनृसिं
मननग्रंथ
॥२४॥

१ वा आत्मनः   २ विचारे

वर्णक ६
वाक्य

इत्युच्यते ॥ एतस्येश्वर इति अंतर्यामीति अव्याकृत इति नामत्रयं ॥ एतस्य
समष्टिकारणशरीरे अभिमानो अस्ति वा नास्ति ॥ इति चेत् ॥ अभिमान
स्य अहंकारधर्मत्वात् तस्यामवस्थायामभिमानाभावात् ॥ अभिमानः
कल्पयितुमशक्यः ॥ कथं तर्हि वक्तव्यं ॥ आत्मनः समष्टिकारणशरी
६ रो रविशिष्टमात्रत्वमीश्वरत्वमिति वक्तव्यं ॥ एतादृशेश्वरोपासनासमर्थी
नां अवस्थोत्तरीभूतसमष्टिसूक्ष्मशरीरोपाधिकईश्वर उपासितं अहमेव
वसंवर्गोस्मि हिरण्यगर्भोस्मीसेतदुपासनयातत्प्राप्तिः फलं इति श्रुतिर्व
दति ॥ एतस्येश्वरस्य हिरण्यगर्भ इति सूत्रात्मेति प्राण इति च नामत्रयं ॥ एत
स्य समष्टिसूक्ष्मशरीरे अभिमानो अस्ति वा नास्ति ॥ अभिमानस्य आश्र
यीभूतस्थूलशरीराभावेन कल्पयितुमशक्यत्वात् ॥ समष्टिसूक्ष्म
शरीरविशिष्टमात्रत्वमेव हिरण्यगर्भत्वमिति वक्तव्यं ॥ एतस्योपासना

॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्थानां अवस्थांतरीभूत समष्टिस्थूलशरीरोपाधिके श्वरोपासितव्य
= अहमेव वैश्वानरोस्मीसेतदुपासनयातस्याप्तिः फलं इति स्थितिर्वक्ति॥
एतस्य विराट् वैश्वानरः वैराज इति च नामत्रयं॥ रजोगुणप्रधानत्वात्॥
एतस्य समष्टिस्थूलशरीराभिसृष्टत्वाभिमानाभावात्॥ निखिलशरीरा
७ लं भावेन अभिमानस्य कल्पयितुमशक्यत्वात्॥ समष्टिस्थूलशरीरविशि
ष्टमात्रत्वमेवेश्वरत्वमिति निरवद्यं निर्दिष्टं॥ तादृशांतर्यामीश्वर एव सा
त्विकराजसतामसगुणानवैव्यस्त सृष्टिस्थितिसंहारकर्ता भूत्वा ब्रह्मेति वि
ष्णुरिति रुद्र इति च नामत्रयं दध्यौ॥ किंच॥ दुष्टनिग्रहशिष्टपालनापरा
मकृष्णाद्यवतारानप्यदाजग्राह॥ तदास्येश्वरस्य तत्तच्छरीरेस्वष्टत्वाभि
मानोऽस्तीति वक्तव्यं॥ न तर्हि जीवानामीश्वरस्य च वैलक्षण्यं कीदृशमि
त्युक्ते जीवानामहंताममपूर्वकं स्वस्वशरीरादौ अभिमानोस्ति॥ तस्माद्
न वक्तव्यं न हि सृष्टिस्थितिसंहारः कथं स्यात्
नी १

श्वरस्यतादृशाभिमानाभावात् ॥ लोकसंरक्षणार्थमेवबकृत्यत्वेन जीवेश्वरयो
र्वैलक्षण्यं सुवचं ॥ ईश्वरैएवप्रतिमादावुपास्योभूत्वासर्वलोकाननुजिघृक्ष
ति ॥ एवमुक्ते फलं तु ॥ विराडुपासनायामनधिकारिणः त्रिमूर्तीनांउपास
नां कुर्वंत्विति ॥ तस्यां त्रिमूर्त्युपासनायामनधिकारिणः ॥ रामकृष्णाद्यवता
रानुपासतामिति ॥ चेत्तेषामवताराणांउपासनेऽनधिकारिणः ॥ तत्तदवतार
सूचकातांम्रादिप्रतिमाउपासतामिति शास्त्रेणोच्यत इति ॥ सर्वेजनाः स्वेष्ट
मूर्तिरूपासते ॥ तत्तद्द्वारांतर्यामिमुपास्य एवेति ॥ एतत्प्रतिपादकशास्त्रस्य
किं तात्पर्यमिति चेत् अंतर्यामिस्वरूपं ज्ञेयमिति तात्पर्यं बोध्यं ॥ एवं समष्टिश
रीरत्रयोपाधिना आत्मनः ॥ ईश्वरत्वं आपातं ॥ व्यष्टिशरीरत्रयोपाधिना जीव
त्वमायातमिति ॥ जीवत्वस्य कथं शरीरत्रयापेक्षितत्वं चेत् ॥ अंतःकरणप्रति
बिंबत्वेन सूक्ष्मशरीरावश्यकत्वं ॥ स्थूलशरीरावश्यकत्वं च ॥ तदभावे जी
वत्वं नोदियात् ॥ कार्यभूत स्थूलसूक्ष्मशरीराणि कारणं विना न तिष्ठंती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिस्थूलसूक्ष्मयोः कारणशरीरावस्थ्यकत्वं ॥ एवं जीवत्वे शरीरत्रयावश्यं
भावात् ॥ एतस्य जीवस्य शरीरत्रये अभिमानावश्यंभावात् ॥ तर्हि इमे
जीवाः कियंत इति तेषां च नामानि कानीति पृष्टे निरूपयामः ॥ जाग्रद
वस्थायां व्यष्टिस्थूलशरीरे अभिमानी विश्वः व्यावहारिकः चिदा
भास इति संज्ञात्रय विशिष्टो जीवः स्वप्नावस्थायां व्यष्टिसूक्ष्मश
रीरे अभिमानी तैजसः प्रातिभासिकः ॥ स्वप्नकल्पित इति संज्ञा
त्रयभावितः जीवः ॥ सुषुप्त्यवस्थायां व्यष्टि कारणशरीरे अभि
मानी प्राज्ञः पारमार्थिकः ॥ अवच्छिन्न इति संज्ञात्रय विशिष्टो जीवः ॥
एवमात्मन एव समष्टिशरीरत्रयेण ईश्वरत्वं व्यष्टिशरीरत्रये
ण जीवत्वं बोध्यं ॥ यथा एकस्यापि देवदत्तस्य पुत्रापेक्षया पि

शि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
श्रीनृसिंह
मननग्रंथ
पं० ६९॥

शोध्यं

वणिके ७
वाक्य

त्वस्यैव पौत्रापेक्षया पितामहत्वं स्वपित्रपेक्षया पुत्रत्वं इत्यादि संज्ञाव्यपदे-
शः॥ तद्वदात्मनोपि व्यष्ट्युपाध्यपेक्षया जीवत्वं समष्ट्युपाध्यपेक्षया
ईश्वरत्वं॥ ननु पितृत्वादिधर्मेषु किंचिज्ज्ञत्वसर्वज्ञत्वाऽनुपलंभे-
न जीवत्वेश्वरत्वोपाध्योश्च तदुपलंभेन देवदत्तदृष्टांतो न संभ-
वतीति चेत्॥ एकस्यात्मनः उपाधिद्वयेन द्वयसंभवे देवदत्तदृष्टां-
तः संभवत्येव॥ इदानीं महदुपाधि किंचिदुपाधिभ्यां सर्वज्ञत्वं किंचि-
ज्ज्ञत्वं भिन्नस्य तदृष्टांतस्याफल्यार्थं जलदृष्टांतोप्युच्यते॥ एकस्यैव ज-
लस्य महोपाधिना तटाकेन अनेककेदाराः परिपक्वा भवंति॥ साम-
र्थ्यात्॥ अल्पोपाधिना घटादिना पानपाकादिमात्रेणाक्रियेवं
स्यात्॥ यथा वा अग्नेः स्थूलवर्तिकासमवधानेन दूरस्थप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्थप्रकाशकसामर्थ्यं ॥ सूक्ष्मवर्त्तिकासमवधानेनसन्निहितअल्पप
दार्थप्रकाशकसामर्थ्यं ॥ एवंजीवेश्वरत्वयोरपिबोध्यं ॥ वस्तुतस्त्वभे
दएवेतिश्रुतिषुनिर्णयः ॥ विरुद्धधर्मावच्छिन्नत्वाद्भेदः कथमितिचेत्तत्र
वीक्षदृष्टांतादवेहि ॥ तथाहि ॥ तटाकोपाधिस्थजलस्यघटोपाधिस्थ
जलस्यचविरुद्धोपाधिपरित्यागेनअविरुद्धजलस्यएकत्वं ॥ यथावासंमी
लवर्त्तिकासंमेवहिताग्नेः सूक्ष्मवर्त्तिकासमवहिताग्नेश्च विरुद्धोपाधिप
रित्यागेनअविरुद्धाग्निमात्रग्रहणं ॥ तद्वदात्मनोपिसर्वज्ञत्वादिवि
शिष्टेश्वरस्यकिंचिज्ञत्वादिविशिष्टजीवस्यचविरुद्धांशासर्वज्ञ
त्वकिंचिज्ञत्वपरित्यागेनअविरुद्धचैतन्यमात्रमेकमेवगम्यत
इतिसर्वशास्त्रनिर्णयः सोयंदेवदत्तइत्यादिदृष्टांतउक्तः महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥७॥

२ समष्टिव्यष्ट्युपाधिभ्यां जीवईश्वर इत्यपि ॥ भिन्नवज्ञातियः सोयं आत्माप्यन्यवस्तुतः
१ जहदजहल्लक्षणा नाम वाच्यार्थैकदेशं परित्यज्यैकदेशार्थवृत्तिः
वाक्यार्थः जहदजहल्लक्षणया निरूप्यः ॥ एवं विचार्याहमेवेश्वर इ
ति ज्ञानं यस्यास्ति स मुक्त इति वेदांतसिद्धांतः ॥ समष्टिव्यष्टिरूपोपः
स्तु जात्यादिलक्षणः ॥ जीवेशयोरुपाधिश्चानात्मा सम्यग्विवेचितः ॥
मयि जीवत्वमीशत्वं कल्पितं वस्तुतो नहि ॥ इति यस्तु विजानाति समु
क्तो नात्र संशयः ॥ १२ ॥ इति श्रीमननग्रंथे समष्टिव्यष्टिनिरूपणं नाम
समवर्णकं समाप्तं ॥ ७ ॥ श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥ छ ॥ छ ॥ छ
श्रीलक्ष्मीनृसिंह कर्त्ता समर्थ ॥ स्थूलं सूक्ष्मं कारणं वा शरीरं किं तदात्मनः ॥
विलक्षणत्वमेतेभ्यः किं वेसेतद्विचिंत्यते ॥ १ ॥ आत्मा शरीरत्रयविलक्ष
णाद्यत्युक्तः ॥ शरीरत्रयज्ञानं विना आत्मनः शरीरत्रयविलक्षणत्वे
ज्ञातुं न शक्यते ॥ इति हेतोः शरीरत्रयं निरूपयामः ॥ शरीरत्रयं

वर्णके
वाक्य
दवदन
इति व

॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चयंस्थूलसूक्ष्मकारणानि॥स्थूलंतावत्करचरणाद्यवयवाकारेण
संभवत्प्रतीयतेतत्स्थूलं॥सूक्ष्मशरीरंतुसप्तदशावयवोपेतं॥का
रणशरीरंतुअज्ञानं॥एतस्यशरीरमितिनामशीर्णत्वाद्देयंजीर्णं
सत्कथंप्रतीयतइतिचेत्प्रतीयतएव॥शरीरत्रयमध्येस्थूलंत्रिवि
धत्वेनजीर्यते॥कथं॥अन्नाभावेव्याध्यादिसद्भावेजरादिसद्भावे
चजीर्यते॥अन्नेसत्यपिव्याध्यादिनाजीर्णत्वं॥अन्नेसत्यपिव्याध्याद्य
भावेपिजरयाजीर्णता॥एवंसूक्ष्मशरीरस्यापि[illegible]देवृद्धिर्ज्ञेया॥रा
गादिपरिणाममानेवृद्धिः॥तत्संकोचेजीर्णता॥कारणशरीरस्या
पिअहंममाद्यभिमानाकारेणपरिणामोवृद्धिः॥तत्संकोचेजीर्णता॥
सूक्ष्मकारणशरीरयोःवृद्धिसंकोचौकस्मिन्दृश्यतेइतिचेत्अज्ञा
नीनिवृद्धिर्दृश्यते॥सुषुप्तौतुसंकोचोदृश्यते॥तस्मात्एतेषांशरी
रमितिनाम॥देहसमानत्वादिधर्मत्वेनदेहइतिनाम॥स्थूलशरी

जीर्णं
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मनन
॥३८॥

वर्णक
वाक्य

रं अग्निना दह्यते॥ कानि चित् न दह्यंत इति चेत्॥ सर्वं तातापत्रयादिना द
ह्यंत एव॥ सूक्ष्मकारणशरीरयोस्तु शीतानाग्निदह्यमानत्वात्॥ त्रयाणाम पि दे
ह इति नाम॥ पूर्वशरीरस्य सर्वं भवद्दृश्यमानत्वेन स्थौल्यप्रतीतेः॥ स्थूलमिति
नाम॥ मध्यमशरीरस्य पूर्ववत् प्रतीयमानत्वेन सूक्ष्ममिति नाम॥ लिंगशरी
रमित्यपि नाम लीन शब्दादि विषयाननुभासयतीति ज्ञेयं॥ पुनः पुनः लिं
ग्यते ज्ञायते गम्यते अनेन विषयजातमिति कार्यलक्षणत्वेन गम्यते ज्ञायते
स्वयं वा इति लिंगं॥ पश्चिमशरीरस्य कारणमिति नाम पूर्वोक्तशरीरद्वयस्य
जनकत्वेनेति ज्ञेयं॥ तर्हि स्थूलशरीरं प्रत्यक्षतया दृश्यमिति स्थूलशरीरं
वर्तत इति वक्तव्यं॥ एवं सूक्ष्मशरीरमपि प्रत्यक्षतया न दृश्यत इति स्थूलव्यति
रिक्तं तया वर्तत इति कथं ज्ञेयं॥ सप्तदशावयवैः कार्यैः सूक्ष्ममस्तीति बोध्यं॥ एता
नि सप्तदशावयवकार्याणि स्थूलशरीरेण ज्ञातुं कुतो न शक्यत इति चेत्॥ सुषु
प्ति मरणमूर्छावस्थासु स्थूलस्य विद्यमानत्वेन तत्कार्यप्रतीत्यापत्तेः॥ न तथा तु
न दृश्यते॥ तस्मात् स्थूलशरीरकार्याणि न स्थूलशरीरव्यतिरिक्त सूक्ष्मका
तत्सदशाकार्याणि स्थूलेनैव भवंतिचेत्

शरीर ७
वक्तव्यं ८
सूक्ष्म ८

॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्याणीति वक्तव्यं ॥ तर्हि सूक्ष्मशरीरं स्थूलं विहाय स्वातंत्र्येण किमपि कार्यं न जनय
तीति सूक्ष्मशरीरस्य कार्यं कथमिति चेत् दृष्टांतपूर्वकं निरूपयामः ॥ अग्निः का
ष्ठादिकमाश्रित्य दाहपाकादिक्रियाः करोति चेदपि दहनादिक्रिया ॥ काष्ठादिक्रिया ॥ यथा न
भवति काष्ठव्यतिरिक्तस्याग्नेरेव क्रिया यथा ॥ तद्वत् सूक्ष्मशरीरं स्थूलमाश्रित्य सप्तदशा
वयवकार्यं जनयति चेदपि केवलस्थूलशरीरस्य कार्यं न भवति ॥ सप्तदशावयवकार्यं स्थू
लव्यतिरिक्तस्येति ज्ञेयं ॥ एतानि सप्तदशावयवकार्याणि कानि इति चेत् कारणपूर्वकं निरू
प्यंते ॥ सप्तदशावयवात्मकं सूक्ष्मशरीरं कारणं ॥ के ते सप्तदशावयवा इति चे
त् ॥ ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पंच प्राणाः पंच ॥ चित्तसंयुक्तं मनः अहंकार वायवः
युक्ता बुद्धिश्चेति सप्तदशावयवाः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि ज्ञानेंद्रिया
णि ॥ शब्दादिविषयज्ञानजनकत्वात् ॥ एतेषां ज्ञानजनकत्वं कथमिति चेत्
सत्वांशाज्जन्यत्वात् ॥ वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि वचनादि
क्रियाजनकत्वात् ॥ एतेषां क्रियाजनकत्वं कथमिति चेत् ॥ रजोंशात्समुद्भू

[illegible] मानेंद्रियसं २॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥३६॥

वर्णकृत्
वाक्य

तेन श्रोत्रेंद्रियमिति ज्ञेयं ॥ १ एषां प्राणानामुक्तिं निमित्तं

तत्सात् ॥ प्राणापानव्यानोदानसमानाः पंचवायवः ॥ स्थूलशरीरं जीवयित्वा
वर्तमानत्वात् ॥ तेषां प्राणादि नाम ॥ मनो बुद्ध्योः ॥ अंतःकरणविशेषत्वं ॥ एते लिं
गशरीरस्य सप्तदशावयवाः ॥ एतेषां कार्याणामुत्पत्तिः ॥ शब्दजातग्राहक
त्वेन श्रोत्रेंद्रियं ॥ लौकिकवैदिकभेदेन शब्दानां द्वैविध्यं प्राकृतरूपाः अष्टा
दश भाषाः लौकिकाः ॥ संस्कृतरूपाणि वेदशास्त्राणि वैदिकाः ॥ तादृशलौ
किकवैदिकाः अनंताः सर्वे शब्दाः श्रोत्रेणैव गृह्यंते ॥ तत्र कर्णशष्कुल्य
वच्छिन्ननभोदेशमाश्रित्य विद्यमानं श्रोत्रेंद्रियं ॥ कर्णशष्कुल्यवच्छिन्ननु
भस एव श्रोत्रत्वेसुसमुत्पन्नमूर्च्छितशरीरेष्वपि तत्सत्त्वात् शब्दग्रहणापत्तेः ॥
तस्मात्तस्य दिक् अधिष्ठानदेवता तया प्रेरितं सत् शब्दमात्रं गृह्णाति ॥
एवं त्वगिंद्रियमपि शीतोष्णमृदुकठिनभेदेन पंचविधस्पर्श
ग्राहकं ॥ सर्वदेहव्यापित्वं त्वगिंद्रियमित्युक्ते पूर्ववत् सुप्तादिशरी
राश्रित्य वर्तते वैं १ स्फ १

॥३६॥

३ द्रियम

रीरेष्वपिसर्वदेहव्यापित्वात्स्पर्शग्रहणापत्तेः॥तस्मात्सर्वदेहव्यापित्वं च मा
श्रित्यस्पर्शग्रहणशक्तिमत्सूक्ष्मं वर्त्तत इति ज्ञेयं॥तस्य वायुरधिष्ठानदे
वता तया प्रेरितं सत् अनंतस्पर्शग्राहकं॥एवं चक्षुरपि एकविषयमेव अ ५
नंतविषयशुक्लनीलादि ह्रस्वदीर्घत्वादिग्राहकं रूपाद्युपलब्धिसाधन द्रियमि
५ खं त्वात्॥इदं चक्षुरिंद्रियं कृष्णतारावर्त्ति॥कृष्णतारे च चक्षुरिंद्रियमुक्ते पूर्ववत् ॥२५
तू॥सुसत्वादिशरीरेष्वपि तत्सत्वे रूपग्रहणापत्तेः तस्मात् कृष्णताराति
रिक्तं रूपादिग्रहणशक्तिमत् सूक्ष्मं वर्त्तत इति अंगीकर्त्तव्यं॥तस्य सू
८ स्थान र्योधिदेवता तया प्रेरितं सत् रूपादिग्राहकं भवतीति चक्षुरिति नाम॥एवं
रसनेंद्रियमपि एकमेव मधुराम्लादिभेदभिन्नत्वेन अनंतरसग्राह
कं जिह्वाग्रवर्त्ति जिह्वाग्रमेव जिह्वेंद्रियमित्युक्ते पूर्ववदेव सुप्तादिश
रीरेषु तत्सत्वे रसग्रहणापत्तेः॥तस्मात् जिह्वाग्रव्यतिरिक्तं रसग्रहणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥५४०॥

वर्णक
पाक्य

पतिः॥ तस्मात् जिह्वाग्रव्यतिरिक्तं रसग्रहणशक्तिमत् सूक्ष्मं अन्यदेवेन्द्रियमभ्युपेयं॥ तस्य
वरुणोधिदेवता तया प्रेरितं सत् सर्वरसान् गृह्णातीति॥ एवं घ्राणेंद्रियमपि एकमेव सुगं
धदुर्गंधमिश्रगंधादिभेदभिन्नत्वेनानंतविधगंधग्राहकं नासाग्रवर्ति॥ नासाग्रमे
व घ्राणेंद्रियमित्युक्ते पूर्ववदेव सुप्तादिशरीरेषु तत्सत्वे [illegible] गंधग्रहणापत्त्या लब्धातिरि
क्तं गंधग्रहणशक्तिमत् सर्वगंधग्राहकं घ्राणेंद्रियं॥ तस्य अश्विनौ अधिष्ठानदेवता
तया प्रेरितं सत् गंधादिकं गृह्णातीति॥ तत्र हिताहितप्राप्तिपरिहाररूपचेष्टाश्र
यस्य शरीरत्वनिर्वचनात् सुप्तादिशरीराणां तदसत्वेन शरीरलक्षणलक्षिताभावात् म
शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं सामा
न्यलक्षणलक्षित चक्षुरादीनां॥ पूर्वोक्तलक्षणांगिकारेपि दोषाभावः॥ कर्मेंद्रियेषु वा
गिंद्रियं किमिति चेत् अष्टदशभाषारूपभेदभिन्नलौकिक [illegible] वेदशास्त्ररूपसंस्कृ
तवैदिकशब्दभेदभिन्नानंतशब्दोच्चारणं येनोच्चार्यते तत् वागिंद्रियं॥ रसनातालुमू
लउरोष्ठाधरोष्ठदंतकंठहृदयब्रह्मरंध्ररूपाष्टस्थानाश्रयं॥ अष्टस्थानान्येव वा
गिंद्रियमित्युक्ते सुप्तादिशरीरेषु आश्रयाणां सत्वात् शब्दोच्चारणप्रसंगात्॥ ॥५४०॥
तद्व्यतिरिक्तं उच्चारणशक्तिमत् सूक्ष्मं अधिष्ठानदेवतारूपाग्निप्रेरितं अ

३ न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्षुस्थानाश्रयं वागिंद्रियं ॥ एवं पाण्यिंद्रियं करतलाश्रयं सत् हानोपादानादि क्रियाकारकं ॥
करतलमेव पाणींद्रियमित्युक्ते ॥ सुप्तादि शरीरेष्वपि तत्सत्वे न तत्रापि हानादिक्रि
याग्रहणापत्तात व्यतिरिक्तं हानादिग्रहणाशक्तिमत् सूक्ष्मम धिष्ठानदेव
ताप्रेरितं सत् करतलाश्रयं पाण्यिंद्रियं हानादिक्रियाकारकमभ्युपेयं ॥ एवं
पादेंद्रियं पादतलवर्ति गमनादि क्रियाकारकं ॥ पादतलमेव पादेंद्रियमि
त्युक्ते पूर्वोक्त दोषापत्तात तद्व्यतिरिक्तं गमनादि क्रियाशक्तिमत् सूक्ष्मम
धिष्ठानदेवतारूपोपेंद्रप्रेरितं सत् पादतलाश्रयं पादेंद्रियं गमनादि क्रियां
करोति ॥ एवं पायुरिंद्रियं गुदाश्रयं पुरीष विसर्जनादि क्रियाशक्तिमत्
सूक्ष्मं अधिष्ठानदेवतारूपमृत्युप्रेरितं सत् गुदाश्रयं पायुरिंद्रियं ॥ वि
सर्जनादि करोतीत्यभ्युपेयं ॥ एवमुपस्थेंद्रियमपि योनिलिंगाश्रयं शुक्र
मूत्र विसर्जनादि क्रियाहेतुः ॥ योनिलिंगे उपस्थेंद्रियमित्युक्ते पूर्वोक्तदो
षापातात् तद्व्यतिरिक्तमेव शुक्रादि विसर्जनाक्रियाशक्तिमत् सूक्ष्मम

८ रूपेंद्र

न

मान्टासह
मननग्रंथ
पा०४९॥

वर्णक ८
वाक्य

धिष्ठानदेवतारूपप्रजापतिप्रेरितं सत् रूयोनिलिंगाश्रयं उपस्थेंद्रियं स्तु क्रादि
३ वि विसर्जनं करोतीत्यभ्युपेयं ॥ पंचवायुष्वपि प्राणवायुः हृदयस्थः अधिष्ठा
नदेवतारूपविरिंचिप्रेरितः सन् उच्छ्वासादिकर्मकर्त्ता ॥ अपानो गुदस्थानः अ
धिष्ठानदेवतारूपविश्वकर्त्तृप्रेरितः निश्वासादिकर्मकर्त्ता ॥ व्यानवायुः सर्वश
रीरं व्याप्य अधिष्ठानदेवताविश्वयोनिप्रेरितः सन् इंद्रियाणां बलदाढ्यं
पूर्वकं शरीरधारकः ॥ उदानोपि कंठस्थः अधिष्ठानदेवतारूपाजप्रेरितः
सन् सुषुप्तिकाले सर्वेंद्रियोपसंहारणपूर्वकं ॥ स्वकारणाज्ञाने लयीभूय ॥
जागृतिकाले तत्तदिंद्रियाणि तत्तद्गोलकेषु संस्थापनपूर्वकं उत्क्रमण
काले सर्वेंद्रियसंग्रहपूर्वकं लोकांतरगामी ॥ समानश्चनाभिस्थानः अ
धिष्ठानदेवतारूपजयप्रेरितः ॥ जठराग्निसहितः भक्ष्यभोज्यलेह्यचोष्यादि
चतुर्विधान्नपरिपाककर्त्ता सर्वशरीरव्यापि शारीरपुष्टिकर्त्ता ॥ प्राणोपानस्समा
२ दा नश्चोदानोव्यानौ च वायवः ॥ हृदि प्राणो गुदेपानः समानो नाभिसंस्थितः ॥ १ ॥
उदानः कंठदेशस्थो व्यानः सर्वशरीरगः इति वृद्धसमस्याप्राणादीनां तत्त्व

पा०४९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थान[illegible] निर्णयः॥ ननु श्रुतिषु दशवायव इत्युक्तत्वात्॥ कथं पंच
वोक्तिरिति चेत् पंचस्वेव [illegible]नामंतर्भावात्॥ तथापि पार्थक्येन निरू
पयामः॥ नागकूर्मकृकलदेवदत्तधनंजयभेदेन पंचधा तत्र नागः॥
वमनप्रेरकः कूर्मः ओष्ठयोर्नेत्रयोश्च उन्मीलननिमीलनहेतुः
कृकलः क्षुतहेतुः देवदत्तो विजृंभणहेतुः धनंजयः शरीरपोषकः
तत्र प्राणादिष्वेव नागादीनामंतर्भावात् तत्स्थानान्येव बोध्यानि
तेषां देवता एव तेषां देवताः॥ अंतःकरणचतुष्टये पुंगलांतं वर्तमानं ३७
मनः अधिष्ठानदेवतारूपचंद्रप्रेरितं सत् संकल्पादिकं करोति बुद्धिस्तु
मुखस्थाने अधिष्ठानदेवतारूपचतुर्मुखप्रेरितं सती निश्चयं करो
ति॥ अहंकारस्तु हृदयस्थः अधिष्ठानदेवतारूपरुद्रप्रेरितं सत् अ
भिमानं करोति॥ चित्तं तु नाभिस्थं अधिष्ठानदेवतारूपईश्वरप्रेरितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत् धारणं करोति ॥ एतत् लिंगशरीरं षोडशात्मकमिति कस्तु चित् श्रुति
षु ॥ तस्मिन् पक्षे मनश्चित्तं बुद्धिरहंकार इत्युपाधि भेद भिन्नमेकमे
वांतःकरणं ॥ सप्तदशाकं लिंगमिति कास्तु चित् श्रुतिषु तस्मिन्
पक्षे मनश्चित्तं चैकं बुद्धिरहंकार इत्येकं ॥ नवदशाकं लिंगमिति
पक्षे मनो बुध्यहंकार चित्तानि चत्वारि ॥ यथा कथंचिदुक्तेपिन
विरोधः सप्तदशप्रकारचिन्हितं लिंगशरीरमेकमस्तीति नि
श्चयः ॥ कारणशरीरमेकमस्तीति कथं ज्ञेयमिति चेत् शरीरद्वयस्य
४ न कार्यत्वे प्रतिभानात् ॥ एतस्य कारणमस्तीत्यं कार्यरूपानुमानात् धूमे
नवह्न्यनुमानवत् ॥ स्थूलसूक्ष्मशरीरद्वयरूपकार्यरूपकारणशरी
रमप्येकमस्त्येव ॥ किंच अहं अज्ञ इत्यज्ञानानुभवः प्रत्यक्षत्वेनानुभूय
ते ॥ अनेन प्रकारेण शरीरत्रयं निर्णितं ॥ अतः परं आत्मनः शरीरत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्विलक्षणत्वं प्रतिपाद्यते॥ आत्मनि शरीरत्रयविलक्षणभाव एव शरीरत्र
यवैलक्षण्यं॥ तर्ह्यात्मनो लक्षणं किमिति चेत् सच्चिदानंदरूपत्वं अनात्म
नस्तु अनृतजडदुःखात्मकत्वं एवं लक्षणे क्रियमाणे अन्योन्यवैलक्षण्यं
सुगमं॥ यथा पुरुषलक्षणं स्त्रियां नास्ति॥ स्त्रीलक्षणं पुरुषे नास्ति तद्व
त् सल्लक्षणं असति नास्ति असल्लक्षणं सति नास्ति यथा वा प्रकाशलक्षणं
अंधकारे नास्ति अंधकारलक्षणं प्रकाशे नास्ति॥ तद्वज्जडलक्षणं चि
ति नास्ति चिल्लक्षणं जडे नास्ति॥ चंद्रिकालक्षणं आतपे नास्ति आत
पलक्षणं चंद्रिकायां नास्ति॥ तद्वत् आनंदलक्षणं दुःखे नास्ति अनेन
प्रकारेण सच्चिदानंदलक्षणं अनृतजडदुःखादीनां च नास्तीति अन्यो
न्यविलक्षणत्वं सुप्रसिद्धं॥ सदसतोः चिज्जडयोः आनंददुःखयोः अ
लक्षणानि वैलक्षण्येन ज्ञेयानि तत्र सतो लक्षणं एकं चेतनं कालत्रये
प्यबाध्यं एकरूपेण वर्तमानं॥ असल्लक्षणं तु कालत्रयेप्यविद्यमान

दुःखलक्षणं आनंदे नास्ति॥

५स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेवं प्रतीयते ॥ एकं अचेतनं बाध्यं यथा रज्जुः कालत्रये बाध्यत्वे ऐक्ये रूपा ॥ तस्मां
रज्जौ आरोप्य वर्तमानसर्पस्तु अविद्यमान एव प्रतीयते ॥ सर्पमालादौ
एकेनाप्यचेतनेन ॥ एकं चेतनं रज्जुबाधनं विनैव भ्रांतिकाले प्रतीयते ॥
भ्रांतेः पूर्वकाले भ्रांत्युत्[illegible]तरं च अविद्यमानोऽपि प्रतीयत इति एकं चे
५म तनं बाध्यमिति च हेतोः ॥ आरोप्यमाणसर्पस्य सल्लक्षणमस्तीति वेदित
व्यं ॥ रज्जुलक्षणं सर्पे नास्ति सर्पलक्षणं रज्जौ नास्तीति रज्जुसर्पयोः ॥
शब्देन अर्थेन लक्षणेन प्रतीत्या व्यवहारेण च यथा वैलक्षण्यं तथा सल्ल
क्षणं असति प्रपंचे नास्ति असल्लक्षणं सद्रूपे आत्मनि नास्तीति सदसतोः
शब्देन अर्थेन लक्षणेन प्रतीत्या व्यवहारेण च वैलक्षण्यमस्त्येव ॥ एताव
ता फलसिद्धिस्तु सद्रूपः ॥ शब्दः असद्रूपः शब्दो न भवति ॥ असद्रूपः श
ब्दः सद्रूपः शब्दो न भवति सत्पदार्थः ॥ असत्पदार्थो न भवति ॥ अस
त्पदार्थः असत्पदार्थो न भवति ॥ असल्लक्षणं सल्लक्षणं न भवति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ती

सल्लक्षणंअसल्लक्षणंनभवति॥सत्प्रतीतिरसत्प्रतीतिर्नभवति॥सद्व्यवहारःअसद्व्यव
हारोनभवति असद्व्यवहारश्चसद्व्यवहारोनभवति॥तस्मात्सद्रूपस्यात्मनःअस
द्रूपस्यदेह[illegible]रज्जुसर्पन्यायेनकालत्रयेपिअन्योन्यवैलक्षण्यंसिद्धं॥अतःपरंचि
ज्जडयोर्लक्षणमुच्यते॥चित्तोलक्षणंतुसाधनांतरंअनपेक्ष्यस्वस्यप्रतीतिःस्वस्मि
न्नारोपितसर्वपदार्थावभासकताच॥जडलक्षणंतुस्वयमपिनप्रकाशते अन्यदपि
नप्रकाशयति॥यथाआदित्यःस्वेनभास्यमानंघटादिकमपिप्रकाशयतिस्वात्मा
नमपितिदृष्टांतस्यएकदेशत्वात्एकदेशोदृष्टांतेआदित्येचिल्लक्षणसंभवः॥त
थाहिआदित्यःसाधनांतरानपेक्षतयास्वप्रकाशयति स्वप्रकाशयति स्वप्रका
शसंबंधिघटादीनपिप्रकाशयतीतिचिल्लक्षणसंभवः॥तर्हिघटे अपिचिल्लक्षण
मपिवाच्यतामित्युक्तेघटस्यजडतयास्वात्मप्रकाशकत्वमपिनास्तिइतरप्रका
शकत्वमपिसुतरांनास्ति॥तस्मादादित्यलक्षणंघटेनास्ति घटलक्षणंआदि
त्येनास्ति॥तस्मादादित्यस्यघटस्यचशब्देनअर्थेनलक्षणेनप्रतीत्याव्यवहारे

३ वाच्यताँ

७४ ननु दृष्टांतभूते आदित्ये चिल्लक्षणं कथं संभवतीति चेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ चिद्रूपे आत्मनि नास्ति॥ तस्मात् चिज्जड्योः शब्देन अर्थेन लक्षणे

ण चयथावैलक्षण्यं तद्वत् चिल्लक्षणं जडीभूतदेहादिप्रपंचेनास्तीत्याद्यशो
देहादिप्रपंचलक्षणेन प्रतीत्याव्यवहारेण च वैलक्षण्यप्रसिद्धं॥ अनेनफ
लसिद्धिस्तु अप्रकाश निष्ठविकारैः॥ प्रकाशस्वरूपवस्तुनः कालत्रये
पि संबंधो नास्तीति सिद्धं॥ कथं अप्रकाश घटादिनिष्ठ छिद्रत्वाछिद्रत्वादि
विकारैः प्राप्तहानिलाभादयः स्पष्टिमत्वादिविकारैः प्राप्तप्रत्यवायाभ्युदया
दयश्च श्लक्ष्णत्वादिभिः प्राप्तहर्षविषादयश्च समीचीनत्वादिभिः प्राप्ताति
शयत्वानतिशयादयत्वादयश्च प्रकाशैकस्वरूपमादिसंयथानस्पृशे
युः॥ तद्वत् अप्रकाशनिष्ठदेहादिविकाराः गुणाश्च धर्माश्च जातिनामा
दयश्च वर्णाश्रमादि क्रियाश्च कर्तृत्वभोक्तृत्वादयश्च कामक्रोधादयश्च
देहेन्द्रियादयश्च साक्षिणं चिद्रूपं आत्मानं न स्पृशंतीति सिद्धं॥ आनंद
रूपः स्वरूपचलक्षणं तु निरुपाधिकं निरतिशयनिसस्तु स्वस्वरूपत्वं
आनंदलक्षणं तु आतपेन प्रतीयमानः पुरुषः दृश्यमानः तादृशशीत

१ तापत्रयात्मकं दुःखलक्षणं यथानूतनघटे शीतलजलं कोष्ण घटे तिं त्रि
ण्यंगाराश्च तज्जले आनंदलक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लभांडस्थस्यनेत्रयोः लापनमात्रेणाहस्य तापनिवृत्तिः साक्षाज्जलं तु
नेभवति जलस्य आवेशमात्रं ॥ एतज्जलावेशस्यतापनिवर्त्तकत्वं प्रसक्ष्ण
तया दृश्यते ॥ तज्जलं प्राप्यानेन तु सकलतापनिवृत्तिरिति सर्वानुभवसि
द्धत्वात् तज्जले आनंदलक्षणमस्ति ॥ तर्हि तिं जिण्यंगारेषु दुःखलक्षणं
वाच्यतामित्युक्ते राह तापादिरहितपुरुषस्य प्रतिं जिण्यंगारयुक्तकांश
पात्रस्पर्शनेन तप्तांड निष्ठांगारावेशमात्रेण दाहतापादिसंभुवात्तस्य
७शे वस्य हस्तस्पर्शस्फोटोत्पत्तिः ॥ साक्षादंगारस्तु नभवति अंगारावेशमा
त्रस्य दुःखजनकत्वं प्रसक्ष्णतया दृश्यते अंगारा [illegible]स्तु समस्तप्राणिनः ॥
भस्मयंतीति दुःखजनकत्वं सर्वानुभवसिद्धत्वात् अंगारेषु दुःखलक्ष
णासंभवः दृष्टांतांतरमपि अमृतं कालकूटविषं [illegible] यतस्मिन्नमृते
आनंदलक्षणं तु वर्त्तते अमृतं तावत् स्वतः सुखं स्वरूपं सत् स्वस्य
पानं कुर्वतां निरतिशयसुखजनकत्वात् अमृते आनंदलक्षणमस्ति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रन्थसिंह
मननग्रंथ
॥४५॥

वर्णक ८
वाक्य

तर्हि कालकूटे दुःखलक्षणं वाच्यतामित्युक्ते कालकूटविषं ताबलस्वतो दुः
खस्वरूपं सत्स्वस्य समीपमात्रवर्त्तिनां दुःखरूपप्राणहान्यादिकरणेन का
लकूटे दुःखलक्षणसंभवः॥ अमृतलक्षणं कालकूटे नास्ति कालकूटलक्ष
णं अमृते नास्ति अमृतकालकूटयोः शब्देन अर्थेन लक्षणेन प्रतीत्या व्यवहा
रेण च अन्योन्यवैलक्षण्यं यथास्ति जललक्षणं अग्नौ नास्ति अग्निलक्ष
णं जले नास्तीति जलस्य अग्नेश्च शब्देन अर्थेन लक्षणेन प्रतीत्या व्यवहा
रेण च अन्योन्यवैलक्षण्यं यथा॥ तथा आनंदलक्षणं दुःखात्मके देहे प्रि
यादौ नास्ति देहे प्रियादिलक्षणं सुखस्वरूपे आत्मनि नास्तीति आनंद
दुःखयोः शब्देन अर्थेन लक्षणेन प्रतीत्या व्यवहारेण अन्योन्यवैलक्षण्य
मस्ति॥ एतेन फलसिद्धिस्तु कालकूटविषनिष्ठतापादयः॥ तदमृतं य
था न स्पृशेयुः॥ अग्निनिष्ठतापादयः सुखस्वरूपमात्मानं न स्पृशं
तीति सिद्धं॥ तर्ह्यस्य विचारस्य फलं तु रज्जौ वस्तु सद्रूपः आदिसवद

२ जलं न स्पृशंति तथा देहे प्रियादिप्रपंचनिष्ठतापत्रयं ॥४५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिद्रूपः जलाम्रुतवत् आनंदरूप आत्मा॥ सर्पवत् अनृतरूपः घटवत् जडरू
पः अग्नि कालकूट विषवत् दुःखरूपः देहेंद्रियप्रपंच इति तस्मात् देहेंद्रियादि
प्रपंचात्॥ आत्मा विलक्षण इति ज्ञानं एतद्विचारफलं॥ एवं यः ज्ञानवान् स यः३
तत्त्वमुक्त इति वेदांतसिद्धांतः॥ अनेकावयवस्थूल शुक्ल शोणितसंभवः देहः
सूक्ष्मस्तथा सप्तदशावयवलक्षणः॥१॥ कारणं चाज्ञानसंज्ञोनृतदुःखा
त्मकोऽभूमी॥ एभ्यो विलक्षणस्त्वात्मा सत्सज्ञानादिलक्षणः॥२॥ आत्मलक्ष
णा सत्सादिस्तथा भिन्नो नृतादिकं॥ पीयूषविषवभ्रान्तु भांडवद्रज्जुसर्प
घि वत्॥३॥ इति यस्तु विच्येवं विजानाति स पुनः पुनः॥ स संसाराद्विमुक्त
स्यान्नान्यथा कर्मकोटिभिः॥४॥८॥ इति अष्टमवर्णक समास॥
श्री लक्ष्मीनृसिंह जय लक्ष्मीनृसिंह जय जय लक्ष्मीनृसिंह॥ छ॥
॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीलक्ष्मीनृसिंह
मननग्रंथ
॥ ५६ ॥

सुषुप्त्यवस्था। जाग्रदवस्था मनोरिंद्रिये र्बाह्यार्थज्ञानं यावत्सयं तन्मुदेतिसाव स्था

॥ श्रीगणेशाय नमः॥ अथ नवमवर्णकं॥ अवस्थात्रयसाक्षी॥ जाग्रत्स्वप्नसुषु
प्त्याख्यास्त्ववस्थाः काः किमात्मनः॥ साक्षित्वमेषामिसेतत्तत्सदृष्टांतं विचार्य
ते॥ १॥ आत्मनः अवस्थात्रसाक्षित्वं श्रुतिषूच्यते अवस्थात्रयज्ञानं वि अ
वस्थात्रयसाक्षित्वं ज्ञातुं न शक्यत इति प्रथमं अवस्थात्रयं निरूपयामः॥
जाग्रदवस्था॥ स्वप्नावस्था तु इंद्रियैर्बाह्यार्थज्ञानं विनाम नसैव विषयाका
रेणपरिणाम्य कर्म्यां याकारेणा यावत्सर्वं तत्प्रतीयते तावत्सर्यं तं स्वप्नावस्था॥
सुषुप्त्यवस्था तु इंद्रियैर्बाह्यार्थज्ञानं विनाम न सा क र्व्यायारेणापरिणाम्य न
विषयाद्याकारेणप्रतीति विनाकारणात्मना बुद्धियावत्सर्यंतं तितावत्सर्यंतं सु
षुप्त्यवस्था॥ चे दवस्थात्रयेण मिलित्वा नामिलित्वा च स्थिता अवस्थात्र
यं अवस्थात्रयव्यापारं च अवस्था वर्ते च जानाति चेत् तत्साक्षित्वं॥ एतत्साक्षि
त्वस्य कृयंति विशेषणानि स्याकांक्षापादृष्टांतः उत्तमर्णो अधमर्णमिया दत्तं
एतदवस्थात्रयसाक्षित्वं तु आत्मनः कथमिति चेदवस्थात्रयेनानि ५ ठाति
लिखाननिखाला ७ अपेक्ष्यापि किमिचेद्दि

त्र्य
सुषुप्त्यव
स्था

वर्णक
वाक्य
धीश्रीं
जाग्रदवस्थाना
श्रीगणेशाय
॥ ५६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ कालांतरे हास्यामीत्युक्ते मुहूर्तमात्रे अन्योन्यसंवादे उत्सर्गः अधमर्ण

ऋणं देहीत्युक्ते अधमर्णः कठिनसंवादे नष्टवान् ततः अधमर्णेन नास्तीति वदति ततो मुहूर्तमात्रं अन्योन्यकलहेनुभावपि मिलित्वा राजनग
रं गत्वा ऋणं देहीत्युक्तो लाडितवानित्युत्तमर्णेनोक्ते अधमर्णेन मया न ता
डितं तेनैव मम ताडनं कृतमिति प्रत्युत्तरमुक्तं॥ एवमन्योन्यविरुद्धवाक्यं
श्रुत्वा राजनगरेण को वा साक्षीति पृष्टे तावुभावपि साक्ष्यस्तीति प्रत्युत्त
रं म्रचतुः तत्र येन साक्षिणा उभयोः संवादो बहिर्भवेत्॥ तस्मिं साक्षिणि पूर्वो
क्तसाक्षिलक्षणमस्ति॥ तर्हि तयोः संवादि मो अवस्थात्रयं अवस्थात्रयव्यापा
रं अवस्थावेत्ता च जानातीति साक्षिलक्षणासम्भवः॥ तदा तान्संवादान्
विहाय यावत्पर्यंतं मौनेन तिष्ठेयुः॥ तावत्पर्यंतं सुषुप्त्यवस्थाद्रष्टांतः॥
तस्मिन्नवस्थायां व्यापारत्रयमस्ति चेत् नास्ति॥ मौनेन स्थितयोरुभयो
रपि अवस्थावत्वं सिद्धं॥ ततः पश्चात्‌ यावत्पर्यंतं स्तो जन्यवाचो वदेयुः॥
तावत्पर्यंतं स्वभावस्थाद्रष्टांतः तस्यामवस्थायां व्यापारत्रयं अस्तिह

अस्मिन्संवादे अवस्थात्रय प्रसङ्गमस्ति तिष्ठति सूर्योमः।
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥५८॥

२ न्त उभावको द्वावप्यवस्थावंतौ ॥ अन्योन्य कलहं कुर्वाणौ यावत्पर्यंतं स्थितौ तावत् वर्णीक-वाक्यपर्य

स्तचलनादिकायिकव्यापारेण अन्योन्यसंभाषणादिवाचिकव्यापारेण
उत्तरप्रत्युत्तरादिचिंतनरूपमानसिकव्यापारेण तं जाग्रदवस्था
दृष्टांतः तस्यामवस्थायां अन्योन्यताडनादिकायिकव्यापारेण अन्योन्य
पौरुषवचनादिवाचिकव्यापारेण अन्योन्यमर्मचिंतनादिमानसिक
व्यापारेण [illegible] व्यापारत्रयं ज्ञेयं ॥ कलहं कुर्वाणौ उभावप्य यं ५
वस्थावंतौ मध्यस्थे पुरुषे आप्तलक्षणानि कथं तिष्ठंती त्युक्ते मध्यस्थः
७ हं उभयकलहं दृष्ट्वानिति अवस्थात्रयसहितः तिष्ठतीत्यत्र दृष्टांतः तेषां
सहायतया एकवारमपिनो क्तमिति अवस्थात्रयेण विरहितः तिष्ठतीस
स्य दृष्टांतः ॥ तदवस्थात्रयं व्यापारमवस्थावंतं जानातीति साक्षित्वस्य
पुरुषे २ दृष्टांतः ॥ एवं मध्यस्थे देवदत्ते साक्षिस्वरूपआप्तलक्षणमस्येवेति हि दा
र्ष्टांतिके साणि ॥ आत्मनि क्रियेति विशेषणानि युक्ते अवस्थात्रयसहितः ॥५८७॥
क्षि
२ मवस्थात्रय [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ दृष्टांते निरूपयामः।

स्थित्वा तत्र हितः स्थित्वा अवस्थात्रयं अवस्थात्रयव्यापारं अवस्थावंतं
जानातीति एतद्विशेषणत्रयं ॥ अतः परं जाग्रत्स्वप्नसुषुप्तिषु जाग्रन्ना
म निद्रांतं स्नात्वा उत्थाय पुनर्निद्रापर्यंतं जाग्रदवस्था ॥ तत्र दृष्टांतः ॥ वि
शालनगरवत् जाग्रत् ॥ विशालनगरे ब्राह्मणक्षत्रियवैश्यशूद्रविषि
वत् तस्यां जाग्रदवस्थायां कायिकवाचिकमानसीकव्यापारः ॥ तस्मि
न् पट्टने हानिवृध्योः अभिमानी प्रभुवत् तस्यां जाग्रदवस्थायां प्राप्य
माण सुखदुःखादिभिः तप्यमानो विश्वः अवस्थावान् ॥ स्वप्नावस्था तु
निद्राकाले जाग्रद्वासनामयमनसा कल्प्यमान प्रपंचे जीवः यावत्प
र्यंतं व्यवहरति तावत्पर्यंतं स्वप्नावस्था ॥ तस्यापि दृष्टांतः तत्पट्टने वर्त्त
मानकोटवत् इयं स्वप्नावस्था तत्कोटे विद्यमान ब्राह्मणक्षत्रियवैश्य
शूद्रविधिवत् एतस्यां स्वप्नावस्थायां कायिकवाचिकमानसीक

१ भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥५८॥

वर्णक
वाक्य

व्यापाराः तस्मिन् कोठविद्यमानहानिवृक्षाभिमानीप्राञुवत् स्वप्नावस्था
यांप्राप्यमाणसुखादिभिः तप्यमानः तैजसः स्वप्नावस्थावान् ॥ सुषुप्त्य
वस्थातु बाह्यव्यापारमंतरव्यापारंच विनाशरीरादिस्मरणमपि विना
जीवोनिश्चलतसन् यावत्सर्पेतं सुषुप्ति अवस्था तस्यापि दृष्टांतः ॥ तस्मि
न्नेव कोटे विद्यमानराजगृहवत् इयं सुषुप्त्यवस्था तस्मिन् राजगृहे
यथाब्राह्मणादि [illegible] वीर्ययोनसंतितत् सुषुप्त्यवस्थायां कायिकवाचिकमा
नसिकव्यापार अपि न संति ॥ तादृशराजगृहे विद्यमानहानिवृक्षाभि
मानीराजवत् सुषुप्त्यवस्थायां निजानंदमनुभवन् प्राज्ञः सुषुप्त्यव
स्थावान् एतदवस्थात्रयं प्रति आत्मनः साक्षित्वं कथमिति चेत् [illegible] तत्र
जाग्रदवस्थायां तत्र जाग्रदवस्था स्थितकायिकवाचिकमानसिकव्या
परान् अवस्थावंतं च [illegible] तत्र स्वप्नावस्था स्थितकायिकवाचिक

निद्रातिशाय
सर्पतिं-४
६६
नघ २
नघ ३
१ नघ
॥५८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ वाइतिसंदेहे अनुभवो ॥ क्रियमाणो तद्विषयसंनिकर्षो धुनानास्ति इति अनुभवो ।
मानसीकव्यापारान् अवस्थावंतं च अथाहं प्रसेमीतिस्मरणं अनुभवो
इतिवक्तुं न शक्यते ॥ तस्मात् स्मरणमेव ॥ तर्हि तत्स्मरणं अनुभूतव
स्तुविषयं सतत्प्राप्नोतिवा अनुभूतविषयं सत्प्राप्नोतिवेतिसंदेहे अन
नुभूतवस्तुविषयमेवेतिचेत्प्रपंचस्य सर्वोपिव्यापारः ॥ अस्माभिः स्म
तस्यात्तदभावेन अनुभूतवस्तुविषयमेवेति निपतिपले ॥ तर्हि केर
नुभूतवस्तुविषयमिस्तुते ॥ अस्माभिरेवानुभूतविषयस्मरणं अस्मा
कं जायते तर्हि अस्माभिः सर्वाभिरवस्थाभिर्मिलित्वानुभूतं वा प्रत्येकम
नुभूतं वेतिसंदेहे अवस्थाभिर्मेलनं विनैव अनु भूतमिलितिचेत् स्वर्गा
दौ विद्यमानविषयाः अस्माभिः सर्वदा अनुभूयेरन् तद्धनास्तीतिमि
लित्वा विद्यमानावस्थानां अवस्थाव्यापाराणां अवस्थापट
श्यानुभवः ॥ तर्हि एतदवस्थाभिर्मेलनं विनैव स्थितिः कथं

न मिलित्वो अनथ ... सुषुप्त्यवस्था स्थित व्यापा
राभावे तदवस्थावं ... लंच
न

श्रीनृसिंह
मननग्रंथ
॥८६९॥
जानीमः

१ नघ २ वयं २ न २ साक्षि

यं त्तन जागरस्वप्नसुषुप्त्यवस्था अवस्था व्यापारांश्च अवस्थावत
श्चनश्यमाना वयं साक्षिणो नूनं पश्याम इति दवस्थाभिर्मेलनं नावयं तदव
स्थाभिर्मिलिताश्चेत् तास्ववस्थासु नश्यमानासु नष्टा भवेम मिलित्वा
स्थिते नाशावश्यंभावे दृष्टांतः॥ वस्त्रादिभिर्मिलितानि चित्रादीनित
द्वस्त्रनाशे पृथा नाशं प्राप्नुवंतीति एवं वयमपि अवस्थाभिर्मिलिताश्चेत्तत्
नाशे नश्येम तस्माद् अवस्थात्रयेण मेलनं विनैव स्थिता वयं अवस्थातद्व्या
पारान् अवस्थावतश्च जानीम इति साक्षिलक्षणमस्मास्ववर्त्तते॥ तस्मात्व
यमेव साक्षिणः तर्हि इदानीं श्रीमद्भिः उक्तो वस्थाज्ञानवान् साक्षीति निर्णि
तु अवस्थावान् किल अवस्थाः अवस्था व्यापारांश्च जानातीति अवस्था
वत एव॥ अवस्थात्रयसाक्षित्वे विद्यमाने एतदवस्थावतः साक्षित्वमनुक्त्वा
न व्यतिरिक्तस्यैव साक्षित्वं स्वरूपमूचथ इदं कि[illegible]मित्युक्ते अवस्थावतः सा
क्षित्वाभावे व्यतिरिक्तस्यैव साक्षित्वं वक्तुमिदं कैमित्युक्ते अवस्थावान्बास
त १ देश

वर्णक०
वाक्य
अ८
॥८७०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५स्थितः तथा घतापं न प्राप्य न्यूनाधिकसुखदुःखाभ्यां तापं प्राप्य ६कथं ज्ञेयमिति [illegible]

कस्मादिवत्॥ आंतरदेहादिवत् विकारी भवतीति॥ तादृशावस्थाणां तादृशदेहा
दिनां च अन्यपदार्थावभासकसाक्षित्वं यथा नास्ति तथा विकारीभूतावस्थावतः
अवस्थानां अवस्थाव्यापाराणां च अवभासकरूपसाक्षित्वं नास्ति॥ तर्हि अ
४नघ यं विकारतया तिष्ठति वेत्युक्ते तिष्ठत्येव कथं तत्तेन यथा यादृशसुखदुःखा
स्थितः दिभिः तप्यमानः सन् तिष्ठतीति अयं विकार्येव तिष्ठति॥ तस्मादेतस्य साक्षित्वं
त नोचितं तर्हि व्यतिरिक्तसाक्षिणं कमपि न पश्यामि किल अ[illegible]स्ति [illegible] अयं अव ५५
येन नघ स्थावानहं तेन सुखदुःखादिना मिलित्वा स्थितः तेन सुखदुःखादिना अ
घमिलित्वा न स्थीयते तदपेक्षतया न्यूनाधिकसुखदुःखादिभिर्मिलित्वा
तिष्ठति एतदवस्थावतः॥ विकारान् यो [illegible] जानाति स [illegible] एतदवस्थाव्य
तिरिक्तः साक्षीति ज्ञातव्यं॥ तर्हि निर्विकार आत्मा अहं साक्षीति न ज्ञात
५नू व्यं विकारी [illegible] अवस्थावान् किल अहं साक्षीति ज्ञातव्यं॥ तर्हि निर्विकार आत्मा
अहं साक्षीति न ज्ञाता [illegible] विकारी अवस्थावान् किल अहं साक्षीति जानाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह मननग्रंथ ॥८०॥

दृश्यमानेतेपि ८

तस्मान्निर्विकार आत्मा अहं साक्षीति जानामीति कथमुच्यत इत्युक्ते दृ
ष्टांतपूर्वं तं पानिरूपयामः ॥ यथा दर्पणावलोकं ग्रीवास्थमुखं दर्पणे
प्रतिबिंबति तत्प्रतिबिंबद्वारा स्वकीयसौंदर्यत्वकुरूपत्वादयः यथा
दृश्यंते तद्वन्निर्विकार आत्मा अंतःकरणे प्रतिबिंब्यते तद्द्वारा स्वयं निर्वि
कारः साक्षीति जानाति ॥ तस्मिन्नेव दृष्टांते विद्यमानसौंदर्यत्वकु
रूपत्वादीन् यथा जानंति तद्वदेव दृश्यमंतःकरणं तादृशांतःकरणे
प्रतिबिंबितदृश्यविकारी चिदाभासः स्वस्य अधिष्ठानात्मनिष्ठसा
क्षित्व निर्विकारत्वादीन् जानात्येव तस्मान्निर्विकार आत्मा स्वतः अ
हं साक्षीति ज्ञातास्थितं तच्चेदपि विकारिणः साक्षित्वं नास्ति ॥ तादृश
निर्विकारिणः आत्मनः साक्षित्वमप्यस्ति ॥ तत्साक्षित्वलक्षणमस्मा
स्वेव वर्त्तत इति वयमेव साक्षिणः ॥ अस्मास्वेव इदं साक्षित्वं पूर्व

२ है

वर्णक० वाक्य ॥८०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेवसिद्धंवर्त्ततेवाइदानींसाधनैरपेक्ष्यतेवेत्युक्तेविवादकर्त्तृसाक्षिणोवि
षमानसाक्षित्वंसाधनैरसिद्धंसदेवपूर्वमेवयथासिध्यतितद्वदत्रअ
स्माकंतुविषमानसाक्षित्वमपिसाधनैः॥असिध्यदेवपूर्वमेवसि
ध्यति॥तर्हिकिमपिनप्रतीयतेकिलइत्युक्तेविचारोनास्तीतिनप्र
तीयते॥विचारसमयेअस्माकंसाक्षित्वंनित्यंसिद्धं॥तर्हिएतद्वि
चारस्यकिंफलंतद्विवादकर्तृसाक्षीदेवदत्तात्अन्येषांसंवादीनांअ
वस्थाःअवस्थाव्यापाराःअवस्थावत्वंचतस्यदेवदत्तस्यनसंतीति
एतेअवस्थादिविकाराः॥तंयथानस्यशेयुः॥एतदवस्थादीनुस
उदासीनोभूत्वासाक्ष्यातिष्ठतीतिएतदवस्थावादीनांसाक्षितयाय
थातिष्ठतितद्वदेवअस्मदन्यसाभासाहंकारस्यअवस्थात्रयंअव
वस्थात्रयव्यापारः॥अवस्थावत्वंचनास्तीतिएतदवस्थादिविका

१त्राय १अस्माकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह मननग्रंथ ॥५९॥

राः अस्मान्नस्य शेषुः एतदवस्थादीन्नव यंउदासीनाभूताद्रष्टातिष्ठा
मइतिएतदवस्थादीनां कालत्रयेपिसाक्षित्वेन अवसामैतिएतद्विचा
रस्यफलं एवं सम्यग्विचार्यस्वयंसाक्षीतियोविजानातिसकृतार्थः
सएवजीवन्मुक्तइतिसिद्धांतः संशयोनास्तीतिसिद्धं ॥५८॥ इंद्रिये
रूपलब्धिः स्यादर्थानांजाग्रदात्मनः ॥ निद्रायांमनसैवार्थोपलब्धिः
स्वप्नउच्यते ॥१॥ सर्वविज्ञानरहितासुषुप्तिस्यात्सुखात्मिका ॥त
थापारः कापिकाधास्तधान्नविश्वादिनामकः ॥२॥ अवस्थात्रयेसु
संयुक्तः तत्रशोत्तस्यादयंभवेत् ॥ अवस्थात्रयेरयुक्तश्चतंनाशोप्यस्य
संस्थितेः ॥३॥ यथाविवादकर्तॄणांसाक्षीचैवतटस्थः सदा ॥ अवस्था
दिविकाराणांसाक्ष्यव्यक्तोस्वयंतथा ॥४॥ अहंसाक्षीतियोविद्याद्वि
विच्यैवंपुनः पुनः ॥ सएवमुक्तः सोविद्वान्इतिवेदांतडिंडिमः ॥५॥ इ ॥५१॥
तिनवमवर्णकंसमाप्तं ॥९॥ ५८ ॥ ५८॥५८॥ ५८॥ ५८॥ ५८॥ ५८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ आरभ्यते

॥श्रीगणेशाय नमः॥ श्रीलक्ष्मीनृसिंहो जयति॥ अतः द्दशा भवर्णिके॥ किंरू
पाः पंचकोशास्तु ः को वा तद्व्यतिरिक्तता॥ आत्मनश्चेति तत्सर्वं सद्द्‌ष्टांत
विचार्यते॥ १॥ आत्मनः पंचकोशव्यतिरिक्तत्वं ज्ञातुं न घटते॥ तस्मात्प्र
थमतः पंचकोशा निरूप्यंते॥ यथा अन्नमय प्राणमय मनोमय विज्ञान
मय आनंदमयाश्चेति पंचकोशाः तत्र अन्नमयकोशो नाम अन्नजन्यः॥
स्तं भवतु स्थूलः सन् कर चरणाद्यवयवाकारः षड्भाव विकारवान् पंचको
शात्मकतया प्रतीयमानः स्थूलशरीरं अन्नमयकोशः प्राणमयो नाम
द्दशाभिरवयवैः मिलित्वा वर्त्तमानः प्राणमयकोशः ताद्दशा द्दशावयवा
श्च कर्मेंद्रियाणि पंच प्राणाः पंच मनोमयो नाम मनः ज्ञानेंद्रियैः मिलि
तं सत् षडवयवकं॥ विज्ञानमयो नाम बुद्धिः ज्ञानेंद्रियसहिता षडव
यववति॥ आनंदमयो नाम प्रियमोदादि सहिता ज्ञानं॥ दृष्टवस्तु

१ मो० ६ प

[आत्]मनः पंचकोशव्यतिरिक्तत्वं केन प्रकारेण बोध्यते इति विचारयामः॥ पंचकोशांश्च अज्ञात्वा ...

कोशे० ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनंदसिंह मननग्रंथ ॥५२॥

वर्णक वाक्य

दर्शनमात्रेण जनितसंतोषः प्रिय मित्युच्यते ताद्दशेष्ट लाभेन जनित
संतोषः मोद इत्युच्यते ॥ ताद्दशेष्ट वस्त्वनुभवानंतरं जनितसंतोषः ॥
प्रमोद इत्युच्यते ॥ तज्जनितसुखस्य सार्वकालिकत्वेन विद्यमानत्वं
आनंदः एतेषामन्नादीनां कोशशब्दवाच्यत्वात् ॥ कोशवत् आत्मा
नं गूहयतीति ज्ञेयं ॥ कथमित्युक्ते यथा खड्गकोशः ॥ खड्गं निगूहय
ति ॥ यथा वीणाकोशः वीणां निगूहयति ॥ यथा कोशकारजंतुं कौ
शो निगूहयति ॥ तद्वत्पंचकोशाः आत्मानं निगूहयंतीति कोशना
मत्वं तर्हि दृष्टांते खड्गादयः कोशादयश्च समानसत्ताकाः एक
मुपजीव्य एकं न तिष्ठतीति कोशादयः खड्गादिनिगूहने समर्थाः
दृष्टांतिके तु समसत्ताकत्वाभावेन आत्मसत्तोपजीवनेन च प्रती
यमानाः ॥ आत्मानमुपगूहयितुं कथं समर्थाः इति चेत् समर्था ॥५२॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ स्वभ्मादयः कोशादयः कोशादिभ्योभि आदवा सकोप

एव॥ यथा आदित्यकिरणपरिणामविशेषः मेघाः आदित्य तोयजीवनेन चप्रतीयमाना अपि आदित्यमुपगत्यंसेव॥ यथा वा अग्निसत्तो [illegible] जीव्यविद्यमानो धूमः अग्निमुपगूह्यस्येव॥ ततः एतेषां कोश नामत्वं॥ तर्हि आत्मनः पंचकोशव्यतिरिक्तत्वं केन प्रकारेणेति चेत्॥ स्वप्ने कोशः

५२ स्वप्ने अप्येवमादयः॥ एकरूपेणाव्यवहृता अपि [illegible]॥ ननु मिलितस्यात्मनो व्यतिरिक्तत्वमुच्यते किं तत्र्यात्मनः कोशैः मेलनं कथं संभवतीत्युक्ते अन्योन्याध्यासेन प्राप्तं अन्योन्याध्यासो नाम अन्योन्यस्मिन् अन्योन्यात्मकता अन्योन्यधर्मवत्त्वं च॥ अन्नमयकोशस्यात्मनश्चान्योन्याध्यास प्राप्तिलक्षणामुच्यते॥ अहं मनुष्यः अहं पुरुषः अहं स्त्रीभ तथ्या मि॥ अहं ब्राह्मणः अहं क्षत्रियः अहं बाल इत्यादि अन्नमयकोशनिष्ठधर्माः आत्मनि प्रतीयंत इति आत्मधर्माः सच्चिदानंदादयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीरत्नसिंह
मननग्रंथ
॥५३॥

१ ममस्थूलशरीरं समीचीनं भासते अस्तीति

तस्मिन्स्थूलशरीरे सम्यक्प्रतीयंत इति अन्नमयकोशस्यात्मनश्चा
न्योन्याध्यासः ॥ एवं प्राणमयकोशस्यात्मनश्चान्योन्याध्यासः अहं क्षु
धावान् अहं पिपासावान् अहं क्रियावान् इत्यादयः ॥ प्राणमयकोशनि
ष्ठक्षुत्पिपासादयः ॥ आत्मनिष्ठत्वेन प्रतीयंते आत्मधर्माश्च सच्चिदानं
दादयः प्राणनिष्ठत्वेन प्रतीयंत इति प्राणमयकोशस्यात्मनश्चान्योन्या
ध्यासः ॥ एवं मनोमयकोशस्यात्मनश्चान्योन्याध्यासः अहं संकल्पवा
न् अहं विकल्पवान् अहं शोकवान् अहं मोहवान् अहं क्रोधवान् ॥
अहं द्वेषवान् इत्यादयः मनोमयकोशनिष्ठधर्माः संकल्पादयः
आत्मनिप्रतीयंते आत्मनिष्ठधर्माः सच्चिदानंदादयश्च मनोमयनि
ष्ठत्वेन प्रतीयंत इति तयोरन्योन्याध्यासः एवं विज्ञानमयकोशस्या
त्मनश्चान्योन्याध्यासो द्रष्टव्यः अहं निश्चयवान् अहं बुद्धिवान्

अहंशानि
३ मान

वर्णक १०
वाक्य

॥५३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहं ऊहापोहचतुरः इत्यादयः विज्ञानमयकोशनिष्ठधर्माः आत्मनि प्र
तीयंते॥ आत्मधर्मोसच्चिदानंदादयश्च विज्ञानमयकोशनिष्ठतया प्रती
२२ यंत इति तयोरन्योन्याध्यासः॥ एवमानंदमयकोशस्यात्मनश्चान्योन्याध्या
सः अहं [illegible] अहं संतुष्टः अहं सुखी अहं सात्विकः अहं जडः अहं मू
ढ इत्यादयः॥ आनंदमयकोशनिष्ठधर्माः आत्मनि प्रतीयंते आत्मनिष्ठास
च्चिदानंदादयः अज्ञानस्वरूपआनंदमयकोशनिष्ठतया प्रतीयंत इति
तयोरन्योन्याध्यासः॥ अनेनप्रकारेण पंचकोशानां अन्योन्याध्यासो
द्रष्टव्यः॥ एतेनाध्यासेन आत्मनः पंचकोशैर्मेलनं भासमिति पंचको
शेभ्यः आत्मविविक्त इति ज्ञातुं शक्यते॥ तर्हि विभागप्रकारो वाच्य
तामित्युक्ते निरूपयामः॥ कथं मम गौः मम वत्सः मम पुत्रः मम पत्नी मम
कन्या मम पश्वादय इति पार्थक्यनिर्देशेन स्वयं पश्वागोर्नभवतीति पु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥९६॥

वर्णकः
वाक्य

२ तं

आदिश्च न भवति ॥ तद्वत् शरीरमपि स्वयं न भवति ॥ मम प्राणः मम मनः मम
बुद्धिः मम ज्ञानमिति स्वसंबंधितया पृथक् प्रतीयते स्वयं न भवति तस्मात्पं
चकोशव्यतिरिक्त इति प्रतीयते दृष्टांते गोः पुष्टा कृशो वत्सः आतपेन तप्य
ते न जीवति पुत्रः दुर्बलो भवति पत्नी स्वतं आहितकारिणी न भवतीत्यादि
पश्वादिनिष्ठविकाराः तद्विषयत्वेन स्थितं स्वं यथा न स्पृशेयुः ॥ तद्वत्
अन्नमयकोशनिष्ठमनुष्यत्वादिविकाराः प्राणमयकोशनिष्ठक्षुत्पिपा
सादिविकाराः मनोमयकोशनिष्ठसंकल्पादिविकाराः विज्ञानमयको
शनिष्ठकर्तृत्वादिविकाराः आनंदमयकोशनिष्ठभोक्तृत्वादिविकारा
व्र त स्तद्व्यतिरिक्तं साक्षिणं न स्पृशंति ॥ यथा प्रत्येकं ज्ञानं तद्वत्पंचको
शव्यतिरिक्तस्वज्ञानं ॥ तर्हि दृष्टांते पश्वादयः स्वेन मेलनं विनैव वा
सास्तिष्ठंति ॥ तत्स्वज्ञानं कथमुदेतीत्युक्ते दृष्टांतपूर्वकं निरूप्यते ॥ प्र ॥९६॥

॥ तिलव्यतिरिक्तज्ञाने स्वस्य भवतु कोऽपि मिलितास्थितस्यासनः तद्व्यतिरि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ हस्तेन १ भि: २ हस्तेन

थाश्रव्यैर्नैकाले श्रष्येत्रा उआदितान् मिलितान् शब्दान् स्तुत्वाश्रयं श्रो
त्रस्य: शब्द: श्रसंश्रयं शब्द इति विभक्तुमशक्यतयास्थितमपि विवेकस्तु
त्तंबुध्याएतस्याग्रश्राव्य: एतस्यायं श्राव्य इति पृथक्पृथक् जानाति ॥
जलेनामिलितोष्ण स्पर्शं विभक्तुमशक्योपि त्वगिंद्रियेण स्पृष्ट्वा विवेकस्तु
त्तबुध्याउष्णचंप्रसेकीभूय वर्त्तमानं यथा जानाति ॥ भित्तौ लिखमा
नचित्रादीन् विभक्तुमशक्यानपि चक्षुरिंद्रियेण दृष्ट्वा विवेकस्तु
त्तबुध्या इयंभित्तिः ॥ एते नीलादय इति पृथक् जानाति ॥ जलेन संक्र
मितलवणं पृथक्कर्तुमशक्यंचेदपि रसनेंद्रियाणानुभूय विवेकस्तुत्त
बुध्या इदं लवणं श्रयं मधुर इति पृथक् जानाति वस्त्रमाश्रित्य व
र्त्तमानान्गंधविशेषान् पृथक्कर्तुमशक्यानपि घ्राणेंद्रियेणाघ्रा
य विवेकस्तुत्त बुध्या श्रयं सुगंध: श्रयं दुर्गंध इति विशेषांश्च जानाति ॥

श्रोत्रेंद्रियजन्य २ ४ म्य हस्तेन ३

१ विश

श्री...सिंह
मननग्रंथ
॥५५॥

वर्णक ९०
वाक्य

तथापंचकोशानूतद्युक्तमात्मानंचपृथक्कर्तुमशक्यंचेदपिविवेकयुक्तो
बुध्यापंचकोशानांस्वरूपंआत्मस्वरूपंआत्मस्वरूपंचपार्थक्येनजाना
ति॥आत्मनःकालत्रयेपिपंचकोशासंबंधाभावात्॥एतावत्पर्यंतंव्यवहा
रकालेपंचकोशान्आत्मानंचएकवस्तुत्वेनसंस्थाप्यआत्मानंपंचको
शेभ्यःविविच्यज्ञानप्रकारोनिरूपितः॥वस्तुतस्तुविचारेरज्वादौआरोपि
तसर्पादयःरज्जुव्यतिरिक्तत्वेनयथानसंतितद्वदात्मन्यारोपितपंचकोशाः॥
आत्मव्यतिरिक्तानभवंति॥तर्हिरज्वादिज्ञानेसतिसर्पादिप्रतीतिः॥सर्पा
दिव्यवहारश्चयथानास्ति॥तद्वत्पंचकोशेभ्यःआत्माव्यतिरिक्तइतिज्ञा
नानंतरंपंचकोशानांप्रतीतिःपंचकोशाइतिव्यवहारश्चनस्यात्॥ तथान स्पात्
तस्मात्आरोपितपंचकोशाअधिष्ठानस्वरूपात्मव्यतिरेकेणानसं
तीतिबुद्धिःकथमुदीयात्॥इतिचेत्मृदिआरोपितघटादयःमृ ॥५५॥

दादिव्यतिरिक्तत्वेन न संतीति ज्ञानं अथ यद्यपि घटादयः प्रतीयंते व्यवहार
श्च यथा यथा न भवति ॥ तद्वदात्मन्यारोपित पंचकोशाः अधिष्ठानस्वरू
प आत्मव्यतिरेकेण न संति यद्यपि पंचकोशानां प्रतीतिर्व्यवहारश्च भवत्येव
दृष्टांते घटादेः प्रतीतिर्व्यवहारश्च भवति चेद्यपि सूक्ष्मबुद्धेः मृदादिव्य
तिरिक्तत्वेन घटादयो न संतीति बुद्धौ यथा उदयो भवति [illegible] ति
केपि पंचकोशानां प्रतीतिर्व्यवहारः भवति चेद्यपि सूक्ष्म [illegible] बुद्धे [illegible] पको
शा आत्मव्यतिरिक्तत्वेन बुद्धिरूढस्येव ॥ एवं ज्ञानमेव पंचकोशव्यति
रिक्तत्वज्ञानं ॥ एतद्विचारफलं तु अवस्थात्रयेपि आत्मा अनुस्यूतं याति त
ष्ठति पंचकोश बार [illegible] अनस्यूततया न तिष्ठति व्यावृत्ताः संतः पंचकोशाः
प्रतीयंतां नाम ॥ व्यवहारो भवति चेद्यपि पंचकोशाः आत्मव्यतिरिक्तत्वे
न न संतीति ज्ञानं विचारफलं ॥ अनेन प्रकारेण पंचकोशान् आत्मानं

तीतिज्ञा

नसंतीति
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ न

चभिन्नत्वैर्विचार्य आत्मनि कोशप्रतीतावपि आत्मव्यतिरिक्तत्वात्कोशा न
संतीति यो जानाति स कृतार्थः स एव विद्वान् स एव जीवन्मुक्त इति शास्त्रसि
द्धांतः ॥ अस्मिन्नर्थे संशयलेशोपि नास्तीति सिद्धं ॥९॥ शुक्लशोणितसंभृ
तो देहोन्नमय उच्यते ॥ प्राणादिपंचकं प्राणमयः कर्मेंद्रियैर्युतः ॥१॥ ज्ञा
नेंद्रियैर्मनो युक्तं मनोमय इतीरितं ॥ बुद्धिर्ज्ञानेंद्रियैर्युक्ता विज्ञानमय श
ब्दितः ॥२॥ प्रियादियुक्तमज्ञानमानंदमय उच्यते ॥ एतेभ्यो [illegible] कोश
मात्मा साक्षी तद्रात्मकः ॥३॥ कोशाश्चैते ह्यनात्मानो ममता [illegible]
नुतद्वत्स एव च कस्मादयमिवानिशं ॥४॥ मृदारोपितकुंभाद्या भाता पि
नतः पृथक् ॥ आत्मन्यारोपिता कोशा भांतापि च पृथक् न हि ॥५॥ एवं
कोशातिरिक्तं स्वात्मानं यो विविच्यति ॥ स संसारीव भातोपि परं ब्र
ह्मैव नान्यथा ॥६॥ इति दशमवर्णकं समाप्तं ॥ श्रीलक्ष्मीनृसिंहो जयति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीलक्ष्मीनृसिंहायनमः॥अथएकादशानंदकं
सच्चिदानंदलक्षणं॥किमस्यसत्स्वरूपत्वंचिद्रूपत्वंकिमात्मनः॥किंवा
नंदस्वरूपत्वमित्येतच्चिंत्यतेस्फुटं॥१॥आत्मनःसद्रूपत्वंचिद्रूपत्वं
आनंदरूपत्वंचविचार्यामः॥सद्रूपत्वंतावत्केनाप्यबाध्यतयाकाल
त्रयेपिएकरूपतयाविद्यमानत्वं इदं सद्रूपत्वंआत्मनिकेनाप्यबाध्य अस्ति।
त [illegible] प्रमाणं तयाकालत्रयेपिएकरूपमितिसिद्धंसर्वजनीनमेतत्॥तथाहिदरिद्रः
आढ्यःकर्मभक्तःमुमुक्षुःइत्येतेषांअनुभवोनिरूप्यतेदरिद्र
स्तावत्॥अहंजन्मांतरेकेभ्योपिकिमपिनदत्तवानस्मितस्मातस्
मिन्जन्मनिदरिद्रोहमस्मीत्यनुभवतिअस्मिन्जन्मनिदातुंकिम
पिनास्तिभविष्यज्जन्मन्यपिअहंदरिद्रएवभवितास्मीतिदरिद्रवार्ता॥
एवमाढ्योपिअहंजन्मांतरेसत्पात्रेकिंचिद्दत्तवानस्मितस्माद्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ चि ८

स्मिन् जन्मनि ऐश्वर्यमनुभवामि अस्मिन् जन्मन्यपि किंदासर्भोग्य
नि भविष्यजन्मन्यपि ऐश्वर्ययुक्तो भविता स्मि आज्यवार्त्ता ॥ एवं कर्म
ठोपि अनेकजन्मसु सत्कर्म कृतवानस्मि तस्मात्तादृशसद्वास
नावशात् अस्मिन् जन्मन्यपि सत्कर्म करोमि एतत्सत्कर्मवशात् स्वस्य
परलोकोस्तीति कर्मिवार्त्ता ॥ भक्तोपि अनेकजन्मसु भगवंतमुपासि
तवानस्मि तद्वशात् अस्मिन् जन्मन्यपि स्वस्य निरतिशयभक्तिरस्ति
अनया भक्त्या स्वस्य भगवल्लोको भविष्यतीति भक्तवार्त्ता ॥ मुमुक्षुर
पि अनेकजन्मसु ईश्वरार्पणत्वेन अनेककर्माणि कृतवान् अस्मिन् जन्म
न्यपि चित्तशुद्धिः सद्गुरुलाभश्च श्रवणादयश्च लब्धास्ते कृतार्थोस्मि
स्वस्य इतः परं जन्म नास्ति कालत्रयेपि अहं तिष्ठामीति मुमुक्षुवा
र्त्ता ॥ एताभिर्वार्त्ताभिः आत्मनः सद्रूपत्वं सिद्धं ॥ वयं सर्वेपि देहेषु
पंचस्वेवांतर्भूता इति तेषामनुभवेनैव अस्माकमपि सद्रूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ अधुनावयंतिष्ठामः

त्वंसिद्धं॥तर्ह्यनुभवेनास्माकंसद्रूपत्वंसिद्धं॥श्रुत्याकथमितिचे
त्॥वयंकालत्रयेपिस्मःश्रुतिस्तुत्यापिसद्रूपत्वंसिध्यति॥तथाहिव
यमधुनातिष्ठामोनवातथाशरीरखल्वा अशरीरा वा अशरीर
त्वेव्यवहारएवनस्यात्दृश्यतेतुव्यवहारः॥सशरीरत्वंच॥तर्हि
शरीरंकथंप्राप्तमितिचेत् स्वकृतकर्मणाप्राप्तमितिचेत्अन्यकृ
तकर्मणाप्राप्तमितिचेत्अन्यकृतज्योतिष्टोमादिफलमस्माक
मापद्येततथात्वेनअनायासेनैवतत्फलप्राप्तौद्रव्यार्जनादिनि
यमाभावः॥अपिसमर्थइत्यादिक्लेशोपिनविद्येततस्मादन्यकृ
तकर्मणाशरीरप्राप्तिरित्युक्तिर्निरालंबा॥तस्मात्स्वकृतकर्म
णैवास्माकंशरीरप्राप्तिरितिवक्तव्यातर्ह्यस्मिन्जन्मनिकृत
कर्मणाशरीरप्राप्तिः॥जन्मांतरकृतकर्मणाशरीरप्राप्तिः॥

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...सिंह
...ननगेय
॥५८॥

जन्मांतरकृतकर्मणा वा एतज्जन्मकृतकर्मणा वा एतज्जन्मकृतक
र्मणेति चेत् ॥ शरीरं पूर्वभावीति पश्चाद्भाविकर्मणा कथं समुत्पाद्येत
तस्माज्जन्मांतरकृतकर्मणा एतच्छरीरप्राप्तिर्वक्तव्या ॥ तर्हि जन्मां
तरे सशरीराः संतः कर्म अकरवाम अशरीरा वा अशरीरत्वे कर्म
५ रे करणादेव नोद्यात् सशरीरा एवेति वक्तव्यं तच्छरीरप्राप्तिस्तु
ततः पूर्वजन्मकर्मणेति बोध्यं ॥ अनेन प्रकारेण वयमनेकको
७ के टिकल्पेषु सशरीरा एव अनेककर्माणि कृतवंतः ॥ तत्तत्कर्मभिः
अनेकशरीरपरिग्रहं प्राप्ताः तत्तच्छरीरनिष्ठसुखदुःखा
द्यनुभवमपि प्राप्ताः ॥ अनेककल्पेषु स्थिताः स्मः अस्या
मप्यद्ये तत्त्वं तस्माद्वयं [illegible] तु स्याद्भूतभविष्यद्वर्तमानेषु

वर्णक
वाक्य
॥५८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्ठामएवेति विचारे भूतवर्तमानयोः यथा त्वेऽपि भविष्यति कथं निर्ण
यइति चेत् श्रवणमनननिदिध्यासनैः ज्ञानसंपादनाभावे पूर्वजन्मकृत
कर्मणां फलिभूतमेतच्छरीरमस्माकं कथमागतं तद्वत् एतच्छरीरकृ
तकर्मणामपि फलीभूतान्यनेकशरीराणि जन्मांतरसंपादकानि
स्युः एतच्छरीरं परिगृह्य अनेकविधकर्माणि यथा कुर्मः तद्वदेवत
च्छरीरपरिग्रहपूर्वकमनेकविधकर्माणि कर्तास्मः तेन तत्कर्मणां रो.६
फलिभूतानि अनेकशरीराणि अस्माकं प्राप्स्युः।। तानि शरीरा
णि परिगृह्य अनेकविधकर्माणि करिष्यामः तेन तत्कर्मफलीभूत
स्युरेवं तु स्यात्।। ननु भविष्यंतः अनेककोटिकल्पेषु स्थितास्मइ
ति युक्त्या उज्झसामहे।। तस्मात्त्रिकालत्रयेपि वयं तिष्ठाम एवेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ चिद्रूपत्वंमस्ति किं तर्हि

युक्त्यासिद्धं किंच प्रलयेषु जगति बाध्यमानेपिवयमबाधिताएवतेनापि
नबाध्यामहे इति सिद्धं॥ अस्माकंउसत्यादिविकारापिनसंतीतिएकरू
पत्वंसिद्धं॥ इमानि सल्लक्षणानि अस्मासु संतीति अस्माकंसद्रूपत्वंसि
द्धं॥ अतःपरं चिद्रूपत्वंविचारयामः साधनांतरनिरपेक्षेण स्वयंप्रकाश
मानेस्वस्मिन्नारोपितःसर्वपदार्थावभासकत्वंचि त्वंआसनिसार्वजनि २६
६ प्रत्ययः। नंतयथा अस्माभिर्बाल्याद्यारभ्य एतावसर्यंतं केके व्यापाराःकृताःतैः
केषांचित्सतीस्वभावेपिइतरे सर्वव्यापाराःप्रकाशसाधनानि आदि
८ अ त्यचंद्रनक्षत्रादीनि नपेक्ष्यगाढांधकारेस्थिताश्चेदपि अस्माकंसर्वे
षांप्रतीयंतइति आसस्वरूपेष्वस्मासुताहशा चिद्रूपत्वंप्रसिद्धं॥ तर्हि बा
२ मा ल्यादारभ्यएतावसर्यंतं आरोप्येणपदार्थेषु केचित्पदार्थाःकिलप्रतीयं
तेअस्मासु आरोप्यमाणसमस्तप्रपंचो नप्रतीयते॥ तस्मात्सर्वपदार्था
१ नसर्वं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वभासकरूपचिद्रूपत्वमस्माकं कथं संघटत इति चेत्॥ आंतरप्रपंचः बाह्यप्र
पंचश्च सर्वपदार्थ इति उच्यते एतत्प्रपंचद्वयं अस्माभिः प्रतीतिविषयः क्रियते॥
एतत्प्रपंचद्वये बाह्यः प्रपंचः कथं विषयी क्रियत इत्युक्ते॥ पृथिवि आपः तेजः
वायुः आकाशः शब्दस्पर्शरूपरसगंधा इति॥ पंचीकृतभूतानीति ब्रह्मांड
मिति चतुर्दश भुवनानीति चतुर्विध भूतग्रामा इति विविध नामरूपगुणध
र्मविकारदशा तया अयं बाह्यप्रपंचः सर्वः अस्माभिः गोचरी क्रियते बाह्यप्र
पंचेन वयं न गोचरी क्रियामहे तस्मात् बाह्यप्रपंचं जानतामस्माकं बाह्य
सर्वपदार्थविभासत्वं सिद्धं॥ आंतरपदार्थविभासकमपि अन्नमयप्राण
मयमनोमयविज्ञानमय आनंदमयकोशा इति स्थूलसूक्ष्मकारणश
रीराणीति अस्ति जायते वर्द्धते परिणमते अपक्षीयते विनश्यतीति ष
ड्भावविकारा अत्वं मांसशोणितास्थिस्नायुमज्जा इति षट्कोशाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनन्दसिंह
मननग्रंथ
॥८०॥

वृणक
वाक्य

अशनापिपासाशोकमोहजरामरणानीतिषडूर्मयश्च श्रोत्रत्वक्चक्षु
जिह्वाघ्राणानीति ज्ञानेंद्रियपंचकं वाक्पाणिपादपायूपस्थमिति कर्मेंद्रि
यपंचकं प्राणापानव्यानोदानसमाना इति प्राणपंचकं मनोबुध्यहंका
रचित्तानीत्यंतःकरणचतुष्टयं संकल्पाध्यवसायाभिमानावधार
णानीत्यंतःकरणवृत्तयः जाग्रत्स्वप्नसुषुप्तय इत्यवस्थात्रयं व्यापा
राः विश्वतैजसप्राज्ञा इत्यवस्थावंतः समाधिमूर्छामनोवाक्काया इति
करणत्रयं कामक्रोधलोभमोहमदमात्सर्याणीति अरिषड्वर्गः नित्यानि
त्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसंपत्तिः मुमुक्षु
त्वमिति साधनचतुष्टयं सात्विकराजसतामसा इति गुणत्रयं ॥ सुखदुःखे
ज्ञानमज्ञानं ॥ पंच क्लेशाश्च मैत्रीकरुणामुदितोपेक्षा यमनियमासन
प्राणायामप्रत्याहारध्यानधारणसमाधय इत्यष्टांगयोगाः प्रसंख्यानम

॥८०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रपंचः सर्वः ज्ञायते। अंतर प्रपंचं विजानतामस्माकं ततः

नोपमानशब्दार्थापत्त्यनुपलब्धयः इति प्रमाणानि योगाचार्येभ्य इत्यादि
विविधनामरूपगुणधर्मविकारशक्त्याश्रयः आंतरसर्वपदार्थविभा
सकत्वं सिद्धं। तस्मादस्मास्वारोपितसर्वपदार्थविभासकत्वं साधनां
तरं न पेक्ष्य अस्माकं सिद्धं॥ तर्हि मनसा कि [illegible] सर्वं ज्ञायते वयमपि
तेनैव ज्ञाता। तस्मात्साधनांतरनिरपेक्षस्वप्रकाशत्वं सर्वपदार्थाव
भासकत्वं अस्माकं कथं संघटत इति चेत्॥ मनसः उत्पत्तिनाशत्वेन सा
वयवत्वेन परिच्छिन्नत्वेन दृश्यत्वेन घटपटभूतकार्यत्वेन प्रतीयमानृ
त्वात् तस्य जडत्वमेव चेतनत्वं नास्ति तस्मात् जडस्वरूपं मनः एकपदार्थः
ज्ञातुं न शक्यत इति आत्मना चेतनेन प्रकाशितं सत् मनः आत्मानं
प्रकाशयतीति वक्तव्यं वेत्तुकेनात्मैव मनआदिसर्वपदार्थानवभा
सयति एवं प्रकाशने उपाधिमात्रं मनः इति दृष्टांतपूर्वकं निरूपयामः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥८९॥

वर्णका
वाक्य

यथा स्थाल्यां तैलयुक्तवर्त्तिका स्वयं अप्रतीयमाना सति तैलं य
थानप्रकाशयति अग्निहोत्रंतु वर्त्तिकारूपोपाधिमिलितं साधनां
तरनिरपेक्ष्य । विशेषत्वेन स्वमपि प्रकाशयति तद्वर्त्तिकामपि प्रका
शयति तैलं स्थाली समीपपदार्थांश्च यथा प्रकाशयति ॥ तद्वत्
स्थालीस्थानापन्नं स्थूलशरीरं तैलस्थानापन्नकर्मणा ऽत्पा
पितं वर्त्तिस्थानापन्नं मनः स्वयंप्रकाशशक्तिरहितं सत् अन्यप्रका
शकशक्तियुक्तं न भवति आत्मा तत्तन्मनोयुक्तः साधनांतरनैरप
क्षेण विशेषतया प्रकाशमानः स्वमपि प्रकाशयति मनोपि प्रकाश
यति ॥ देहेंद्रियादीनपि प्रकाशयति आंतरबाह्यसर्वपदार्थानवभास
यन्नास्ते ॥ अंतःकरणं च्छित्तिं जानाती स्यर्थे आत्मा निरुपाधिक एव
सन्ऽ जानाति तद्व्यम स्वस्वरूपमेव व्यवयं अतः साधनांतरनिरपेक्ष्य ॥८९॥
१ अंतःकरण इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मस्ति सुषुप्तिकाले तादृशानंदस्यास्तित्वेदपि तस्मिन्नानंदे इदं लक्षण पआत्मनःआनंदत्वं

स्वयंप्रकाशमानंसर्वपदार्थावभासकत्वं अस्माकंसिद्धं ॥५४॥ अतःपरं आनंद
नि रूपत्वं आत्मनोविचारयामः ॥ निरुपाधिकनिरतिशयसुखःस्वरूपत्वं आ
नंदत्वं ॥ स्रक्चंदनादिनाजन्येसुखे अतिव्याप्तिवारणाय सर्वोत्कृष्टत्वात्
...नाम निरतिशयपदं ॥ निपदं स्रक्चंदनादिजन्यस्य सोपाधिकत्वात्
४न सर्वोत्कृष्टसुखत्वात् स्वानंतरभाविदुःखजनकत्वात् तस्मात् सर्वोत्कृष्टं
सर्वदुःखनिवर्तकं नित्यं आनंदसुखं य आनंदः सर्वैः लोकैः सुषुप्तिका निरुपाधिकं
ले अनुभूयते ॥ अस्मिन्नानंदे इदं लक्षणमस्तीति बोध्यं दुःखाभावरूप
ना एवानंदः तस्मिन् निरुपाधिकनिरतिशयसुखस्वरूपत्वं कथमागत
८ मिति चेत् ॥ सुषुप्तिपुरुषः तस्यां सुषुप्त्यवस्थायां तादृशसुखं नानुभवति
तर्हि चेत् तस्याः अवस्थायाः सकाशादुत्थानानंतरं अहं सुखमस्वाप्समिति सु
३ खानुभवो न स्यात् दुःखरहितोहमिति वृत्तव्यं स्यात् तद्वनोच्यते किं तु त
स्मात् सुषुप्त्यवस्थायां सर्वे जनाः एकमेवानंदमनुभवंति ॥ तस्मिन्ना

त्रि ८ स्या ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥९२॥

२ कथमिति चेत्

वर्णको
वाक्य

नंदं नित्यनिरूपाधिकनिरतिशयसुखस्वरूपत्वमस्तितस्यसुखस्यनि
रूपाधिकत्वं सुखजनकस्त्रीचंदनादिविषयाः तस्यां सुषुप्त्यवस्थायां
३ स्य नसंतीचेदपिसर्वैर्जनैः तत्सुखं अनुभूयमानत्वात् ॥ निरतिशयत्व
मपि समस्तविषयजन्यसुखेषु मध्ये उत्कृष्टस्त्रीसंभोगसुखे विरसो
सादनात्तत्सुखं परित्यज्य प्रातिदिनं सुषुप्तिसुखमपेक्षते अतः त
त्सुखस्य विघ्नकर्तृ न शिक्षयतीति ॥ तादृशसुषुप्तिसुखस्य निरति
शयत्वं अन्यदपि जाग्रत्स्वप्नयोः प्रतीयमान आध्यात्मिकाधिभौति
काधिदैविकसमस्तदुःखानि निराकरोतीति सुषुप्तिसुखस्य नि
रतिशयत्वं ॥ तर्हि सुखस्य नित्यत्वं कथमिति चेत् ॥ जाग्रत्स्वप्नयोः अ
नुभूयमानसमस्तसुखानि अनेकरूपाणि यथानुभूयंते तथा इदं
सुषुप्तिसुखं अनेकरूपतया नानुभूयते किंतु प्रतिसुषुप्ति एकरू
पेणैव अनुभूयते अतः तादृशसुषुप्तिसुखस्य नित्यत्वमस्तीति

॥९२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुषुप्तिसुखस्य नित्यत्वे जाग्रत्स्वप्नयोरपि प्रतीतिः स्यात् तस्मान्नित्यत्वे
क्तिर्नित्यं जाग्रत्यतीति चेत् तत्सुषुप्तिसुखं नित्यं भवति चेदपि दुःखस्य स्व
पदेहेंद्रियादिसंपर्कात् तादृशसुषुप्तिसुखतिरोधानात् प्रतीत्यभावः आ
त्मकार्यदेहेंद्रियादिभिः कारणभूतात्मसुखस्य कथं तिरोधानमिति चे
त् यथाग्नेः प्रकाशस्वरूपत्वं स्वतः सिद्धं चेदपि स्वकार्यभूतधूमसं
पर्केण तत्प्रकाशस्य यथा तिरोधानं यथा दीपस्य स्वप्रकाशत्वं स्वतः सि
द्धं चेदपि स्वकार्यभूतमेघावरणादिना तिरोधानं ॥ तद्वदेव आत्मकार्य
भूतदेहेंद्रियादिसंपर्केण जाग्रत्स्वप्नयोः तादृशसुषुप्तिसुखतिरो
धानाद्बहिर्मुखस्य न तत्प्रतीतिः तस्मात् एतत्सुषुप्तिसुखस्य कालत्रया
बाध्यत्वात् नित्यनिरुपाधिकनिरतिशयत्वे सर्वदा सिद्धत्वमभ्यु
पेयं एतद्विचारफलं तु पूर्वोक्तसद्रूपत्वचिद्रूपत्वआनंदरू

श्रीन्रसिंह
मननग्रंथ
॥ ६३ ॥

पशोंनिश्चस्मात्सुत्तिष्ठान्येवर्त्ततइतितादृशसच्चिदानंदस्वरूपात्मा
वयमेवेतिदृढंनिश्चययोविचारफलमिति अस्मिन्नर्थेसंशयले
शोपिनास्तीतिसिद्धं ॥ ७ ॥ केनाप्यबाधितत्वेनत्रिकालेप्येकरूप
तः ॥ विद्यमानत्वमस्यैतत्सद्रूपत्वंसदात्मनः ॥ १ ॥ स्वारोपिता
शेषपदार्थभासकत्वमात्मनः साधनमंतरेणयत् ॥ वदंतिवेदां
तविदोहितांस्वयंप्रकाशमानस्यतुचित्स्वरूपतां ॥ २ ॥ निरूपा
धिकनित्यंयत्सुतौसर्वसुखात्परं ॥ सुखरूपत्वमस्यैतदानंदत्वं
सदात्मनः ॥ ३ ॥ एवंविविच्ययोविद्यात्सच्चिदानंदरूपतां ॥ स्वस्ये
वात्मनियोविद्वान्समुक्तः सचपंडितः ॥ ४ ॥ इतिमननग्रंथेएका
दशावर्णकंसमाप्तं ॥ श्रीलक्ष्मीन्रसिंहार्पणमस्तु ॥ श्रीरस्तु ॥

वर्णक
वाक्य

॥ ६३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीलक्ष्मीनृसिंहायनमः॥अथद्वादशवर्णकेअ
खंडत्वनिरूपणं॥अखंडत्वंसदासच्चिदानंदात्मनोयथाभवेत्॥भिन्न
वस्तुणावभासमानानांवर्ण्यतेतथा॥१॥पूर्वंआत्मनःसच्चिदानंदरू
पत्वंवर्णितंइदानींतादृशासच्चिदानंदरूपस्यात्मनः॥अखंडत्वंनिरू
पयामः॥देशतःकालतोवस्तुतश्च अपरिच्छिन्नत्वंअखंडत्वंएतादृशा
खंडत्वस्यविशेषणत्रयमस्तिआत्मनःदेशतःअपरिच्छिन्नत्वंइत्येवो
क्तेआकाशस्यापिव्यापकत्वात्तस्याप्यपरिच्छिन्नत्वसम्भावात्अखं
डत्वमापद्येततद्वारणायकालतोप्यपरिच्छिन्नत्वंवक्तव्यं॥आकाशस्य
उत्पत्तिमत्वान्नाशवत्वाच्चकालतःपरिच्छेद्यमेवतर्हिकालतःपरिच्छे
दाभावएवअखंडत्वमित्युक्तेकालस्यापिविभुत्वात्देशतोप्यपरिच्छि
न्नत्वात्स्वेनस्वस्यपरिच्छेदाभावेनकालतोप्यपरिच्छिन्नत्वात्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लस्य देशतः कालतश्च अपरिच्छिन्नत्वमुक्तमेव तस्मात् कालस्यापि अखंडत्व
मापद्येत तस्मात् कालस्य अखंडत्वं प्रवृत्तो आत्मनः वस्तुतो अपरिच्छिन्नत्ववि
शेषणं तथा च कालस्य आकाशादिवस्तुरूपत्वाभावेन वस्तुतः कालस्य
अपरिच्छिन्नत्वाभावात् आत्मनः विनाभूतकालादीनां त्रिविधपरिच्छेद अ
भेयेरूपमखंडत्वं नास्ति॥ तर्हि अस्मिन् देशे अहं तिष्ठामि कस्मिन्देशे न
तिष्ठामीति देशतः अहं शुक्लसंवत्सरेऽस्मिन्नोऽस्मि कस्मिंश्चित्काले मद्भुपयुग
च्छामीति कालतः इदं वस्तु अहं तद्वस्तु नाहमिति वस्तुतः॥ परिच्छिन्न
त्वेन प्रतीयमानत्वात् आत्मनः कथं त्रिविधपरिच्छेदशून्यमिति चेत्॥
अस्मिन्देशे तिष्ठामीत्यादि त्रिविधपरिच्छेदाः देहमुपेक्ष्यैव देहव्यति
रिक्तस्यात्मनः देशकालवस्तुभिः अपरिच्छिन्नत्वमेव तथा हि घटस्व
रूपस्य नै इत्यादि भूतभौतिके समस्तप्रपंचे सद्रूपस्यात्मनः अ
नुवृत्तिसद्भावेन आत्मनो व्यापकत्वात् तस्मिन् देशे व्यापकस्यात्म
नः देशतः अपरिच्छिन्नता एवं आत्मा अनादित्वात् भूतकालतः अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्तिता रू

परिछिन्नतानित्यत्वात् भविष्यत्कालतः अपरिछिन्नता देहादिव्यतिरिक्त
त्वात् वर्त्तमानकालतः अपरिछिन्नतां तादृशा वस्तु सजातीयं विजातीयं स्व
गतमित्युच्यते ॥ यथा वृक्षस्य वृक्षांतरं सजातीयं ॥ शिलादयस्तु विजाती
यः ॥ तस्यैव वृक्षस्य पत्रपुष्पफलादय स्वगतवस्तु तद्वदात्मनः सजातीय
विजातीयस्वगताभावात् ॥ तद्भेदापि न संति ॥ तर्हि घटः सन् देवदत्तात्माय
ज्ञदत्तात्मा मैत्रात्मेति सजातीयः ॥ तद्भेदश्च पृथिवीति आप इति तेज इत्या
दि विजातीयः ॥ तद्भेदश्च इच्छाद्वेषसुखदुःखसत्वरजस्तमांसीति स्वग
तः ॥ तद्भेदश्च त्रिविधपरिछेदसद्भावात् आत्मनः कथं सजातीयाद्यभाव
उच्यत इति चेत् एते सजातीयादिभेदाः ॥ आत्मन उपाधिकृताः परमार्थ
तो न संति तर्हि परमार्थतः सजातीयभेदः कीदृश इति चेत् एकस्यैव आ
काशस्य घटमठकुड्याद्युपाधिना तत्तद्विछिन्न आकाश इति अनेकत्वेन
मथ्याव्यवहारेण योग्यतातद्वद् आत्मनोपि ड्याक्चशारीरोपाधिनो देव
दत्तयज्ञदत्तविष्णुमित्राद्यनेकरूपत्वेन व्यवहरणयोग्यता परमार्थतो वि

नन्द सि
ननगी
॥६५॥

वर्णक १२
वाक्य

चार्यमाणेघटाद्युपाधिनिरसनेनशुद्धाकाशावत्सजातीयविजातीयादि
भेदनिरसनेन शुद्धाकाशावत्सजातीयविजातीयादिभेदनिरसनेन केवल
स्यैवस्थितेः तर्हि परमार्थतः विजातीयभेदः कीदृश इति चेत् सद्रूपस्यात्म
नः असत्प्रपंचेन किल विजातीयइत्युक्तिः ॥ तस्य असत्प्रपंचस्य शशवि
षाणवंध्यापुत्रगगनारविंदतुल्यत्वात् ॥ असत्प्रपंचेन आत्मनः विजाती
यत्वस्यवक्तुमशक्यत्वात् ॥ परमार्थतः आत्मनः विजातीयत्वाभावात् त
द्भेदोनास्त्येव ॥ एवं आत्मनः स्वगतभेदस्यापि परमार्थतो वक्तुमशक्यत्वा
त् ॥ इच्छाद्वेषादीनां अंतःकरणधर्मतया आत्मनो गुणत्वाभावात् ॥ इच्छा
दिभिः सच्चिदानंदस्वरूपस्यात्मनः स्वगतभेदस्य वक्तुमशक्यत्वात् ॥ तर्हि
भिन्नस्वरूपैः सच्चिदानंदैः आत्मनो भेदएवेतिचेत् एते सच्चिदानंदाः ॥ भि
न्नानभवंत्येव तादृशैः सच्चिदानंदैः आत्मनः भेदः सुतरां नास्ति ॥ सदा तत्र
दीनां वाच्यार्थभेदेन हस्तकरपाणिशब्दवत् पर्यायत्वापादनमपिनवा

॥६५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ पर्यायत्वाभावेरोहितोछप्रकाशस्वरूपमिति रक्तारोहितादय: परस्परापि भ्रायथा
च्यंदीपस्यरोहितोछप्रकाशायूतिशब्दै: अर्थेनभिन्नवत्व्यवह्रियमाणालेपि
हस्तकरादिवत् सच्चिदानंदा: शब्देन अर्थेनभिन्नवत्प्रतीयमाना अपि आत्मन:
स्वरूपमेतितेषांभेदाभावात् तर्हितेषांभेदाभावे आत्मासद्रूपइत्येवंश्रुत्याकिमि
तिनोच्यतेसद्रूपइतिचिद्रूपइतिआनंदरूपइतिचेत्किमर्थमुच्यतइतिचेत्तत्स
च्चिदानंदाइतिप्रतिपादकश्रुते: त्रयाणांसच्चिदानंदानांभेदनिरूपणेतात्पर्यं
८अ नास्ति।। किंतर्हि आत्मनिष्ठसत्त्वंसद्रूपजगंनिष्ठत्वेन आत्मनिष्ठचिद्रूपत्वं
जडस्वरूपबुध्यादिनिष्ठत्वेन आत्मनिष्ठआनंदत्वंदु:स्वरूपपुत्रभार्यादिनि
ष्ठत्वेनप्रतीयते।।जगन्निष्ठमसद्रूपत्वंबुध्यादिनिष्ठंजडस्वरूपत्वंपुत्रभार्या
दिनिष्ठंदु:ख[illegible]रूपत्वंआत्मनिष्ठत्वेनप्रतीयतइतिहेतो:।।तन्निरासायश्रु
त्याविशेषणत्रयमुच्यतइतितात्पर्यं।। किंच द्वैतवादिन: सर्वे आत्मन: जड
स्वरूपमंगीकृत्यतस्यसत्वंधर्म: चित्सुखादयोगुणाइतिवदंतीति तन्निरा
सायविशेषणत्रयंश्रुत्याबोध्यते तादृशासच्चिदानंदादीनांभेदप्रतिपा
दकतात्पर्यलेशोपिवस्तुमशक्यत्वेन सदेवचित् चिदेवआनंदइतिश्रुति

नमैवंति तद्वत् ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वान्द सिं
मननगं
॥९६॥

तात्पर्यालोचनेनसिध्यं॥ तर्हि श्रुतिमात्रस्य तात्पर्योक्ता वपियुक्ता कथंसिद्धमितिचे
त्स्युक्तत्यापितथैव सद्वस्तु स्वत एव प्रतीयते वा अन्येनकेन चिदितिविचारे स्वतः प्रतीतौ सि
द्ध्यमाने [illegible] सदेव चिदितिसिद्धं अनेन चिदितिसिध्यमाने अन्यच्चवस्तु सद्विलक्ष
णं वा सदंतरं चेति विचारे सद्विलक्षणशब्दे न असदेवोच्यते असद्रूपसद्विल
क्षणेन कथं सत्प्रतीतिः असद्रूपशशविषाणादिभिः [illegible] सद्रूपघटादयः प्रतीय
तामितिवक्तव्यं स्यात् तस्मात् सद्विलक्षणेन असतासत्प्रतीतिर्वक्तुमशक्या तर्हि
सदंतरेण सत्प्रतीतिर्वक्तव्या तदपि सदंतरं स्वतः प्रतीतं सत् सत्प्रत्यापयति
विचारे स्वयं भिन्नमेव सदंतरेण प्रतीतं सत् सत्प्रत्यापयतीत्युक्ते स्वयं भिन्न
मेव सदंतरेण प्रतीतं सत्प्रत्यापयतीत्युक्ते तत् सत् केन प्रत्याप्यते तदपि सत् के
न प्रत्याप्यते तदपि सत् केन प्रत्याप्यते इत्यनवस्थाप्रसंगः तस्मात्तादृशसद
तरं स्वतः प्रतीतं सत् सत्प्रत्यापयतीत्युक्ते आत्मनः उपाध्यभावात् सदंत
राभावेन स्वतः प्रतीतं सत् सदंतरं प्रत्यापयतीति वक्तुमनर्हं एवं विचारेण
आत्मस्वरूपसद्वस्तु प्रतीतम् इति असत्स्वरूपसद्विलक्षणमपि सदंतरं

९क्ष

वर्णका
वाक्य
य २
इति८
स ४
॥९६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुव सद्विलक्षणा॰परिरज्जुसर्पवत् असदिति कल्पितेनापि सद्रूपस्य सतः सद्वितीयत्वं
गाप्रतीतं सदेव सदंतरमपि स्वतः प्रसापयत्सत् सदंतरं ममीति वक्तुमशक्यत्वेन
आत्मसत्तैव स्वतः प्रतीयते इति वक्तव्यं ॥ एवं वस्तुतया सदेव चिदिति सिद्धं ॥ तर्हि चि
द्रूपसतः आनंदत्वं कथमिति चेत् ॥ आत्मनः सद्वितीयत्वसंपादकवस्त्वभावात् आ
नंदत्वं सिद्धं ॥ तर्हि सदंतरेण वा सद्विलक्षणेन वा आत्मनः सद्वितीयत्वं वक्तव्यमि
ति चेत् उपाधिं विना स्वतः सदंतरं नास्ति सदंतरेण सतः सद्वितीयत्वं वक्तुमन
र्हं ॥ तस्मात् चिद्रूपस्य सतः सद्वितीयत्वसंपादकसदंतराभावात् सद्विलक्षणपदार्थाभावा
त् अपदार्थेतराभावेन तादृशचिद्रूपसतः अद्वितीयमेव सिद्धं ॥ तादृशाद्विती
यत्वमेव आनंदरूपमिति कृत्वा यदा अद्वितीयत्वं सिध्येत् तदैव आनंदरूप
त्वमपि सिध्येत् ॥ अनेन प्रकारेण युक्त्या च सदेव चित् चिदेवानंद इति सि
द्धं ॥ तर्हि श्रुतियुक्तिभ्यां किल सदेव चित् चिदेवानंद इति सिद्धं अनुभवे
न नास्तीति चेत् ॥ अनुभवेनापि सदेव चित् चिदेवानंद इति सिध्यति ॥
यथा सुषुप्तौ सर्वप्राणिभिः एकमेव वस्तु सुखं अनुभूतं सत् प्रतीयते ताद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥९८॥

शासुखंजागरस्वप्नयोः प्रतीयमानं सुखवत्तनानारूपतया अप्रतीतं सत्सर्वे
सुषुप्तिषु एकरूपमेव भातीति तादृशासुषुप्तिसुखमेव सद्रूपं तादृशसद्रूपसुषु
प्तिसुखस्य चिद्रूपतावत्स्वतः प्रतीतं सत्सुषुप्तौ नारोपितसर्वपदार्थाविभास
५ता कमिति कृत्वा तादृशासुषुप्तिसुखस्य चिद्रूपत्वं अस्येव अतः सुषुप्तेः उत्थितपु
रुषेण सुखमहमस्वाप्सं न किंचिदवेदिषमिति एकमेव सुखं अज्ञानं च
स्मर्यते॥ इदं स्मरणं अनुभवं विना न जायत इति एतत्सुषुप्तिसुखस्य अज्ञान मनु ७
स्य च सुषुप्तिकाले अनुभवो वक्तव्यः॥ तादृशासुखं स्वरूपमेवेति कैः सुखं भा ता ७
यत इति मोहः अज्ञानमात्रमेव अनुभूयते इदं अनुभूयमानं कैः प्रतीयत इ
ति चेत्सुषुप्तिसवस्थायां प्रकाशसाधनीभूत आदित्यचंद्रादिनामभावेपि सु
खमात्रमेवास्तीति या तादृशासुखेनैव अज्ञानं प्रतीयत इति वक्तव्यं॥ अन्यथा ता
दृशाज्ञानेन सुखं प्रतीयत इत्युक्तौ अज्ञानस्य जडत्वात्तेन सुखं प्रतीयत
इति वक्तुमनर्हत्वात्॥ तादृशासुखं स्वतः प्रतीतं सत् अज्ञानं प्रसापय

स्वर्गपरा
वाक्य
॥९८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ स एव अज्ञानं प्रसापयति इति रूमनर्ह स्वात्मस्वतः प्रतीत

तिवास्वतः ।। अप्रतीतं सत् अज्ञानं प्रस्थापयतीति विचारे स्वयमप्रतीतं सदे
व अज्ञानं प्रसापयतीति वक्तव्यं तस्मिं न ज्ञाने सकलप्रपंचस्य लीनत्वा
त् ताहृशज्ञानप्रसापनेनैव ताहृशसुखस्य सकलपदार्थावभासकत्वं
सिद्धं इदमेव आत्मनः सर्वज्ञत्वं तस्मात् सुषुप्त्यवस्थायां सद्रूपसुखस्य
चिद्रूपत्वं सिद्धं ।। एतस्य आनंदरूपत्वं कथमिति चेत् नित्यनिरूपाधि
क निरतिशयसुखस्वरूपत्वं सुषुप्तिसुखस्यास्ति ।। एतस्य आनंदत्वं
सिद्धमेव तस्माद् अनुभवेन सदेव चित् चिदेवानंद इति सिद्धं ।। ननु सच्चि
दानंदाः आत्मनः स्वरूपमेवेति ताहृशसच्चिदानंदैः आत्मनः स्वगतम
पि नास्ति स्वगतभेदोऽपि नास्ति आत्मनः विजातीयं अनात्मा असदेवेति
ताहृश अनात्मना आत्मनः विजातीयमपि नास्ति विजातीयभेदोऽपि नास्ति ।।
५ अनेन प्रकारेण एतत् त्रितयनिरूपितभेदः आत्मनो नास्तीति सिद्धं ।। आ
त्मनः सर्वात्मकत्वात् सजातीयविजातीयस्वगतवस्तुनिरूपितपरिच्छे

आत्मनः आत्मांतरेण नास्ति ।। सजातीयेन
सिद्धसजातीयभेदेन नास्ति
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ आत्मनो नित्यत्वात् कालनिरूपितपरिच्छेदाभावः सिद्धः ॥

दाभावसिद्धं ॥ आत्मनो विभुत्वात् देशनिरूपितपरिच्छेदाभावः सिद्धः ॥ अनेन प्रका
रेण आत्मा त्रिविधपरिच्छेदशून्य इति सच्चिदानंद इति सच्चिदानंदस्वरूप इति
आत्मनः अखंडत्वसिद्धं ॥ तर्हि एतद्विचारफलं किमिति चेत् ॥ समस्तप्राणिनां देह
एवाहमिति यथा दृढनिश्चयोस्ति तद्वदेव देहे आत्मत्वबुद्ध्यभावेन सच्चिदानं
दस्वरूप आत्मा अहमिति दृढनिश्चयो[illegible]मेव विचारफलं अनेन प्रकारे
ण विचारेण आत्मस्वरूपमह[illegible]मिति यो जानाति स एव सर्वसंसाराद्विमुक्तः स
एव कृतकृत्यः स एव परिपूर्णो ब्रह्मेति सकलश्रुतिस्मृतीतिहासपुराणाभियु
क्ताचार्यवचनानि घोषयंति अस्मिन्नर्थे संशयलेशोपि नास्तीति सिद्धं ॥ अत्र
केषांसंमतिरित्युक्ते एषामनुभवोस्ति एषां वेदांते विश्वासोस्ति त एव संमतिं कु
क र्वंतीति सिद्धं ॥ संग्रहश्लोकः ॥ भूतभौतिकभावेषु स्वकार्येषु सदात्मनो ॥ व्याप्तिदृष्ट्या
ततो व्याप्तात् देशान्नास्य परिच्छितिः ॥१॥ अदेहत्वादनादित्वादव्याप्यत्वान्न
विद्यते ॥ वर्तमानगतागामिकालेभ्यस्य परिच्छितिः ॥२॥ सर्वाभिन्नस्वरूपेण
सर्वात्मत्वात्सदात्मनः ॥ सर्वेभ्यो वस्तुजातेभ्यः परिच्छित्तिर्न विद्यते ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ना

नव्यापित्वाद्देशतोतो नित्यत्वान्नापि कालतः ॥ नवस्तुतोपि सर्वात्म्यादानंत्यं ब्र
ह्मणि त्रिधा ॥ ७ ॥ अखंडआत्माहमेवायं इत्येवं यो विजशिवान् ॥ स सर्वैः संस
तेर्मुक्तो ब्रह्मानंदं समश्नुते ॥ ८ ॥ किमेनेन बहूक्तेन निर्णितौ द्वौ महात्म
भिः ॥ अविचाराद्धि संसारो विचारान्मोक्ष इत्ययम् ॥ ९ ॥ प्रमादात् [illegible] मा
द्यायदज्ञानम् [illegible] येरितं ॥ तत्क्षम्यंतु [illegible] ॥ आ ६ ९ ॥
इति मननग्रंथे द्वादशवर्णकं समाप्तं ॥ १२ ॥ श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥
॥ श्रीगणेशाय नमः ॥ अथ त्रयोदशवर्णकं ॥ यदज्ञानप्रभावेन दृश्यते स
कलं जगत् ॥ तज्ज्ञानाद्ध्रियमाप्नोति तस्मै ज्ञानात्मने नमः ॥ १ ॥ येन अज्ञाने
न सर्वे प्राणिनः जन्ममरणदुःखपरंपरां प्राप्नुवंति तस्याज्ञानस्य स्वरू
पं निरूपयामः ॥ स्वस्वरूपज्ञानमेव अज्ञानस्वरूपं केचित् स्वस्वरूपं न जा
नंतीत्युक्ते न जानं नसे व केवा भव [illegible] ज्ञानाति ॥ मत्सर्व अज्ञा

न: ५

श्रीनृसिंह
मननग्रंथ
॥६९॥

स्व १

नप्रभावोप्येवाइतिवक्तुमनर्हमेव॥तर्हि स्वस्वरूपंकिंकिमितिजानंतीत्युक्तेऽ
हंमनुष्यः अहंस्त्री अहंपुरुषः अहंब्राह्मणः अहंक्षत्रियः अहंवैश्यइत्या
दिप्रकारैः स्वस्वरूपंजानंतीति॥ननुप्रथमंकेपिस्वस्वरूपंनजानंतीत्युक्त्वा
पुनर्जानंतीत्युच्यतेपूर्वोत्तरविरोधः पूर्वंनजानंतीत्युक्तेऽपुनाजानं
तीत्युक्तमितिचेत्‌बाधकंपंस्वयंमनुष्यइतिकृत्वास्वंमनुष्येतिज्ञानेस्व
रूपज्ञानंनभवतिस्वयंस्त्रीतिकृत्वास्वरूपंस्त्रीत्वेनजानातियदातत्स्वरूपज्ञा
नंनभवतिस्वयंपुरुषइतिपुरुषत्वज्ञानंस्वस्वरूपज्ञानंनभवतीतिएवंस
र्वत्रोह्यंतस्मात्केपिस्वस्वरूपंनजानंतीतिनपूर्वोत्तरविरोधः ननुमनुष्य
स्वरूपंस्वंमनुष्यइतिजानातिबलिवर्द इतिनजानातिस्त्रीस्वरूपंस्त्री
त्वेनकिलजानातिनतुपुरुषइतिपुरुषःस्वंपुरुषइतिकिलजानातिनतु
पिशाचइति॥एवंसर्वेप्राणिनः॥स्वंस्वंयथार्थत्वेनैवजानंतीति

१ स्वरूपं

वेणु

३ स्व

४ पुनः

य
इ
त

॥६९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ शास्यतएव।कथं॥

स्वस्वरूपंनजानंतीतिवक्तुंनशक्यतइतिचेत् नस्वयंमनुष्यएवभवेत् गतेज
न्मन्यपिमनुष्यएवभवेत् आगामिजन्मन्यपिमनुष्यएवभवेत् गतेजन्मन्य
पिस्वयंदेवोवापक्षीवाकिंनरोस्थावरोवाकोवेदस्वस्यमनुष्यत्वमेवस्व
तःसिद्धंचेत् अग्रेजन्मसुदेवादिशरीराणिममापेक्षितानीतिअस्मिन् ५८
जन्मनिकेपियागोपासकक्रियानकुर्युःकुर्वंतिचेत् तस्मात्स्वस्वरूपंमनु
ष्यत्वादिप्रकारेणजानंतीतिचेत्॥तत्स्वरूपज्ञानंभवतिननुसर्वेप्यनेनैव न८
प्रकारेणजानंतिवेत्तुतेकेपिनपारलौकिकःस्वस्वरूपंजीवइतिजानं
तितस्यजीवस्यस्वरूपंकिमितिपृष्टेपुनःवक्तुंनजानंतीतितेपिनजानं
त्येव॥कथंअमनुष्यंमनुष्यत्वधर्मरहितंस्वस्वरूपंमनुष्यइतियोजाना
तिसयथास्वस्वरूपंनजानातितद्वदेवजीवत्वधर्मरहितंस्वस्वरूपंस्वयं
जीवइतिजाननन्स्वस्वरूपंनजानात्येव॥तर्हिशास्त्रज्ञोपिस्वस्वरूपंस्वयं
नजानंतिवेतिपृष्टेनजानंत्येव॥ननुशास्त्रज्ञाःआत्मस्वरूपंदृशमोद्दर

२५ २६

मितिच्छ७ निश्चयवंतः तत्कथं न जानाति उच्यत इति चेल्लशास्त्रज्ञेषु चा
र्वाकैः आत्मस्वरूपं स्थूलदेहं आत्मेति जानाति तस्मात् शास्त्रज्ञोपि आ
त्मस्वरूपं न जानंति ॥ अन्येपि चार्वाकाः प्राणोपासकाः तेपि शास्त्रज्ञाः
अनात्मस्वरूपं प्राणमेवात्मेति जानंति अतः शास्त्रज्ञा अपि आत्म
स्वरूपं न जानंति ॥ अन्येपि चार्वाकाः अनात्मस्वरूपाणी इंद्रियाण्ये
व आत्मेति जानंति ते शास्त्रज्ञा अपि आत्मस्वरूपं न जानंति अन्येपि
चार्वाकाः अनात्मस्वरूपं मनएवात्मेति जानंति ते शास्त्रज्ञा अपि
आत्मस्वरूपं न जानंति ॥ अन्येपि बौद्धाः अनात्मस्वरूपं क्षणिकबुद्धिं
आत्मेति जानंति ते शास्त्रज्ञा अपि आत्मस्वरूपं न जानंति ॥ अन्ये
पि बौद्धाः ॥ शशविषाणतुल्यं शून्यमेव आत्मेति जानंति ते शा
स्त्रज्ञा अपि आत्मस्वरूपं न जानंति ॥ तर्हि शास्त्रज्ञाः मीमांस

५ मनोपासकाः

क ४

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

कादयः परिपूर्णमात्मानं अणुपरिमाणत्वेन जानंति ते शास्त्रज्ञा अपि आ
त्मस्वरूपं न जानंति ॥ एवं तार्किकादयोपि आत्मनो विभुत्वमंगीकुर्वंति चे
दपि आत्मनो नानात्वं जडत्वं चांगीकुर्वंति अजडस्यात्मनः चित्वं गुणं
इति चांगीकुर्वंति निर्गुणस्यात्मनः इछादयो गुणा इति अंगीकुर्वंति
दृक्स्वरूपस्यात्मनः दृश्यत्वमंगीकुर्वंतीति एते शास्त्रज्ञा अपि आ
त्मस्वरूपं न जानंत्येव ॥ एवं सांख्यमतानुयायिनः योगमतानुयायि नु ९
नश्च आत्मनो विभुत्वं सच्चिदानंदस्वरूपत्वं असंगत्वं च अंगीकुर्वं
ति ति चेदपि नानात्वमंगीकुर्वंति जगतः सत्यत्वं चांगीकुर्वंति ॥ तत्रापि
सांख्या निरीश्वरवादिनः योगाः पातंजलाः निरीश्वरवादिनोपि
जीवेश्वरयोः भेदमंगीकुर्वंतीति ते शास्त्रज्ञा अपि आत्मस्वरू
पं न जानंत्येव ॥ न हि एते सर्वे शास्त्रज्ञा अपि आत्मस्वरूपं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...नृसिंह
मनननग्रं
॥७१॥

जानंतिचेत्‌नजानंतुनामवेदांतशास्त्रज्ञाः आत्मानंजानंतुइतिचेत्‌॥
तिपि अमुमुक्षवोमुमुक्षवश्चेतिद्विविधाः तेषुअमुमुक्षवः चतुर्विधाः
लिकेइतिपृष्टे प्रयोजनार्थंकेचनपठंतिपूजार्थंकेचनपठंतिइतर
स्मत्तः प्रविष्टाः संतः वेदांतशास्त्रमर्मज्ञानार्थंदूषयितुंच वेदां
शास्त्रंकेचित्‌पठंतिप्रसिध्यर्थंकेचनपठंति॥एतेचत्वारोपि
वेदांतशास्त्रज्ञाअपिआत्मस्वरूपंनजानंति॥तर्हिचतुर्वि
धानांफलंकिमितिपृष्टे चतुर्विधेषुयेदूषणार्थंपठंतितेषांनर
कफलंतिर्यगादियोनिप्राप्तिश्चफलं॥अन्येषांतुत्रयाणांस्वर्गादिलो
कप्राप्तिश्चफलं॥मुमुक्षवोपिद्विविधाः प्रतिबंधसहिताः केचनप
ठंतिप्रतिबंधरहिताः केचित्‌पठंति॥तेषुप्रतिबंधसहिताः सं
तः येपठंतितेषांप्रतिबंधनिवृत्तौआत्मस्वरूपज्ञानंफलंयेप्राति

कालांतरे

वर्णक प१३
वाक्य

॥७१॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सघः ॥ तर्हि विरोधो नास्ति कथं तर्हि उच्यते ।

बंधरहिताः संतः पठंति तेषां आत्मस्वरूपज्ञानानंतरं मुक्तिफलं ननु पू
र्वं स्वस्वरूपं केचिन्न जानंती मुक्तं इदानीं लुभ्यति बंधरहिताः वेदांति
नो भूत्वा स्वस्वरूपं जानंती मुच्यते ॥ पूर्वोत्तर विरोध इति चेत्तर्हि प्रति
बंधरहिताः ये आत्मस्वरूपं जानंति ते [illegible] एव अतः आत्मानं केपि
न जानंती मुक्ते कोपि विरोधो नास्ति ॥ ननु पूर्वं स्वस्वरूपं स्वयं न जा
नंती मुक्ते अविरोधो नास्ति ॥ तर्हि स्वस्वरूपं अजानतां अज्ञान
केन गच्छतीति चेत् ॥ आत्मज्ञानेनैव गच्छति अन्येन केनापि गच्छ न ८
ति ॥ ननु आत्मज्ञानेनैव गच्छतीति किमर्थं वक्तव्यं कर्मणा गच्छति
ति चेत्तर्न कर्मणः अज्ञानस्य च विरोधाभावात् कर्मणा अज्ञानं न
शानं भवति ॥ तद्यथा दृष्टांतः घटस्य पटांतरं न निवर्त्तते तद्वत्
कर्म अज्ञानस्य विरोधी न भवतीति कर्मणा अज्ञानं न निवर्त
विरोधी न भवतीति घटेन घटांतरे २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीन्यासक
मननग्रंथ
॥७२॥

८ मु

२ अंधकारो न निवर्त्तते कर्मणा अग्रबलतराज्ञानवृध्यासप्राचीना

तिप्रत्युत अज्ञानस्यवृद्धिरेवभवति ॥ यथा अमावास्यां निशि मेघावर
णेन गाढांधकारे वृध्यासप्राचीनां ज्ञानं न निवर्त्तते ॥ कथं करोतीत्यु
क्ते स्पष्टं तं निरूपयामः ॥ यथा अमावास्यां अंधकारे मार्गे गच्छतः पुंसः
मनुष्य अभिमुखेनागतश्चेत् ब्राह्मण इति शूद्र इति न ज्ञायते मनुष्य इ
ति सामान्यतो जानाति ॥ तस्मिन्समये अन्योपि पशुः अभिमुखेना
गतश्चेत् स वृषभ इति गौरिति न जानाति सामान्यतः पशुरिति प्रवे
ति ॥ तस्मिन्समये मेघावरणे सति समेघः अंधकारवृद्धिं कृत्वा सा
मान्यतो ज्ञातमनुष्यादीन् सर्वात्मना न प्रसापयति ॥ तद्वत् कर्मापि
अज्ञानवृद्धिं कृत्वा आत्मानं सर्वात्मना न प्रसापयति ॥ ननु दृष्टांते
मेघावरणं अंधकारवृद्धिं कृत्वा मनुष्यादीन् सर्वात्मना न प्रसा
पयतीति प्रत्यक्षतया दृष्टं दार्ष्टांतिके तु कर्म अज्ञानवृद्धिं कृत्वा नि

वृत्तिक ९३
वाक्य

॥७२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोपलब्धिस्वरूपस्यात्मनः स्वरूपं कथं प्रख्यापयतीति पृष्टे न प्रख्यापयेत् नश्यते
वकथं मेघेन आवृत्ते निबिडांधकारे मणिपुस्तकशालग्रामरुद्राक्षा
दिपदार्थाः हस्ते लब्धा अपि अयं मणिः कांचमणिः वा समीचीनम
णिर्वेति इदं पुस्तकं वेदो वा शास्त्रं वेति अयं शालग्रामः सीतारामो नेर
वा लक्ष्मीनारायणो वेति अयं रुद्राक्षः षण्मुखो वा पंचमुखो वा वे
ति स्पष्टं यथा तथा नावगमयत्यंधकारः तद्वत्कर्मणावृच्छिन्नात्ल
मज्ञानं आत्मानं स्पष्टं न प्रख्यापयति॥ तर्हि अंधकारे मणिपुस्तका
द्यो हस्तलब्धा अपि यथार्थज्ञानं कदोदेति सूर्योदयानंतरं अंध
कारनाशे हस्ते विद्यमानमण्यादि यथार्थज्ञानं यथोदेति तद्वत्प्र
ष्टांतिके पि कर्मणावृच्छिन्नात्मज्ञानं अनात्मकार्यमपि आत्मज्ञा
ने नश्यति ततः आत्मा यथार्थतया एव प्रतीयते॥ ननु दृष्टांते सूर्यो

श्रीनृसिंह
मननग्रंथ
॥७३॥

दर्पणक ९२
वाक्य

दयेन किं निवर्त्तते किं तिष्ठंतीति शंकायां सूर्योदयेन मणिपुस्तका
दीनां स्वरूपाज्ञानहेतुभूत अंधकारमात्रं नश्यति मेघावरणं तु
तिष्ठति तत्र मेघावरणं केषांचिद्दुःखं जनयति केंचित्सुखं ज
नयति तत्र मार्गगच्छतां श्रमनिवृत्ता कृष्यादिप्रवृत्ता च सुखज
नकं वालशरीरे दुःखजनकं ॥ एवं दार्ष्टांतिकेपि गच्छति किं तिष्ठति
तु के निरूपयामः ॥ ज्ञानेन अज्ञानं नश्यति अज्ञानकार्याणि दे
हादीनि तिष्ठंति ॥ तर्हि देहादिषु तिष्ठत्सु ज्ञानिनां देहादीनि किं कु
र्वंति तु के सुखं दुःखं च कुर्वंति ॥ ननु अस्मिन् दृष्टांते मेघावरणं अं
धकारकार्यं न भवतीति कृत्वा अंधकारनाशानंतरं मेघावरणं ति
ष्ठतु दार्ष्टांतिके तु देहेंद्रियादीनि अज्ञानकार्याणीति कृत्वा कारणनाश

स्थानकर्त्ता रि

ढिया

पां३

॥७३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंतरंकार्यभूतदेहेंद्रियादिकंकथंतिष्ठेयुरितिउक्तेतिष्ठेयुरेवकथंदृष्टां
तपूर्वकंनिरूपयामःकुमारीवेषध्वीएकःदृष्टांतःभ्रमःएकःदृष्टांतः
इषुवेगःदृष्टांतःतत्कथमित्युक्तेकुमारीस्वकारणभूतमूलनाशा
नंतरमपितिष्ठत्येव॥एवंभ्रमोपिस्वकारणभूतअग्निनाशानंतर
मपितिष्ठत्येव॥एवंइषुवेगोपिस्वकारणभूतआकर्षणसंयुक्तज्या
इषुवेगनाशानंतरमपिइषुवेगःतिष्ठत्येव॥तद्वदेवप्रार्ब्धांतिकेपि
देहेंद्रियादीनांकारणीभूतअज्ञाननाशेपिदेहेंद्रियादीनितिष्ठंत्ये
वतेषांनाशःकदाभवतीतिचेत्दृष्टांतःमेघावरणस्यनाशार्थं
यथानियमोनास्ति॥तद्वदेवदेहेंद्रियादिनाशार्थंनियमोनास्ति॥
प्रारब्धंयदानश्यतितदैवदेहेंद्रियादिनाशःननुदृष्टांतमपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीन्त्यसिद्धि
मननग्रंथ
॥७५॥

वृत्ते त्वेन स्वरहि
...स्यात्मनः कर्तृ अभोक्तृत्वात्मनः भोक्तृ सुखदुःखस्यात्मनः २

वर्णक १२
वाक्य

तु पूर्वं ग्रंथकारस्य वृत्तिव्याप्यकं प्रसक्तत्वेन परस्यामः दार्ष्टांतिके तु ब्र
ह्मअज्ञानस्य वृत्तिव्याप्यकत्वेन न परस्यामः ॥ यथा कथं संभवतीत्यु
क्ते त्रिविधकरणेः क्रियमाणं कर्म अकर्तृ भर्त स्यात्मनः सुखदुः

३न

खादिमत्वेन च क्रियत इति कृत्वा एवमेव क्रियते अज्ञानस्य प्रा
पकमिति ज्ञातव्यं ॥ [illegible] ॥ तस्मा
त् अज्ञानस्य वृत्तिं कुर्वतु अज्ञानं नाशयितुं न समर्थे ॥ तर्हि इद

वृद्धि ४

मज्ञानं केन नश्यती सुक्ते आत्मज्ञानेन नश्यति अन्येन न नश्यति ॥
तर्हि इदमात्मज्ञानं केन प्राप्नोतीत्युक्ते विचारेणेति गृहाण ननु वि
चारेणज्ञानं प्राप्नोतीति किमर्थमुच्यते कर्मणैव प्राप्नोतु तत्र दृष्टां

न.४

तः साक्षात्तंडुलनिवारकत्वाभावेपि क्षुद्रच्छिकारिखेपितंडुल

॥७५॥

१ अग्निः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीनां विक्लेदनपूर्वकं अन्नादिरूपेण परिणाम्य पश्चात्क्षुन्निवारणसा
मर्थ्यं तद्वदेव दार्ष्टान्तिकेऽपि कर्मणः साक्षादज्ञाननिवर्तकसामर्थ्या
भावेऽपि अज्ञानवृद्धिकारित्वेऽपि चित्तशुद्धिद्वारा अज्ञाननिवर्तक
ज्ञानाकारेण परिणमय्य अज्ञाननिवर्तकसामर्थ्यमस्तीति चेत् ॥ न ॥ दृ
ष्टान्ते अग्नेः तण्डुलादीन् अन्नाकारेण परिणा[illegible]म्य क्षुन्निवारणसा
मर्थ्यं दृष्टमिति कृत्वा तत्रोक्तोऽर्थः संपन्नः दार्ष्टान्तिके उक्तोऽर्थो न संबो
भूयते कथं ॥ ज्ञानं नाम चित्तवृत्तेः अकर्त्राद्याकारेण परिणामः कर्म
तु चित्तवृत्तेः कर्त्राद्याकारेण परिणामहेतुरिति अज्ञानस्य नाश
नेन समर्थं तस्मात्कर्मणा ज्ञानं नोदेति ॥ किं तर्हि विचारेण विचा
रः कीदृशो [illegible]स्तुतो आत्मानात्मविचार इति ग्रहणात् तर्हि आत्मस

श्री अद्वैतसिद्धि
मननग्रंथ
॥७५॥

४ सहस्रभोजनादौ कृतेपि गंगासागरसंगमे सहस्रवर्षाणि अघमर्षण
स्नाने कृतेपि

ज्ञानं विचारसाध्यमेव नेतरसाध्यमित्यत्र दृष्टांतः क इति चेत्॥
अर्थनसंयुक्तगायत्री गुरूरूपेण उपलभ्यमानापि तादृशगायत्र्याः
अर्थविचाराभावात् ज्ञातुं न शक्यते॥ गायत्र्याः अर्थो ज्ञातव्य इति
मनसि निधाय सेतुस्नाने कृतेपि चाग्निमध्ये अयुतवर्षाणि
स्थितेपि चेदपि षोडशमहादाने कृतेष्वपि शतसंख्याकभूदाने कृ
तेष्वपि गायत्र्याः अर्थः ज्ञातुं न शक्यते॥ केन ज्ञातुं शक्यत इति
चेत् गायत्र्यर्थविदां निकटे गत्वा गायत्र्यर्थः कीदृश इति पृष्टे एता
दृशोर्थ इति गायत्र्यर्थविदः एनं बोधयंति तदनंतरमनुसारविचा
र्येत तादृशगायत्र्यर्थं यथा सम्यक् जानाति तद्वदेव दार्ष्टांतिकेपि
म तीर्थस्नानादिकरणेनो देति॥ आत्मानात्मविचारेणैव ज्ञा

ज्ञानी

वर्ण कथा २ २
वा
पत्र
॥७५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ जपः

नोदयइत्यर्थः सर्वानुभवसिद्धः॥ कथमित्युक्ते कर्मद्वारेति निरूपया
मः स्नानसंध्यावंदने औपासने स्वाध्यायः देवतार्चने अतिथिपूजा
वैश्वदेवतीर्थाटनादि चेत्यादिकर्माणि वयं यावदनुतिष्ठामः एव
कर्मकरणेन अस्मत्स्वरूपं अस्माभिर्न ज्ञातमेव॥ तस्मात्कर्मणे
न केषामपि आत्मज्ञानं नोदेति॥ विचारणात्मज्ञानमुदेतीत्यर्थः॥ दृष्टां
तांतराण्यप्युच्यंते॥ यथापुरुषः तिथिवारनक्षत्रयोगकरणानि कि
दृशानीत्युक्ते विचारयंति तिथिः अयं वारः इदं नक्षत्रं अयं योगः
इदं करणमिति विचारयति विचारणाभावे मया न विचारितं नास्ती
६ ति वदति तस्मादहं न जानामीति वदति॥ अहं संध्यावंदनादिकर्म न
कृतवान् तेन हेतुना मया न ज्ञातमिति वदति॥ अन्योपि दृष्टांतः य
था देवालये अभिषेकपूजानैवेद्यानि जातानीति पृष्टे विचार्य जा
न

६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीमन्तसिंह मननग्रंथ ॥७८॥

वर्णक ९२ वाक्य

तानीति वदंति विचारणाभावे मया न विचारितमिति वदंतित
स्मान्मया न ज्ञातमिति वदंति मया संध्यावंदनाग्निहोत्रादीनि
चन कृतं तेन हेतुना मया न ज्ञातमिति वदंति अनेन प्रकारेण लो
के सर्वप्राणिभिः पि वस्तु विचार्यते तत्तद्वस्तुज्ञानं तेषां यथार्थ
त्वं प्राप्नोति कर्मादिभिः केषां तत्तद्वस्तु॥ ज्ञानं न प्राप्नोति तद्वद्द्व
दृष्टीति केपि आत्मज्ञानं सर्वप्राणिनां विचाररूपेव प्राप्नोति क
र्मोपासनादिस्तु न प्राप्नोति किंतु न तु कर्मणा ज्ञानोत्पत्तिरि
ति श्रुतयः॥ एवं ति कर्मणा ज्ञानं नोदेतीति किमर्थमुच्यते
श्रुतौ भावे व्यर्थं स्यादिति चेत्॥ कथमिति चेत् कर्मैक दूरा
एव ज्ञानस्य साधनं भवति अतः श्रुतिविरोधो न भवति॥

१ परंपरा १० सर्वकर्मैव ज्ञानस्य साधनं न भवति॥

CC-0. In Public Domain. Kavikulaguru Kalidas Sanskrit University Ramtek Collection

तर्हि कर्म किंप्रविध्यमित्युक्ते लौकिकवैदिकभेदेन द्विविध्यं तत्रापि
[illegible] लौकिककर्म जीवेहेतुरिति तस्मात्
कर्मणः ज्ञानं नोदेति ॥ द्वितीयं वैदिकमपि कर्म पंचविध्यं ॥ नित्य
नैमित्तिककाम्यनिषिद्धप्रायश्चित्तभेदात् ॥ तत्र काम्यकर्मणा
ज्ञानं नोदेति स्वर्गादिमात्रप्राप्तिः ॥ निषिद्धकर्मणा च कालसूत्रादि
नरकप्राप्तिः ॥ प्रायश्चित्तकर्मणा च उक्तरूपस्य कर्मण्यधिकारित्वं
संपाद्यते प्रत्यवायनिवृत्तिश्च भवति नित्यनैमित्तिकाभ्यामपि सा
त्विककर्म राजसकर्म तामसकर्मेति त्रैविध्येन राजसतामसाभ्यां
जन्मोत्पादनात् सुखदुःखकरत्वं कदाचिज्जायते कदाचिन्नेति
ताभ्यां राजसतामसकर्मभ्यां ज्ञानं नोदेति अवशिष्टेन सात्वि

सर्वकर्मैव ज्ञानस्य साधनं न भवति अतः श्रुति विरोधो न भवति ॥

नै २

क कर्मणा च चित्तशुद्धिद्वारा ज्ञानपरंपरासाधनत्वं संपाद्यते नित्य
नैमित्तिकरूपसात्विककर्मणा च चित्तशुद्धिं संपाद्य नित्यानित्यव
स्तुविवेकः ॥ संपाद्यते तद्द्वारा इहामुत्रार्थफलभोगसंपाद्यते तद्द्वा
रा शमादिसंपत्तिः ॥ तद्द्वारा मुमुक्षुत्वं ॥ तद्द्वारा सद्गुरुलाभः तद्द्वा
२ रा श्रवणमनननिदिध्यासनतत्त्वसाक्षात्कारेति कर्मैकदेशेन परं
परया ज्ञानोत्पत्तिं प्रति साधनत्वं संपाद्यते विचारेण तु साक्षादेव सा
धनत्वं संपाद्यत इत्यत्र दृष्टांतः क्षुधितस्य पुरुषस्य पाकान्नं साक्षादे
व क्षुन्निवारणे समर्थं कृषिबीजावापनादि तु परंपरासाधनं तद्वदे
व विचारोऽपि ज्ञानस्य साक्षात्साधनं कर्मैकदेशस्तु परंपरयेति सिद्धं ॥
यदा अनेन प्रकारेण अज्ञानस्य स्वरूपं च सम्यग्विचारितं तादृशात्मा
त्मा स्वयमिति यो जानाति स जीवन्मुक्तः ॥ स एव विद्वान् स एव योगी
स एव सच्चिदानंदस्वरूपं ब्रह्मेति शास्त्रसिद्धांतः ॥ इति त्रयोदशाव ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरभ्यते

॥श्रीगणेशायनमः॥श्रीलक्ष्मीनृसिंहायनमः॥अतःचतु
र्दशवर्णकौ॥ज्ञानाज्ञानेविचार्येते कारणे बंधमोक्षयोः॥अनु
ग्रहार्थंलोकानांमयाशास्त्रंप्रदर्श्यते॥१॥ज्ञानस्वरूपमज्ञान
स्वरूपंनिरूप्यते॥ज्ञानंनाम॰ अज्ञानंनामकीदृशमित्युक्ते
स्वस्वरूपस्ययथार्थतयाज्ञानंज्ञानशब्दवाच्यं॥अहमेवब्र
ह्मेतिज्ञानमित्यर्थः॥अहंमनुष्यइत्यादिज्ञानं॥किंचज्ञा
नाज्ञानेसम्यक्निरूपयामः॥अद्वितीयमात्मानंसद्विती
यत्वेनजानाति॥अपरिच्छिन्नमात्मानंपरिच्छिन्नत्वेनजानाति
असंगमात्मानंसंगित्वेनजानाति॥अकर्तारमात्मानंकर्तृत्वेन
जानाति॥अभोक्तारमात्मानंभोक्तृत्वेनजानातिइदमज्ञानं॥

विशेषेण नहि ईश्वरस्य ज्ञाता: मीमांसकादय: रामानुजाश्च ...
द्वयोगुणयोरीत्या अग्नौ कुर्वन्ति ... कस्यचित्स्वरूपस्य आत्मनः सुखत्वमपि कुर्वन्तीति एते ...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मननग्रंथ श्रीनृसिंह ॥७८॥

ज्ञानं तु एतद्विपरीतं ॥ अद्वितीयमात्मानं अद्वितीयत्वेन जानाति एव
मपरिच्छिन्नमात्मानं अपरिच्छिन्नत्वेनैव जानाति असंगमात्मानं
असंगत्वेनैव जानाति ॥ एवमकर्तारमात्मानं अकर्तृत्वेनैव जानाति ॥
अभोक्तारमात्मानं अभोक्तृत्वेनैव जानाति ॥ इदं ज्ञानं ॥ तर्हि ज्ञानं ॥
तर्हि अद्वितीयमात्मानं सद्वितीयत्वेन ज्ञानं अज्ञानमिति श्रीमद्भि
रुच्यते। तथा सद्वितीयत्वेन प्रतीयते वा इति पृष्टे प्रतीयत एव क
थमिति अहमिति अयमिति देवदत्त इति यज्ञदत्त इत्यादि अनेक
विधत्वेन यत् प्रतीयते तदेव अज्ञानं अपरिच्छिन्नमात्मानं परिच्छि
न्नत्वेन ज्ञानं अज्ञानमित्युक्तं तथा परिच्छिन्नत्वेन प्रतीयते वा इ
ति पृष्टे ॥ अस्मिन् ग्रामे अहं अवास तस्मिन् ग्रामे नावसं अस्मि

वर्णकशर्ष वाक्य ॥७८॥

नगेहे अवसं तस्मिन् गृहे नावसं अस्मिन् देशे आवसं तस्मिन् दे
शे नावसमिति पृच्छिनत्वेन यज्ज्ञानं तदेव अज्ञानं ॥ तर्हि अस्मे
गमात्मानं संगित्वेन यज्ज्ञानं तदेवाज्ञानमित्युक्तं तथा ॥ कुत्रापि
तैः सह तिष्ठसि तैः सह तिष्ठामः ॥ एतैः सह न तिष्ठामः ॥ मात्रा
सह तिष्ठामः ॥ पित्रा सह न तिष्ठाम इत्यादिप्रकारेण संगित्वेन यज्ज्ञा
नं ॥ तदेव अज्ञानं तर्हि अकर्तारमात्मानं कर्तृत्वेन यज्ज्ञानं तदेवा
ज्ञानमित्युक्तं एवं कुत्रापि संभवति वा इति पृच्छे अहं स्नातवानस्मि ॥
अहं संध्यावंदनं कृतवानस्मि अहं जपं कृतवानस्मि अहं उपास
नमाचरितवानस्मि अहं अग्निहोत्रादि कृतवानस्मि ॥ अग्निष्टो
मं कृतवानस्मीत्यादि कर्तृत्वज्ञानमेव अज्ञानं ॥ तर्हि अभोक्तार
मात्मानं भोक्तृत्वेन यज्ज्ञानं तदेवाज्ञानमित्युक्तं तत्कथं संभवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य

मुक्तं अहं अनंतमुन स्मि अमृपोनभुंजीमहे इत्यादिभोक्तृत्वेन परशोनंतत्वे
वाज्ञानमितिसिद्धं ॥ तर्हि अद्वितीयं आत्मानं ॥ अद्वितीयत्वेन पश्चानं ॥ ततु आ
नमित्युक्तं ॥ तत्कथं संभवती मुक्ते आत्मनः अद्वितीयत्वेन परशोनंततत्वे आ
त्मनि अद्वितीयत्वसंभवादेवप्रतीयत इतिवक्तव्यं ॥ आत्मनः अद्वितीयत्वंक
थशामित्युक्ते सजातीयविजातीयस्वगतभेदरहितत्वमेव अद्वितीयत्वं ॥
तथैव वृक्षांतेपि यथा वृक्षस्य सजातीयविजातीयस्वगतभेदाः ॥ तेषां वृक्ष
णां भेदो स्तीत्युक्त्वा प्रदर्श्य च ॥ दार्ष्टांतिके आत्मनि सजातीयविजातीय
स्वगतानि तेषां भेदः अनसंतीति श्रुतयो नु जशिरेनु आत्म
नि सजातीयविजातीयस्वगतानि तेषां भेदः अप्रसक्ताः को किल आ
त्मनः सजातीयविजातीयस्वगतानि तेषां भेदः अनसंतीति श्रुतयः अनु
शास्त्रप्रसक्ताः एवं कथं वस्तुत्वसाम्यप्रतीतेः ॥ आत्मस्वरूपं यत्किंवस्तु
अनात्मेत्यत्किंवस्तु इतियाप्रतीतिः ॥ तत्तद्वस्तुत्वसाम्यं तादृशो अनात्म
वस्तुनि सजा

॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीयविजातीयस्वगतानि तेषां भेदाश्च सन्तीति। [illegible]

ना तादृशे आत्मनि सजातीयविजातीयस्वगतानि तेषां भेदाश्च प्रसक्तिं
बभूवुः। तस्मात् आत्मनि सजातीयविजातीयस्वगतानि तेषां भेदाश्च न सन्ती
ति श्रुतिरवगम्यते। तादृशश्रुतिसमन्वयेन अयमर्थः॥ अस्माकं बुद्धौ क
थं संतिष्ठत इति विचार्यमाणो संतिष्ठत एव। आत्मा नाम सद्रूपः किल॥ तादृ
शसद्रूपस्यात्मनः सदन्तरं नास्ति। अतः सजातीयतद्भेदश्च नास्त्येव एवं अहं
तिष्ठामि। अयं तिष्ठति देवदत्तस्तिष्ठति। पृथिवी सती। आपः सत्यः तेजः स
त् वायुः सन् आकाशः सन् एकस्यैव सतः अनेकभेदेन प्रतीयमानत्वात् (
आत्मनः सजातीयं तद्भेदश्च नास्तीति कथं कथं वक्तुं शक्यत इति चेत्। सर्वे
ति। व सन्तः एकरूपेणैव तिष्ठन्ति किल। तस्य भेदो नास्तीति श्रीमद्भिरुक्तः। तथाहि प
२ टः घटः इति सर्वेषु घटेषु एकरूपेण प्रतीतेः। तत्रापि भेदो नास्तीति प्रती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यापत्तेः। सततः एकरूपत्वेन सजातीयं तद्भेदश्च नास्तीति वक्तुं न शक्यत इति
२ण्यं चेत् तादृशघटादौ आकारवैलक्ष्यं तिष्ठतीति तत्र सजातीयं तद्भेदश्चैः स्यै अ
व। सद्वस्तुनः आत्मनस्तु आकारवैलक्षण्याभावात् सजातीयं तद्भेदश्च नास्त्येवे।
तस्मात्सद्रूपस्यात्मनः सजातीयं तद्भेदश्च नास्तीत्यङ्गीकरणीयमेव। तर्हि सद्रू
पस्यात्मनः विजातीयं विजातीयभेदश्च अस्ति चेद्ब्रूषे। तर्हि अस्ति नास्ति वेति
विचारयामः। आत्मा तावत् सद्रूपः। तादृशसद्रूपस्यात्मनः किं विजातीयमि
त्युक्ते असद्वस्तुप्रपंचः तादृशप्रपंचस्य शशविषाणतुल्यत्वात् असत
तादृशस्य असद्रूपप्रपंचस्य सद्रूपमात्मानं प्रति सद्वितीयत्वं संपादने सा
मर्थ्याभावात्। यतः असत्वंध्यापुत्रः स्वमातरं पुत्रवतीत्वं संपादयितु
मसमर्थः। तथाऽसद्रूपप्रपंचः सद्रूपमात्मानं प्रति द्वितीयत्वं संपादयितुम
समर्थः। तस्मात्सद्रूपस्यात्मन विजातीयं तद्भेदश्च नास्तीति सिद्धं। तर्हि स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्चिदानंदात्मनः स्वगतं तद्भेदश्च प्रतीयतामिति स्फुटेन प्रतीयत एव ॥ ननु
वृक्षस्य पत्रपुष्पफलादिभिः संप्राप्तस्वगत तद्भेदश्च यथास्ति । तद्वदात्मनः स
च्चिदानंदैः स्वगतं तद्भेदश्च प्रत्यक्षेण प्रतीयत इति चेत् । तादृशवृक्षस्य स्वगतं
तद्भेदश्चास्ति । दार्ष्टांतिके आत्मनस्तावत्सच्चिदानंदाः स्वरूपमेवेति शब्द
मात्रेणाभेदप्रतीतावपि तादृशास सच्चिदानंदैः प्रत्यक्षेणभेदो न प्रतीयत इति
तादृशास सच्चिदानंदैरात्मनः स्वगतं तद्भेदश्च नास्त्येव ननु सच्चिदानंदानां श
ब्दमात्रभेदेन हस्तकरपाणिशब्दाइव पर्यायशब्दाइव न भवंतीति । शब्दभे
देन अर्थभेदोस्तीति सच्चिदानंदानां भेदोस्ति । तस्मात्सच्चिदानंदैरात्मनः
त स्वगभेदोस्तीति चेत् । सच्चिदानंदानां शब्दभेदश्च अर्थभेदश्च अस्ति चेद
पि तादृशास सच्चिदानां भेदो नास्तीति दृष्टांतपूर्वकं निरूपयामः । यथाग्नेरो
हितमिति उष्णमिति प्रकाशइति त्रिधास्ति । एते त्रिविधरोहितोष्णप्रकाशरूपाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सच्चिदानंदेऽह्यखंडो

शब्देन भिन्ना अपि अर्थतो भेदप्रतीतावपि हस्तकरपाणि पि शब्दवत् पर्यायत्वा
भावेपि अग्निस्वरूपमेव बभूवु:॥ तद्वत् सच्चिदानंदा अपि अर्थतो भेदप्रतीताव
पि हस्तादिशब्दवत् पर्यायत्वाभावेपि आत्मस्वरूपमेवेति सिद्धं॥ दृष्टांतेऽ
ग्नेरेव स्वरूपं रोहितादय:॥ तेषां एकस्मिन् समये प्रत्यक्षेण प्रतिबंधदर्शना
त्॥ उष्णत्वं गुणत्वं च वक्तुं शक्यं। दार्ष्टांतिके तु आत्मनि सच्चिदानंदानां स
र्वात्मना भेदस्य वक्तुमशक्यत्वात्॥ श्रुतिविरोधात्॥ आत्मनो निरवयवत्वा
त्॥ सच्चिदानंदानां भेदो वक्तुं न शक्यते॥ अत: अखंडत्वे अद्वितीयत्वे कथ मेव
मित्युक्ते सदेव स्वत: प्रतीयते अत: तदेव चिद्रूपं जातं तदेव चिद्रूपं सद्रू
पं वस्तुस्वरूपं॥ सत: द्वितीयं नास्त्येवेति तदेवानंदस्वरूपं। तस्मात्सच्चिदा
नंदानां भेदाभावात्॥ आत्मन: अद्वितीयत्वं सिद्धं॥ ननु श्रुतियुक्त्यनुभ
वाभावे। इदानीं उक्तमात्रेण आत्मा अद्वितीय इति। कथं बुद्धो आरूढम्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[१ना]
विचारसमयेबुद्धौअवरोहयत्येवेतिप्रस्फुत्तरं।कथमित्यत्रकेयत्तदस्तीति
तत्विद्यमानमस्तित्वेतिवक्तुंनशक्यमितिसदेववस्तुअस्त्येवेत्यर्थेसंदेहोनास्ति
तादृशंप्रतीयतेनप्रतीयतेवेत्यत्रअप्रतीयमानंवस्तुअस्तीतिव्यवहारस्यवि
षयोनभवतीतिसद्वस्तुप्रतीयतएवेतिवक्तव्यं।तादृशंप्रतीयमानंसद्वस्तुअ
न्येनकेनचित्प्रतीयतेवास्वतएव।स्वतएवप्रतीयतइत्यत्रतादृशसदेववि
द्रूपत्वेनसिध्यति।अन्येनप्रतीयतइत्यत्र।तादृशसत्प्रापकमन्यत्सदंतरं
वासच्चिल्लक्षणंवेतिप्रष्टे।सदंतरमित्युक्तेसदंतरमपिस्वयंनिरूपंसत्
तादृशसत्प्रकाशयतिवेतिविचारेतादृशसत्केनचिदन्तिकंप्राप्तंस
त्प्रकाशयतिवानोचेत्।स्वतएवेतिचार्यंप्राप्तंसत्प्रकाशयतिवाइति
विचारे।तादृशास्तस्वरूपंसद्रूपंनतत्प्रकाशकंसदंतरंतदपेक्षयानिरू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मनने॰प्र॰१
८२

सत्त्वसद्रूपभासमानं प्रकाशयतीत्युक्तौ सूर्यापेक्षया निकृष्टो दीपो सूर्यं प्रति
प्रकाशकः स्यात् तथा तु न दृश्यते। तस्मात् तादृशसदंतरं सदपेक्षया निकृष्टं स
त् तादृशसतः प्रकाशयतीति वक्तुमशक्यं। तर्हि तादृशसदंतरं सद्रूपात्मना
समानमेव सत् तादृशसद्रूपभासमानं प्रकाशयतीति चेन्न। दीपस्य समानदी
पांतरं तादृशदीपं प्रकाशयतीति समानमेवोत्तरं। तस्मात्तादृशसदंतरं सद्रू
पात्मना समानं सत्त्वसद्रूपभासमानं प्रकाशयतीति चेत्तु मशक्यं। तर्हि तादृश
सदंतरं केनचित् अतिशयं प्राप्तं सत्त्वसद्रूपभासमानं प्रकाशयतीति चेन्न। ता
दृशसदंतरस्य प्रकाशातिशयसंपादकवस्तु सद्वासद्वेति वक्तुमशक्यत्वात्
तथाहि सद्वस्तु चेत्। तत् स्वप्रकाशो वा अप्रकाशो वेति निरूपयितुमशक्यं। स्वप्र
काशमिष्टं चेत् स्वप्रकाशरूपसद्वस्तु चिद्रूपं जातमिति। सद्रूपस्य स्वप्रकाशत्वाद्धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीमत्वं च वेदांतसपेक्षया ॥ अन्येनांगीक्रियते इति स्वस्वरूपं स्वप्रकाशकस्य स
दंतरस्य प्रकाशातिशयं संपादयितुं । सद्रूपं स्वप्रकाशमिति वक्तुमनर्हं तर्हि अन्य
वस्तुना अतिशयं प्रापितं सत्ता तादृशं सदंतरं आत्मस्वरूपसद्रूपं प्रकाशयति
इत्युक्ते अन्यवस्तूनां असत्त्वात् । तादृशासदेवेति तथा वक्तुमर्हं । आत्मस्वरूप
स्य सतः प्रकाशातिशयसंपादकं सदंतरं स्वप्रकाशाय संपादकं सत् अन्यदे
वेति वक्तव्यं । तथोच्यमाने तादृशं सतः प्रकाशातिशयसंपादकं सत् अन्यदे
वेति अन्यावस्थादोषः ॥ सतः अप्रकाशत्वं प्राप्नोति । अद्वितीयवादिनः अ
परिहार्यपाशनिपातप्राप्तिर्भविष्यति । लोके किंचिद्वस्तु अतिशयसं
पादकं स्वयमतिशयितं सदेव प्रकाशयति । न सेतिशयितं किं तर्हि अन्या
दृशं तथा दृष्टमिति । पक्षत्रयमपि वक्तुमनर्हं ॥ सद्वस्तु प्रकाशयितुं सदंत
रं स्वतः प्रकाशं सत् तादृशसद्रूपमात्मानं प्रकाशयतीति वक्तुं शक्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमुच्यमाने स्वप्रकाशमेव सद्वस्तु चिद्रूपमेव सिद्धं ॥ ननु एवं लोके आकाश
स्य च उपाधिं विना सत्ता द्वयं निरूपयितुं अशक्यमिति ॥ निरुपाधिकं स
देव अद्वितीयमित्यादिभिर्निरूपितमिति ॥ स्वप्रकाशे आत्मस्वरूपं स
त्स्वप्रकाशात् इति वक्तुमशक्यं किं तर्हि आत्मस्वरूपं सदेव स्वप्रकाशमस्ती
ति तदेव चिद्रूपमिति सिद्धं । एवमनुक्तापि घटादीनां विलक्षणदीपादिदीपादिभिः
घटादय इव ॥ सतो विलक्षणवस्तूनां सद्रूपं प्रकाशात इति उक्ते । दृष्टांते घ
टादयः दीपादयश्च समानसत्ताकास्तिष्ठंतीति ॥ तादृशघटाद्यपेक्षया
तादृशदीपादीनां प्रकाशत्वं प्रसिद्धं सिद्धं ॥ तस्मात् दीपादिभिः घटाद
यः प्रतीयते ॥ दार्ष्टांतिके तु सतः विलक्षणवस्तु असदेवेति तस्य वस्तुत्वं
वक्तुमशक्यं ॥ तस्मात् सद्विलक्षणेन असतः सत्त्वस्थापनं वक्तुमशक्यं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकेऽपवरकादिषु अविद्यमाना दीपादिनिर्वाभ्रांत्या प्रतीयमान दीपाद

नेकेनवा घयादय: प्रतीयंते इति यथा वकुमराक्यं। तद्वदेव सदपेक्षया विल

क्षणेन असत्ता सत्प्रकाशमिति वकुमराक्यं। लोके सत्प्रकाशापकपदार्थः कोपि

नास्तीति समस्तपदार्थाः सद्रूपे आरोपिताः इति ते पदार्थाः सद्वस्तुरूपजीव

नेन वर्तंत इति॥ सद्वस्तु स्वप्रकाशमेव तादृशस्वप्रकाशसद्वस्त्वेव चिद्वस्तु ता

दृशसद्वस्त्वेवाद्वितीयवस्तु सप्रीचीनं जातमिति॥ तादृशचिद्रूपसदेव आ

नंदरूपं॥ लोके द्वितीयवस्तु विद्यमानं न जातमेव तादृशवस्त्वेव आनंद

लयातिष्ठतीति। कुत्रापि दृष्टं वेसको। दृष्टमेव॥ तत्कथमित्युक्ते। सुषु

प्तौ द्वितीयवस्तु नास्तीति तत्सुखानंदनरूपं॥ जाग्रत्स्वप्न सुषुप्तितायमस्ती

तिदुःखमेव प्रतीयते। जाग्रदवस्थायाः एकांतसमये च द्वितीयवस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मनन
८५
न
स्म

प्रकरण १४८

संधानेन क्रियते चेत्सर्वेषामानंदमेव प्रतीयते ॥ एकांते विद्यमानः पुरुषः द्वि
तीयवस्त्वभयरहितेन सुखेन स्थितश्चेदपि अवशेन द्वितीयवस्तुसंभावनां केचने
शब्दे वा श्रुते किंचिद्रूपं वा दृष्ट्वा भयकंपादीननुभवति ॥ द्वितीयवस्तुप्रतीत्या भ
यमिति श्रुतिराह ॥ तस्मात्सुषुप्तौ द्वितीयवस्तुप्रतीत्यभावादात्मा आनंदरूपेण ति
ष्ठति ॥ तादृशसुषुप्तौ विरपि तस्मिन्नात्मनि ऐक्यं कल्पिता ॥ कथं रज्ज्वां सर्पो दिव
आनंदव्यतिरिक्तं न भवतीति । तस्मादात्मैव कालत्रयेऽपि सत्तीतिहेतोः सदे
व प्रकाशं सन्तिष्ठतीति । चिदिति द्वितीयवस्तुसध्रीचीनं न जानातीति आनं
द इत्युच्यते ॥ तस्मात्सद्रूपस्यात्मनः सदंतरं नास्तीति । सजातीयतद्भेद
श्च नास्त्येव । विजातीयमसदेवेति विजातीयतद्भेदश्च नास्त्येव । उक्तयु
क्तिभिः सदेव चिद्रूपं चिदेव आनंद इति स्वगतं स्वगतभेदश्च नास्त्येव ॥ त

१८४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मादात्मनः सजातीयविजातीयस्वगतभेदाः न संतीति। आत्मा अद्वितीय एवे
ति श्रुतिराह। सुषुप्त्यानुभवसिद्धमेवैतत्॥ तादृश आत्माहमिति मुमुक्षुः
सर्वदा जानीयात्॥ ननु आत्मा अद्वितीय इति नाहाश्रुत्या यथा उच्यते तद्वदात्मा
परिपूर्ण इति च श्रुत्या उच्यते इति आत्मनः परिपूर्णत्वं यथेति विचारयामः। आत्मनः प
रिपूर्णत्वं नाम व्यापकत्वं विभुत्वं वा अपरिच्छिन्नत्वं वेति विचारे। अपरिच्छिन्नत्वमेव
परिपूर्णमेवेति वक्तव्यं॥ किमर्थमिति चेत् व्यापकत्वमेव परिपूर्णत्वमित्युक्ते स्वका
र्यानुस्यूतत्वं किल व्यापकत्वं॥ तत् पृथिव्यादीनामप्यस्तीति व्यापकत्वं परिपूर्णत्वमि
ति वक्तुं न शक्यते। एवं विभुत्वमपि सर्वमूर्तद्रव्यसंयोगित्वं तत् आकाशादीनामप्य
स्तीति विभुत्वमपि परिपूर्णत्वं न। तस्मात् अपरिच्छिन्नत्वमेव परिपूर्णत्वं॥ इदं प अ
रिच्छिन्नत्वं परिच्छिन्नपृथिव्यादीनां नास्त्येव। आत्मनस्तु इदं व्यापकत्वं विभुत्वं अ
परिच्छिन्नत्वं चास्ति॥ कथं पृथि×काशा×व्यादीनां स्वकार्येषु चतुर्विधभूतग्रामेषु
अनुस्यूतत्वं यथास्ति तथात्मनः स्वकार्ये प्रपंचे अनुस्यू[illegible]स्तीति व्यापकत्वमस्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
प्रनेन
८५

हेतो

प्र०१४

व। आकाशादीनां सर्वमूर्त्तद्रव्यसंयोगित्वं यथास्ति। न तथात्मनोपि सर्वमूर्त्तद्रव्य
संयोगित्वमस्तीति। विभुत्वमस्त्येव। तर्हि व्यापकस्वरूपं आत्मा विभुरिति व
क्तव्ये। आत्मनस्साद्वितीयत्वे इति अपरिछिन्नत्वमेव परिपूर्णत्वमिति वक्तव्ये ॥
हर्षप्रतिपादितमद्वितीयत्वमेव। अपरिछिन्नत्वमित्युक्ते अद्वितीयत्वमेव
अपरिछिन्नत्वं। भवति चेत्तदपि विशेषेण विचारयामः॥ कथमित्युक्ते त्रिविध
परिछेदस्य शून्यत्वमेव अपरिछिन्नत्वं तर्हि आत्मनः परिछेदकस्वरूपं त्रिवि
धं किमित्युक्ते। देशकालवस्तुचेति। एतादृशदेशकालवस्तुभिः। आत्मनः
परिछिन्नत्वं प्रसक्तं वेत्युक्ते। अनादिभ्रांत्या प्रसक्तं॥ कथं प्रसक्तं। अस्मिन् देशे
अवसं। तस्मिन्देशे नावसमिति देशेन अहं अस्मिन् संवत्सरे तिष्ठामि इति काल
तः। इदं वस्त्वहं तद्वस्तु नाहमिति वस्तुतः। आत्मा परिछिन्न इति भ्रांत्या प्रती
यते। इदं परिछिन्नत्वं विचारिते चेन्नास्ति। कथं नास्तीत्युक्ते आत्मा व्या

८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पक इति। आत्मनः देशेन परिछिन्नत्वं नास्त्येव। नित्यत्वादात्मनः कालतो परि
छिन्नत्वं नास्त्येव। सर्वात्मकत्वादात्मनः वस्तुतोपरिछिन्नत्वं नास्त्येव॥ नन्वा
त्मनः त्रिविधपरिछेदशून्यत्वं अपरिछिन्नत्वमिति किमर्थमित्याशंकायां देशतः प
रिछिन्नत्वाभाव एव आत्मनः अपरिछिन्नत्वमित्येवोक्ते आकाशस्यापि व्यापकत्वा
त्तस्याप्यपरिछिन्नत्वसद्भावात् अखंडत्वमापद्यते॥ तन्निवारणाय कालतोप्यपरिछि
न्नत्वं वक्तव्यं आकाशस्य उत्पत्तिमत्वान्नाशवत्वाच्च॥ कालतः परिछेदाभावात्। तर्हि
कालतः परिछेदाभाव एव। अखंडत्वमित्युक्ते। कालस्यापि विभुत्वात्। देशतोप्यप
रिछिन्नत्वात्। स्वेन स्वस्य परिछेदाभावेन कालतोप्यपरिछिन्नत्वात्। कालस्य देश
तः कालतश्च अपरिछिन्नत्वमस्त्येव॥ कालस्यापि देशतः कालतः परिछेदराहित्या
दपरिछिन्नत्वमापद्येत॥ तन्निवारणाय वस्तुतोपरिछिन्नत्वमंगीकार्यं॥ तर्हि कालस्य व
स्तुतः परिछिन्नत्वमस्ति। अस्त्येव कथमित्युक्ते। आकाशः कालो न भवतीति वस्तुतः परि
छिन्नत्वमस्त्येवमुच्यमाने आत्मनोपि वस्तुतः परिछिन्नत्वं प्रतीयते। केन प्रतीयत इत्युक्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मसिद्धि
ननग्रं°
८६

घ

कः। आत्मा व्यापकस्तिष्ठतीति। नित्यस्तिष्ठतीति। आत्मनः देशतः कालतश्च परिछेदराहि
त्येपि ...मानेपि आत्मा आकाशादिवस्तु न भवतीति॥ आत्मनः परिछिन्नत्वं प्रतीयत इति
चेत् तेनापि तादृशपरिछिन्नत्वं आत्मनो नास्त्येव। कथं। आकाशः काल एवेति वायुः का
ल एवेति तेजः काल एवेति आपः काल एवेति व्यवहाराभावात् कालमुपजीव्य आकाशा
दयः न संतीति आकाशादिवत् कालोपि अविद्यपरिणाम इति व्यवहारो। आकाशाद
नां कालः भिन्नसत्ता एवेति प्रतीयते। तस्मात् घटादिभिः घटादीनां परिछिन्नत्वं यथाप्र
त्यक्षं तथैव आकाशादिभिः कालस्य परिछिन्नत्वं प्रत्यक्षेण दृश्यते। तस्माद्वस्तुतः
कालस्यैव परिछिन्नत्वं युक्तमेव। आत्मनि तु न विद्यामः॥ आत्मा आकाशादिभिः भिन्नव
त्प्रतीतोपि सद्वस्त्वेव आत्मेति॥ तादृशात्मस्वरूप सद्वस्तूपजीवनेन आकाशादयः ति
ष्ठंतीति [illegible]दिष्वारोपितसर्पादयः तादृशरज्ज्वाद्यपेक्षया परिछेदकाः न। आत्म (तथा)
न्यारोपिताकाशादिवस्तु आत्मस्वरूपसदपेक्षया न संतीति। आत्मनः परिछेदको
न भवंत्येव। आत्मनः वस्तुतः परिछेदो नास्तीति युक्तमेव। ननु तर्हि देशः कालश्च

८६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्तुभूतत्वेवर्तते इतीति वस्तुतः परिच्छेदराहित्यमेव। आत्मनः अपरिच्छिन्नत्वमिस्फले
नालं किमितिपृष्टे अलमेवेस्फुत्तरं। तथापि लोके कालदेशयोः आकाशादीनामि
व वस्तुत्वप्रसिद्धिर्नास्तीति आत्मनः स्वतसिद्धव्यापकत्वे। स्वतसिद्धनित्यत्वे। स्वतसिद्धस
र्वात्मकत्वं च अनाद्यज्ञानेन प्राप्तदेहेंद्रियाद्यध्यासान्न प्रतीयत इति। तादृशभ्रांति
निवृत्त्यर्थं आत्मनः त्रिविधपरिच्छेदशून्यत्वमेव अपरिच्छिन्नत्वं॥ तदेव परिपूर्णत्वं।
तदेव अखंडत्वं तदेव अद्वितीयत्वमिति श्रुत्यादिभिरुच्यते॥ अनेन प्रकारेण विचार्य
माणो तादृशपरिपूर्णो आत्माहमिति यो जानाति स एव मुक्त इति वेदांतसिद्धांतः॥ इतः
परं आत्मनो असंगत्वं विचारयामः ननु आत्मनः संगित्वप्रसक्तौ किल आत्मनः असंग
त्वं कथमिति विचार्यते। विचारेण निरस्यमानं संगत्वमात्मनः अस्तीवेति पृष्टे भ
त्स्येव कथमिस्फले। आत्मा प्राप्तदेहाद्यध्यासेन आत्मनः संगित्वं प्रतीयते। किंच तेषु
ष्वस्ति स्वामीति संगित्व प्रतीयते विचारेण आत्मा अद्वितीय यदा ज्ञानाति तदेव द्विती
यवस्तु नास्तीति आत्मनः संगित्वं निरस्यते। परमार्थतः आत्मा अद्वितीय इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असंगः तिष्ठतीति चेदपि व्यवहारे संगिवत्प्रतीयमानस्यात्मनः असंगत्वं कथं सं
घटते स्फटिके तद्दृष्टांतपूर्वकत्वेन विचारयामः ॥ रज्ज्वादावारोपितसर्पादिभिः सह
तादृशरज्ज्वादीनां कालत्रयेपि यथा संगित्वं नास्ति तद्वदात्मन्यारोपितदेहेंद्रि
यादिप्रपंचेन सह आत्मनः कालत्रयेपि संगित्वं नास्त्येव ॥ किंच लोके सावय
वत्वेन विद्यमानपदार्थैः संयोगो दृष्टः न निरवयवस्य सावयवैः सह कालत्रयेपि सं
न गित्वं पश्यामः ॥ कथमिति स्फटिके प्रदर्शयामः ॥ परमते निरवयवत्वेन संमताद्
नामाकाशादीनां पृथिव्यादिभिः सह संगं न जानीमः ॥ संगित्वमपि चेद्वृक्षे ज
लादिभिः सह संगत्वेन वस्त्रादीनां आर्द्रादिकं यथा प्राप्नोति ॥ तद्वदाकाशेग
दीनामपि पृथिव्यादिभिः सह संयुक्तत्वप्रतीयमानत्वेपि ॥ तादृशाकाशादी
नां तादृशपृथिव्यादिभिः सह संयोगो [illegible] नास्ति ॥ तथात्मापि भ्रांत्या देहेंद्रि
यप्रपंचेन सह विद्यमान इव प्रतीयते चेदपि ॥ आत्माऽसंगत्व व्यवहारे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमात्ममनुस्मृत्यभाकाशादीनां निरवयवत्वमंगी[illegible] अनेनप्रकारेणोचा
मः। परमार्थस्वरूपेण विचार्यमाणे आकाशादिपदार्थाः भ्रांसा आत्मन्यारोपि
ता इति। आरोपितपदार्था नीरज्जुसर्पवत् अधिष्ठानात्मसत्तैव स्वरूपमिति आ
त्मा कालत्रयेप्यद्वितीय एव। अतः असंग एव। अनेनप्रकारेण विचार्य असंग आ
त्माहमिति यो मुमुक्षुः जानीयात् स एव मुक्त इति वेदांतसिद्धांतः।। अतःपरं आ
अ त्मनः कर्तृत्वं केन प्रकारेणेति विचारयामः। नन्वात्मनः कर्तृत्वप्रसक्तो किल
आत्मनः कर्तृत्वं। कथमिति विचारे तदेव न ज्ञायते उच्यते। देहेंद्रियाध्यासेन
मया स्नानं कृतं। मया स्नानं न कृतं कर्तुं गतोस्मि। मया जपः कृतः। अग्निहो
त्रादिकं कृतं। अतःपरं कर्तुं गतास्मीति। कर्तृत्वमध्यासेन आत्मनिष्ठत्वेन प्र
तीयते इति। एतादृशाकर्तृत्वं निरस्यर्थं विचारापत्तिः। लोके कर्तृत्वं नाम क्रिया
श्रयत्वं। तादृशाकर्तृत्वं यः परिछिन्नः संगी सावयवः विकारी तस्यैव संभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृत्ति। आत्मा तावत् अपरिछिन्नः असंगः निर्विकारः निरवयवः। तस्य कर्तृत्वं संभवन
हि। आत्मा अकर्तेति वक्तव्ये। आत्मनः अद्वितीयत्वेन अकर्तृत्वे सिद्धेपि स्पष्टं यथा तथा
ज्ञातव्यमिति विशेषतयोच्यते। व्यवहारे स्नानादि क्रियाश्रयत्वं देहेंद्रियादीनामेव
स्पष्टं। व्यापकस्वरूप आकाशादीनां न दृष्टं। अपरिछिन्नत्वस्यात्मनः नास्ती
ति केव कथा। आत्मा प्राप्तदेहेंद्रियादि अध्यासेन आत्मा कर्तृत्ववत् प्रतीयते चेद
पि विचारे क्रियमाणे आत्मा अपरिछिन्न एव तिष्ठतीति। आत्मा अकर्तेव स
देहो नास्ति। तादृशाकर्तृत्व संभूत आत्माहमिति मुमुक्षुणा ज्ञातव्यः। अतःप
रं अभोक्तृत्वं विचार्यते॥ नन्वात्मनो भोक्तृत्वप्रसक्तो किल नेत्कथं आगतः इति विचा
र इति चेत् श्रुणु॥ अहं भोजनं कृतवानस्मि। अनेक भोगाननुभवामि। इत्यादि भोग्या
आत्मनो भोक्तृत्वं प्रतीयते। परमार्थतो विचार्यमाणे नास्त्येव॥ कथं आत्मा अद्वि
तीय एवेति॥ तादृशा अद्वितीय आत्मापेक्षया अन्यत्तु भोग्यवस्तु नास्त्येवेति। आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः

स्मनोभोक्तृत्वं वस्तुमनर्हे। तस्मादात्मा अभोक्तेति निःसंदेहतया सिद्धं ॥ ननु लो
के देवदत्तादयः स्वापेक्षतया व्यतिरिक्तमन्नादिमनुभुंजतीति प्रत्यक्षतया पश्या
मः। ननु देवदत्तादयः स्वस्य स्वयमेव भोज्या इति पश्यामः। भोज्यवस्त्वभावे
न भोक्तृत्वस्य न पश्यामः। तस्मात् अद्वितीयात्मनः अभोक्तृत्वं सिद्धमेव। अने
न प्रकारेण विचार्यमाणे अद्वितीय एव अपरिच्छिन्न एव अकर्ता अभोक्तैव। तादृशा
त्माहमेवेति यो जानाति स कृतार्थः॥ स एव विद्वान् स एव सर्वेषां पूज्य एव जीवन्मु
क्त इति वेदांत सिद्धांतः॥ अस्मिन्नर्थे संशयलेशोपि नास्तीति सिद्धं॥ इत्यज्ञानकार
णाज्ञानाज्ञानप्रकरणं॥ चतुर्दशावर्णके समाप्तं॥१४॥ श्रीलक्ष्मीनृसिंहाय नमः॥
अथ शरीरत्रयप्रकरणं॥ मातामह महाशैलं महस्तदपितामहं॥ जगतः कारणं वं
दे कंठाउपरिवारणं॥१॥ प्राणिनां कियंति शरीराणीति विचारयामः॥ एतद्विचा
रस्य प्रसक्तिः का वा॥ यथोक्तयुक्तिभिः असतः उत्पत्तिर्वक्तुं न शक्यत इति॥ सत
उत्पत्तिर्वाच्या। तत्र बीजादौ विद्यमान वस्तुनः वृक्षस्य सत्वे तस्य पूर्वं अप्रतीत्यां ना

अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीहरि
८१
मनन

म रूपात्मकत्वेन। कारणात्मना बीजादौ विद्यमान वृक्षादीनां नामरूपात्मकत्वेन प्रती
तिर्यथा उत्पत्तिः। तद्वत् प्रलयेपि सर्वविषयत्वेन अनामरूपात्मकतया विद्यमानसू
क्ष्मशरीरादीनां नामरूपात्मकतया प्रतीतिरुत्पत्तिः॥ तर्हि कार्यकारणयोः भेदः क
थमिति चेत् अनभिव्यक्त नामरूपात्मकं कारणं। अभिव्यक्त नामरूपात्मकं कार्यमिति
नयोर्भेदः॥ कालत्रयेपि कार्यं कारणात्मना तिष्ठतीत्यत्र संदेहो नास्तीति सिद्धं॥ एवं
विद्यमानत्वेपि अनभिव्यक्त नामरूपतया विद्यमानं कारणं कार्यत्वेन प्रतीयत इत्युक्ते
कुलालादिव्यापारमपेक्षत इति युक्तमेव। असद्रूप कार्यं उत्पद्यत इति पक्षे कुलालादि
व्यापारस्य असत्वं आश्रयं न भवतीति। अन्याश्रय व्यापारेण अन्यस्योत्पत्तिरित्युक्ते
अतिप्रसंगस्यादिति कुलालादिव्यापारो व्यर्थः स्यात्। तादृश कुलालादिव्यापारस्य वैयर्थ्य
वक्तुं न शक्यत इति। कार्यस्य कारणात्मना स्थितावपि कुलालादि व्यापारापेक्षा युक्तैव। एवं
पूर्वोक्त युक्तिभिः कालत्रयेपि कार्यं कारणात्मना तिष्ठतीति वर्णं प्रलये यास्तनं जीवत्वे
उपाधिभूत सूक्ष्मशरीरं कारणात्मना तिष्ठतीति। प्रलयेप्या x तस्मात् प्र० त्मनः जीव
त्व संस्कारतया तिष्ठत्येव। तस्मात् जीवस्य अनादित्व भंगो नास्त्येव। तादृश सूक्ष्मश
विषयोपाधिभूत सूक्ष्मशरीरं॥

चिपर्यं

८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीरस्य नामरूपात्मकत्वेन प्रतीतिरेवोत्पत्तिरित्यंगीकृतत्वात् श्रुत्यादीनां विरोधो नास्त्ये
व। एते दोषाः एवमुक्तप्रकारेण परिहृताश्चेदपि लोके जन्यवस्तूनां कर्मजन्यत्वमपि अनेक
त्वमपि प्राप्नोतीति दोषो अपरिहृतश्चेत् परिहृत एव। कथं तादृशसूक्ष्मशरीरस्य कर्मज
न्यत्वमनेकत्वं चांगीकृत्य किल एते दोषाः परिहर्तव्याः॥ तथांगीकृतौ पूर्वे सूक्ष्मशरीरस्य क
र्मजन्यं न भवतीत्युक्तेश्च विरोधप्रतीतावपि एते विरोधाः पूर्वोक्तविरोधाश्च न भवंतीति त
था परिहरिष्यामः। कथं इतरत्सर्वं जन्यमेव स्वांगीकर्तव्यमिति तादृशाजन्यं सामा
न्यकर्मजन्यमिति च विशेषकर्मजन्यमिति द्वैधं॥ एवं विद्यमाने सूक्ष्मशरीरस्य सामा
न्यकर्मजन्यत्वमंगीकृतमिति जन्यमात्रस्य कर्मजन्यत्वनियमभंगो नास्त्येव॥ एता
दृशसूक्ष्मशरीरस्य सामान्यकर्मजन्यत्वमंगीकृतमिति। कर्मविशेषजन्यत्वमंगीकृतं
नास्ति पूर्वं सूक्ष्मशरीरं कर्मजन्यं न भवतीत्युक्तेर्विरोधो नास्त्येव॥ सामान्यकर्मज
न्यवस्तुनः व्यवहारेणैकत्वं। विशेषकर्मजन्यवस्तुनः अनेकत्वं च लोके दृष्टमिति॥
सूक्ष्मशरीरसामान्यकर्मजन्यमपि विशेषकर्मजन्यं न भवतीति कृत्वा सूक्ष्मशरीरमेकं
मित्युक्तेः विरोधो नास्त्येव। एवं सामान्यकर्मजन्यवस्तुनः एकत्वं विशेषकर्मजन्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तुनः अनेकत्वे चेत्कुत्र दृष्टमिति चेत् दृष्टमेव। यथा पृथिव्यादिषु दृष्टं। तादृशपृथिव्या
दीनां कर्मजन्यत्वं न दृष्टं किल॥ कथं वक्तव्यमित्यत आह सर्वं जगज्जन्यमेवेति। जीवस्य
भोग्यमिति च। जगतः कर्मजन्यत्वं वक्तव्यं। जीवस्य भोग्यं चेति जगत्। तर्हि किं कर्मजन्यमि
त्यपीत्यत आह भवत्येव कथं सर्वेषां कर्मणां सुखदुःखानि किल फलं तादृशसुखदुःखा
नि अनुकूलप्रतिकूलवस्त्ववलंबनेन प्र[illegible]भवतीति। जगन्निष्ठपदार्थेषु केचन पदा
र्थाः केषांचिदनुकूलाः संतः सुखदुःखैककराः तिष्ठंतीति केचित्पदार्थाः प्रतिकूलाः संतः
दुःखकरास्तिष्ठंतीति। तादृशजीवानां कर्माणि स्वफलीभूतसुखदुःखसाधनीभूत आ
काशादीनामुत्पत्तिं संपाद्यैव जीवानां सुखदुःखानि प्रयच्छंतीति। सर्वं जगत्कर्मजन्यमे
वेति वक्तव्यं॥ स्थितिकाले किल जीवान् तत्तत्कर्माणि च प्रपश्यामः॥ प्रलये तु जीवान् क
र्माणि च न पश्यामः। एवं सति जीवकर्मभिः आकाशादिजगदुत्पद्यत इति। कथं वक्त
व्यमिति चेत् प्रलये सर्वे जीवाः स्वस्वोपाधिभिः सह सुषुप्ताविव [illegible] संस्कारात्मना ति
ष्ठंत्येवेति तेषां कर्माणि संस्कारात्मना तिष्ठंत्येव। तादृशकर्मभिः जगदुत्पद्यत इति उ
क्तिभिः संगच्छते॥ एवमनंगीक्रियमाणे पूर्वकल्पे जीवेन कृतकर्मणां फलोत्पत्तिर्न स्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुपूर्वकल्पे अकृतकर्मणामेतत्कल्पे फलावश्यंभावात् किं च श्रुत्यादीनामपि वैयर्थ्यं स्या
त् । कारणाभावे च जगतः आकस्मिकत्वापत्तेर्मुक्तपुरुषाणामप्युत्पत्तिः स्यात् । ज
गतः मनुष्या इति देवदत्त इति तिर्यंच इति ब्राह्मणादय इति व्यवस्थैव न स्यात् । एते दोषा
आपद्येरन् दृष्टापत्तिर्वक्तुं नोचितेति प्रलये संस्काराः एवं ना विद्यमानजीवानां कर्मभिः
आकाशादिजगदुत्पद्यते इत्यर्थे संदेहो नास्ति । एवमाव[hole]श्यकः कर्मयोग्यत्वेनापि
स्वगतविकारे विद्यमानेऽपि प्रलये यावदोल्लयीभूय तत्तदुत्पत्ति आकाशादाकाशत्वेनैव वा
युर्वायुत्वेनैव तेजस्तेजस्त्वेनैव जलं जलत्वेनैव पृथिवी पृथिवीत्वेनैवोत्पद्यते ॥ तथैव सू
क्ष्मशरीरमपि प्रलये लयीभूय स्थितं चेदपि तत्तज्जीवानां कर्मभिः पूर्वकल्पे यथा स्थि
तं तथैव तत्प्रतिकल्पमुत्पद्यते ॥ एवमुत्पद्यमाने स्वगतविकारवद्देवोत्पन्नं चेदपि
सूक्ष्मशरीरं एकैकस्य प्राणिनः मुक्तिपर्यंतमेकमेव एवं मुक्तो मुक्त्यनंतरमपि सूक्ष्म
शरीराणि अनेकीभूय प्रतीयंते इत्यतो मुक्त्यनंतरं सूक्ष्मशरीरं नास्तीति । आशं
कायाः अवकाश एव नास्ति । अनेन प्रकारेण सूक्ष्मशरीरमाकाशादिवत्सामान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मणो सन्नमित्येकैकस्य प्राणिनः एकमेकमित्युक्तिर्युक्तैव न न्वेवमुक्तौ विरोधः प्रलयवत्प्रती
यते। कथं आकाशादयः सर्वप्राणिनां कर्मणो सन्नाः इति तादृशआकाशादीनां सामा
न्यकर्मजन्यत्वमपि प्रलयपर्यंतमेकमेव तिष्ठति ॥ प्रतिकल्पं च यथा तथैव उत्पद्यत इति ॥
युक्ते वक्तुं तत्तत्प्राणिनां सूक्ष्मशरीराणि तु समस्तप्राणिनां कर्मणो सन्नानि न भवंतीति तेषां
सामान्यकर्मजन्यत्वं च एकैकप्राणिनः एकैकं प्रतिकल्पं च यथा तथोत्पद्यंते मुक्तिपर्यंतं
गा च नित्यमिति कथं वक्तव्यमिति चेत्। तादृशाकाशादिवत्तत्प्राणिनः सूक्ष्मशरीराणि स
मस्तकर्मभिरप्युत्पन्नान्यपि तत्तत्प्राणिनां स्वस्थिमा[illegible] प्रलयपर्यंतं अपि स्थूलशरी
रद्वारा सुखदुःखप्रदायकैः कर्मभिः तत्तत्प्राणिनां सूक्ष्म[illegible]शरीराण्युत्पन्नान्येवेति मुक्ति
पर्यंतमपि तत्तत्प्रलये संस्काररूपेण विद्यमानतत्तत्सूक्ष्मशरीरसंपर्काश्रयविद्यमान
कर्मभिः तत्तत्सृष्टावपि तत्तत्प्राणिनां सूक्ष्मशरीराणि तथा तथोत्पन्नानीति तादृशसू
क्ष्मशरीराणि सामान्यकर्मजन्यत्वं च एकैकस्य प्राणिनः सूक्ष्मशरीरं एकमेकमेव प्रति प्र
तिकल्पं च तथा तथोत्पन्नानीति मुक्तिपर्यंतमपि नित्यमिति युक्तियुक्तैव लीनं स दस्तु

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी

कर्मापेक्षोस्य घटइ खि स्मिन्नपि सामान्यकर्मणः स्वकारणाडुत्पन्नं वस्तु एकः तिष्ठतीत्यस्मिन्न
पि विशेषकर्मणः स्वकारणाडुत्पन्नं वस्तु नानारूपं सत् अनेकं सत् तिष्ठतीत्यस्मिन्नपि दृष्टांतं
निरूपयामः। यथा काष्ठपाषाणादौ लीनं सत् तिष्ठत्यग्निः तस्यैव मथनादिरूपकर्मणा य
थोत्पत्तिः तद्वदेव कारणरूपसूक्ष्मशरीरस्यापि कार्याकार्यत्वेन प्रतीयमानकर्मणैव भिस्फु
त्या कार्यमसदेवेति तं निरस्यते इतः परं सामान्यकर्मणोत्पन्नं वस्तु एकैकमेवेत्यस्मिन्न
पि विशेषकर्मणोत्पन्नं वस्त्वनेकमेवेत्यस्मिन्नपि दृष्टांतो निरूप्यते कुलालेन नानावि
धभांडानि संपादयानीति संपाद्यमानमृत्पिंड एक एव सच्चानेककर्मभिः विरच्यमानो
पि तत्कर्माण्यपि तादृशमृत्पिंडात्स्वकारणादुत्पन्नभांडानां सर्वेषां समानान्यवतिष्ठं
तीति तादृशमृत्पिंडः सामान्यकर्मजन्य इति तादृशमृत्पिंड एक एव तादृशमृत्पिंडे
न क्रियमाणभांडेषु मध्ये एकभांडनिर्माणकर्मणा अन्यभांडं न कृतमिति तानि भांडा
न्यपि विशेषकर्मजन्यान्येव तस्मात्तादृशभांडानि नानारूपाण्येव अनेकानि संतिष्ठंती
ति सर्वानुभवसिद्धं॥ एवं सूक्ष्मशरीरं सामान्यकर्मजन्यं जातमिति तदपि एकैकशरीरमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फक्तिरपि स्थूलशरीरं विशेषकर्मजन्यं जातमिति तदप्येकैकप्राणिनः अनंतमेव स्फक्ति
रप्युक्तैव। पुनरप्यस्मिन्नर्थे विशेष उच्यते॥ लोके देवदत्तस्य कर्मणः सकाशान्नानाविध
वस्त्राणि प्राप्नुवंति। तानि वस्त्राणि एकवदेव एकवस्त्रं न तिष्ठतीति यथा विशेषकर्मणा प्राप्नु
४ त्रा वंति। तद्वदेव स्थूलशरीराण्यपि विविधान्येव नानैतानि प्राप्नुवंतीति तानि स्थूलशरीराणि विशे
षकर्मजन्यान्येवेति ज्ञातव्यं॥ तादृशदेवदत्तस्यैव तादृशविशेषकर्मभिः वस्त्राणि प्राप्ता
न्येव॥ तादृशवस्त्रैः प्राप्यमानसुखदुःखानां साधनीभूतस्थूलशरीरं एकमेवं तिष्ठती
ति तानि वस्त्राण्यपेक्षया स्थूलशरीरं यथा सामान्यकर्मजन्यं जातं। तद्वत् सूक्ष्मशरीरमेके
कस्य प्राणिनः एकैकमेवेति। तदपि सामान्यकर्मजन्यमेवेति ज्ञातव्यं। एवमुक्तस्य किं
सिद्धमित्युक्ते सूक्ष्मशरीरस्यैव स्थूलशरीरग्रहणं तत्त्यागश्च सिध्यति॥ तत्र दृष्टां
तः दृष्टांते स्थूलशरीरस्यैव वस्त्रग्रहणं तत्त्यागश्च प्रत्यक्षसिद्धः तद्वदेव सूक्ष्मशरीरस्या
पि स्थूलशरीरग्रहणं तत्त्यागश्चेति ज्ञातव्यं एवंविधतद्इति सूक्ष्मशरीरस्य स्थूलशरीरप
रिग्रहो जन्म तत्त्यागः तत्संबंधराहित्यं मरणं॥ एवं स्थितो सूक्ष्मशरीरस्यैव प्रत्यक्षं जन्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरणादिकं नास्तीति प्रतीयते ॥ एवं प्रतीयमानत्वे आत्मनः जन्ममरणादिप्रसक्तिर्नास्ती
ति द्रष्टव्यं ॥ ननु एवमुच्यमाने तादृशसूक्ष्मशरीरस्यैव अनंतस्थूलशरीरप्राप्तिरितिप्र
तीयते प्रतीयतां नाम स्यात् को दोषः पूर्वं प्राणिनां स्थूलशरीराण्यनंतानि इत्युक्तं अनु सूक्ष्मश
रीरस्यानंतस्थूलशरीरप्राप्तिरित्युच्यते । पूर्वोत्तरविरोध इति चेत् न न विरोध इति श्रु
तेः तर्हि सूक्ष्मशरीरमेव प्राणिशब्दार्थ इत्युच्यते वा तथा वक्तुं न शक्यते ॥ पूर्वं प्राणि
नां सूक्ष्मशरीरं एकैकमेवेत्युक्तं अधुना सूक्ष्मशरीरमेव प्राणिशब्दार्थमुच्यते ॥ द्वै
विध्यं संपन्नमिति विरोध इति चेत् यथा न विरोधस्तथा वक्ष्यामः । प्राण्यादिशब्दा
नां आत्मैवार्थः तादृशस्यात्मन एव कारणकारणशरीराभिसंपित्तामवदज्ञानेन
प्राप्तसूक्ष्मशरीराध्यासद्वारा अनंतस्थूलशरीराणि प्राप्नुवंत्यपि पोद्यंते च ॥ तादृश
शरीरनियमश्च तन्मरणादिप्रसक्तानिवार्याभासंते ॥ कथमित्युक्ते दृष्टांते स्थूलशरीरे
पावस्थापि गृह्यंते पोद्यंते इति चेत् प्रत्यक्षोपलब्धावपि तादृशस्थूलशरीरव्यतिस्थितिः,
संबंध एव तादृशस्थूलशरीरेऽध्यासेन देवदत्तनामा इति नाम वै जीवस्यैव तादृशस्थू
लशरीरद्वारा वस्त्रग्रहणसागादयः यथा प्रतीयंते तद्वदेव अज्ञानेन प्राप्यमाणसू
क्ष्मशरीराध्यासद्वारा आत्मनोपि अनंतस्थूलशरीराणि प्राप्नुवंति अपोद्यंते इव
स्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीहरि
मननेन
६३

प्र.१५

तीयते मोहेन विचार्यमाणे तु स्थूलशरीरस्यैव जन्ममरणादीनि प्रत्यक्षेण प्रतीयंत इ
ति ।। सूक्ष्मशरीरस्य स्थूलशरीरेण सह अध्यासं विना जन्ममरणानि न संभव सू
क्ष्मशरीरस्यापि जन्ममरणानि संभवेति कुतः तादृशात्मनः मोहमात्रेण विना जन्म
न मरणानि न संभवेतीति वक्तव्यं ।। एवमुक्तप्रकारेण स्थूलशरीरमनंतं सूक्ष्मशरीरमेकैकं
मेव कारणशरीरमप्येकमेव । एतस्मात् किं सिध्यतीति चेत् शरीरत्रयेपि शरीरशब्दे
नोच्यमानः आत्मा न भवतीति सिद्धं ।। कथं लोके एकः एकं पृछति तव रुद्राक्षमालिका
कियंत्येतिरति स्त्र इति प्रतिवचनं पुनः पृछति कियंति यज्ञोपवीतानीति त्रीणी
ति प्रतिवचने पुनः पृछति कियंति धोत्राणीति त्रीणीति श्रुतिवचनं एवं प्राणिनां
कियंति शरीराणि इति पृष्टे त्रिणि प्रत्युत्तरं ।। एवं प्रतीतिवशात् कथं सिध्यतीत्य
केदृष्टी ते रुद्राक्षमालादि विधानानि धारितवंतः यथा न भवंति तादृशरुद्राक्ष
मालादिनिष्ठविकारान् धारितवंतः यथा न स्पृशेयुः । लक्ष्यदेवदत्तादृष्टीतिकेपि स्थूलसू
क्ष्मकारणशरीराणि आत्मा विवाच्या आत्मा न भवंति ।। तादृशशरीरत्रयनिष्ठविकाराः आ
त्मशब्दवाच्यमानं न स्पृशेयुः । किंच लोके देवदत्तादीनां गृहीति क्षेत्रीति धनीति व्य
वहारः लोके वेदेषु प्रतीयते अनेन प्रकारेण शरीरत्रयस्य विद्यमानत्वेपि तादृशादृष्टां

न

गाद्य

गा

६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेगृहीतिपुत्रीतिधनीतिक्षेत्रीतिकुंडलीतिप्रतीयमानदेवदत्तादयः यथा न भवंति ॥
तादृशगृहादिनिष्ठविकाराः देवदत्तादीन्न स्पृशंति तद्वद्देवशरीरीतिदेहीतिप्राणी
तिउपाधिना प्रतीयते आत्मापि शरीरप्राणादिर्न भवति ॥ तादृशशरीरनिष्ठवि
काराश्च तादृशमात्मानं कालत्रयेपि न स्पृशंतीति प्रतीयते ॥ अनेन प्रकारेण शरीरत्र
यमपि आत्मा न भवतीति शरीरत्रयविकाराश्च आत्मनो न संस्पृशेव एवं सामान्येन प्रती
यते इति ॥ विशेषेण स्थूलशरीरवत् सूक्ष्मकारणशरीरद्वयमपि न प्रतीयते इ पिपिब
कुशो विचार्यमाणेपि एतानि शरीराणि आत्मा न भवंतीति प्रतीतिः कठिनेति शरीरस
ण्यपि त्रीण्येव एतानि शरीराण्यपि आत्मा न भवंति । एतच्छरीरत्रयनिष्ठविकाराश्च
आत्मानं न स्पृशंत्येवेति ॥ दृढप्रतीतौ विशेषयुक्तिरस्तीति निरूप्यते । स्थूलशरीरं स
मस्तप्राणिनामपि प्रत्यक्षमिति एतत्स्थूलशरीरमस्ति न वेत्यस्मिन् केषामपि संशयो
नास्तीति सिद्धं ॥ ननु चार्वाकमतपरापेक्षया व्यतिरिक्तानां एतत्स्थूलशरीरमात्मान
वस्येवेसस्मिन् संदेहो नास्ति ॥ चार्वाकादीनां तु एतत्स्थूलशरीरं आत्मेत्यस्फुरितचित्त
न भवति ॥ तर्हि किमुचितमिति चेत् सूक्ष्मशरीराध्यासेन जीवस्वरूप आत्मा तादृश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूक्ष्मशरीरद्वारा स्थूलशरीराध्यासेन प्राप्तपुत्राद्यपेक्षया पित्रादिशब्दैरुच्यते एवं पित्रादिश
ब्दैरुच्यमान इव प्रतीयमान आत्मा स्थूलशरीरापेक्षया भिन्न एव तादृशपित्रादिशब्दैः स्थू
लशरीरमेवोच्यते किं तादृशपित्रादयो मृताश्चेत् तादृशपित्रादिशब्दानां अर्थः चार्वाकपाम
राणां आत्मेति अभिमतं स्थूलशरीरं तिष्ठत् तादृशपित्रादयो मृता इत्यनुक्ता तिष्ठेतां
तथैव स्थितिर्न दृश्यते इति एतत् स्थूलशरीरव्यतिरिक्त आत्मेति प्रतीयते कथमिस्फुटं निरू
प्यते ॥ तादृशपित्रादिशब्देनामार्थवत् प्रतीयमाने एतत्पित्रादिस्थूलशरीरे मृते सति ते
पुत्रादयः तं स्थूलशरीरं वेष्टयित्वा रुदंति अस्माकं मध्य एव स्थूला अस्मत् सित् मात् बंध
वः अनेनैव प्रकारेमृत्युं स्वात्मा गताः अस्माभिः किं कर्तव्यमिति रुदंति अनेन किं सूचितं यत्
स्थूलं सत्का गताः ते एव पित्रादिशब्दानां अर्थः मत्वा लोकांतरादि प्राप्त सूक्ष्मशरीराध्या
ध्यासद्वारा गताः ते एव पित्रादिशब्दानां अर्थः न स्थूलशरीरं अर्थः एवमुक्तया तादृश
पित्रादिशब्दानां पित्रादिस्फुरिकं योत्रार्थो यथा न भवति तद्वदेव स्थूलशरीरमपि सत्का
कर्मानुसारेण लोकांतरं गंतारः एतत्पित्रादिशब्दानामर्थत्वेन प्रतीयंते ॥ एतच्छरी
रं तादृशपित्रादिशब्दानामर्थत्वेन प्रतीयंते ॥ तर्हि एतत् स्थूलशरीरादेव निर्गच्छंतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादृशपित्रादिशब्दानामर्थो भवेत् निर्गमनात्पूर्वं अत्र विद्यमानस्थूलशरीरमेव तादृशपित्रा
दिशब्दानामर्थ इति चेदुच्यते तथा वक्तुं न शक्यते तथोच्यमाने तु पूर्वोक्तधौत्राणि स्वस्का
निर्गमनात्पूर्वं श्वशुरप्रभृतयः तादृशधौत्राणि स्वस्का । निर्गमनात्पूर्वमपि तादृशधौत्राण्ये
७न वते भवंतु ॥ एतावदेवं पुनरपि एकस्मिन्गृहे स्थितो निर्गतपुरुषः गृहान्निर्गमनात्पूर्वमपि ता
भव दृशगृहमेवं तु ॥ तथा वक्तुमनर्हमिति तादृशधौत्रैः सह विद्यमानश्वशुरप्रभृतयः ता
दृशधौत्रैः सह विद्यमाना अपि तादृशधौत्राण्यपि यथा न भवंति ॥ तादृशगृहान्निर्गतः
पुरुषः तद्गृहं स्वस्कागतं चेदपि तद्गृहे विद्यमानोऽपि तद्गृहं यथा न भवति तथैव तेऽपि
त्रादयः एतस्मिन्स्थूलशरीरे विद्यमाना अपि एतत्स्थूलशरीरं स्वस्कागतश्चेदपि तच्छ
रीरं पित्रादिशब्दानां ए तत्स्थूलशरीरं स्वस्का विनिर्गत एवार्थः एतत्स्थूलशरीरं सर्वथा
न भवति ॥ एतावन्मात्रमेव न एतत्पित्रादिशरीरं तेषां मरणात्पूर्वं तादृशपित्रादिश
ब्दाना अर्थ इति गणनामकृत्वा स्थितः तच्छरीरं प्रति एकमपि वचनं उदासीनं कृत्वा
स्थितश्चेदपि तस्मिन्शरीरे व्रणादिकं कृतं चेदपि तस्यानेकनारकप्राप्तिः ॥ शास्त्रे

७ प्यविद्यमानापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रूयते॥ तादृशशरीरस्यैव दहनादिकं कुर्वंति तादृशपित्रादिशब्दानां एतत्स्थूलशरीरमेव
अर्थश्चेत् तादृशशरीरदहनकर्तॄणां पुत्रादीनां पितृहत्यादिदोषाः प्रसज्येरन्। एते
दोषाः प्रसक्ताश्चेत् तेषां पुत्रादीनां अनंतकोटिनरकाणि स्युः। किंच लोके जना अ
पि एते पितृहत्याकारिणः एते मातृहत्याकारिण इति दूषयित्वा तैः सह संभाषणादि
कं न कुर्वीरन् तथा न पश्यामः तादृशपित्रादिशरीराणि दहनकर्तॄणां नरकादीनि
शास्त्रं न ब्रुवत्। एतत्स्थूलशरीरं पित्रादिशब्दानां अर्थ इति गणनीयं केवलं नैकउपचा
रेः संशृज्जेयंति तादृशशरीरं मरणानंतरं दग्धं चेत्तादृशपुत्रादीनां प्रसवायदोषाः शा
न स्त्रेणोच्यते चेत् तादृशप्रसवायकर्तारः पुत्रादयः स्युः तद्देहदहनादि कर्तृत्वेन स्थू
लशरीरात् निर्गमलोकांतरं गच्छतां पुत्रादीनां प्रेतत्वविमोचनार्थं प्रायमपि तथ
शरीरं दग्ध्वा स्थितानामपि पुत्रादीनां प्रसवायदोषो नास्त्येवेति शास्त्रेणोच्यते॥ क
थमिति चेत् नगरादौ विद्यमानो राजा अंध्रदेशे सेनया बहिर्गतश्चेत् तस्य
अदृष्टेन मार्गवने वर्षाकालपरिहारार्थं कृतं भस्ये गृहं तत्रोपविश्वात तः ग्रह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्गत्य गतमिति ज्ञात्वा तस्य भृत्याः तस्मिन्नगरे यथा यथा तं नगरं निर्जनं कुर्वंति
न कुर्वंति चेत् तान् राजा शिक्षते तद्वत् मृतपित्रादिशरीराणि तत्पुत्रादयः संस्कारं कु
र्वंति चेत् तेषां पित्रादीनां अतिशयोपि आदरेण प्रत्यवायदोषोपि नास्तीति ज्ञातव्यं॥
लोके जना अपि मृतशरीराणि संस्कृतपुत्रादीन् दूषयंती च एतावता पित्रादिशरीराणां ७४
स्थूलशरीरनिर्गता एवार्थः इति प्रतीयते॥ एवमुक्ते युत्स्यात् तादृशपित्रादिशरीरा
णां एतत्स्थूलशरीरमर्थो न भवति चेत् एतत्स्थूलशरीरमेव पित्रादय इति किमर्थं
शुश्रूषयंतीत्युक्ते एतत्स्थूलशरीरस्थ प्रति आनंदयितुं शुश्रूषंते॥ एतत्स्थूलशरी
रप्रीत्यर्थं न शुश्रूषंते॥ नगरे राज्ञि विद्यमाने तस्य राज्ञः प्रीत्यर्थं तस्यैव नगरस्य उल्ले
चनाद्यलंकारान् यथा कुर्वंति भृत्याः नगरीप्रीत्यर्थं तु यथा न क्रियते॥ तद्वदेव स्थूल
देहशुश्रूषयापि तत्स्थूलशरीरस्थ आत्मानां प्रीत्यर्थं तत्स्थूलशरीरं शुश्रूषंते॥ त
स्थूलशरीरस्य प्रीत्यर्थं न शुश्रूषते॥ तस्मात् एतत्स्थूलशरीरं मोहेन पित्रादिशरीरा
णां अर्थवत् प्रतीयते चेदपि एतत्स्थूलशरीरस्यैव पित्रादिशरीराणामर्थः किं च लो
के ग्रामांतरं गतवतः धौत्रं तस्कराः चोरयंति चेत् तद्दृष्ट्वा तस्य पुत्रादयः तस्य पुनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीहरी
९६ मनन

वस्त्रादिकं दत्वा प्रेषयंति ॥ तद्वदेवमत्र पित्रादयः लोकांतरगामिनो नग्नाः संतो गछं
ति तेषां नग्नप्रच्छादनार्थं अत्र ब्राह्मणाय वस्त्रं दत्तं चेत् तद्वस्त्रं तस्य गछतीति शास्त्रं
ब्रवीति तत् श्रुत्वा तेषां पुत्रादयः इह लोके ब्राह्मणाय वस्त्रं ददाति ॥ अनेन एतत् स्थूलश
रीरं पित्रादिशब्दानामर्थो न भवतीति प्रतीयते ॥ किंच दारादिसंस्कारकर्तारः आतपेन
प्रहृताः बाधिता वयमिति गृहं प्रति गछंति तत्र गृहे विद्यमानाः तेषां आतपप्रहृतानां
अन्नजलादिकं यथा स्थापयंति ॥ तद्वदेवमत्रापि लोकांतरगतानां पित्रादीनां क्षुत्पिपा
सादयः इह स्थैः दीयमानतिलोदकादिभिः निवर्तंत इति ॥ शास्त्रेणोच्यमानं श्रुत्वा
तत्पुत्रादयः तेषां तिलोदकपिंडप्रदानानि कुर्वंति एतेनापि स्थूलशरीरं पित्रादिशब्दा
नां अर्थो न भवतीति प्रतीयते ॥ किंच देशांतरं गंतव्यामिति प्रस्थानं कृतवतः पर्युषितअ
न्नादिकं दत्वा यथा प्रेषयंति ॥ तद्वदत्रापि लोकांतरं गछतां पित्रादीनां इहस्थाः पुत्राद
यः स्वर्गपाथेयं ददति तदनंतरं तेषां क्षुत्पिपासादयो निवर्तंत इति शास्त्रेणोच्यमा
नं श्रुत्वा पुत्रादयः स्वर्गपाथेयमर्पयंति ॥ तस्मात् स्थूलशरीरं पित्रादिशब्दानां अर्थो न भ ९६
वति ॥ किंच ग्रामांतरं गंतव्यामिति सर्वैरपि प्रेष्यमाणपुरुषेन दीसमागतेति पारितं न शक्य

पि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्गतितठेतिष्ठामीतिश्रुत्वागह्वेविद्यमानाःउडुपादिकंप्रेषणीयमितितद्दृष्ट्वालोकां
तरगामीपित्रादीनांस्वर्गप्राप्तिप्रतिविघातकवैतरणीनदीतिष्ठतीतिशास्त्रेणोच्य
मानंश्रुत्वातस्यउत्तरणार्थंपुत्रादयःवैतरणीगोदानंकुर्वंति॥अनेनापिस्थूलशरी
रंपित्रादिश्राद्धानांअर्थोनभवतीतिप्रतीयते॥किंचमृत्वाप्रयातापित्रादीन्प्रतीनं
पुत्रादयःमरणदिनमारभ्यसंवत्सरपर्यंतंमासिमाअर्चयंति॥ततःतत्पुत्रादयःयाव सि५
त्पर्यंतंजीवित्वातिष्ठंतितावत्पर्यंतंप्रतिसंवत्सरंतानुद्दिश्यप्रतिसंवत्सरिकाणिकरो
तिमध्येमध्येअष्टकादिश्राद्धादिकरोतिपुण्यक्षेत्रेषुतीर्थश्राद्धादिकारोतियत्क्रि
यमाणंयद् तावत्पर्यंतमुक्तंतत्सर्वंभस्मीभूतस्थूलशरीरमेवपित्रादिश्राद्धानाम
र्थंश्रेता इदंसर्वंलग्नंभवनस्यात्॥अस्मात्स्थूलशरीरान्निर्गत्यलोकांतरगामिन
एवपित्रादिश्राद्धानामर्थ इतिप्रतीयते॥उक्तयुक्तिभिःस्थूलशरीरंविसृज्यलो
कांतरस्थंयद्भूतंतत्सूक्ष्मशरीरमितितसिद्धं॥एवंपित्रादि श्राद्धानांसूक्ष्मशरी
रमेवअर्थइत्युक्तप्रायंतर्हितादृशापित्रादिश्राद्धवत्सूक्ष्मशरीरंपित्रादिश्राद्धा
नांचेतनत्वेनअर्थःसूक्ष्मशरीरंअचेतनंकिल॥अचेतनंसूक्ष्मशरीरंपित्रादि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२त

ज्ञानां कथमर्थः स्यादिति चेत्॥ चेतनत्वेन आत्माकाशवत् व्यापक इति त्वात् तस्य लो
कांतरगमनागमनानि संगच्छंति॥ तस्य निरवयवत्वाच्च कर्मादिसंस्काराश्रयत्व
मपि न संगच्छत इति कर्मादिसंस्काराश्रयत्वेन अन्यो नांगीक्रियते चेत् कृतनाश
कृताभ्यागमदोषाः प्रसज्जेरन् अतः कर्मादिसंस्कारस्य आश्रयं सूक्ष्मशरीरमेवत
स्यैव लोकांतरगमनादि अंगीकार्यं तर्हि जन्ममरणे अपि लोकांतरगमनागमने च
पुण्यपापकरणं धर्मत्वेन कथं प्रतीयत इति चेत् व्यापकस्यात्मनः सूक्ष्मशरीरस्य
प्रधानावयवीभूत अंतःकरणप्रतिबिंबद्वारा तादृशसूक्ष्मशरीरेण सह अध्यासप्रा
प्तिवशेन सर्वैः सह तादात्म्येन अयः पिंडतादात्म्येन अग्निवत् प्रतीयते तथा तादृशसू
क्ष्मशरीरमपि चेतनवत् प्रतीयते तादृशसूक्ष्मशरीरतादात्म्येन स्थूलशरीरमपि मो
हेन तत्प्रतीयते तस्मात् जन्ममरणप्रभृतिधर्माः मोहेन चेतनधर्मवत् प्रतीयंते॥ तस्मा
त् स्थूलशरीरमपि कारणशरीरमपि अंतःकरणे आत्मप्रतिबिंबमपि एतत् त्रयं आधार
भूतचैतन्यमपि एतानि सर्वाणि मिलित्वा मोहेन पित्रादिशब्दानां अर्थत्वेन प्रतीयंते॥
विचार्यमाणे एतत्सर्वं तस्य तस्य वाचकत्वेन शब्दैः प्रतिपाद्यत इति एतादृशपित्रादिशब्दा

सूक्ष्मशरीरमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूलक्षणविकाराश्रयत्वं यिकारित्वात्तुनः एवं ऽन्तः द्रष्टा नित्यः व्यापकः चैतन्य (सिक्ष्यतीति)

नां एतेषु मध्ये एकैकस्यापि अर्थत्वेन प्रतीयते जन्ममरणानि एतत्स्थूलशरीरस्यैव प्रत्यक्ष

गमना त्वेन दृश्यंत इति ॥ गमनादिक्रियाश्रयत्वं परिछिंनस्य वस्तुनः एव प्रत्यक्षतया दृश्यंत इति पु

ण्यादिक्रियाँ स्वरूप आत्मा तु तद्धर्मेषु कस्यचिदपि धर्मस्य आश्रयो न भवतीति प्रतिमः ॥ एवं

स्वरूपस्यात्मनः मोहवशेन प्राप्तजीवत्वमपि लोकांतर गमनागमनादिकमपि पित्रादिदा

त्वं वान्यत्वमपि एतस्मिन् अध्यासद्वारा प्राप्तं तदेव स्थूलशरीरव्यतिरिक्तं ॥ सूक्ष्मशरी

रमिति ज्ञातव्यं ॥ किंच युक्त्यंतरेणापि स्थूलशरीरापेक्षया सूक्ष्मशरीरं भिंनत्वेन प्रती

यते ॥ तादृशयुक्त्यंतरं निरूप्यते ॥ अधुना विचित्र नाना विध व्यापाराः येन क्रियंते त

देव सूक्ष्मशरीरं ए॰ ते व्यापारा अपि स्थूलशरीरेण क्रियंत इत्युच्यतामित्युक्ते प्रेतशरी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री॥

रेणापितत्करणप्रसक्तिरापद्येत तथा तु न दृश्यत इति स्थूलशरीरापेक्षयाव्यतिरिक्त
सूक्ष्मशरीरेणैव क्रियमाणानि प्रतीयंते ॥ एवं किमर्थं वक्तव्यं ॥ आत्मैव सर्वं कर्माणि क
रोतीति वक्तव्यमिति चेत् आत्मनो व्यापकत्वात् आकाशादिषु विद्यमान आत्मापि क
र्म कुर्यात् ॥ तथा तु न दृश्यते । तर्हि आकाशादिषु आत्मा विद्यमान आत्मा कर्म करोति चे
चेत् स कुरुतां स्थूलशरीरेण सह विद्यमान आत्मा कर्म करोति चेत् प्रेतश
रीरेण सह विद्यमानोपि कर्म कुर्यादिति दत्तोत्तरत्वात् । अतः आत्मना सह विद्यमा
न स्थूलशरीरं किल कर्म करोतीति वक्तव्यमिति चेत् । व्यापकत्वेन आत्मनो सह वि
द्यमान स्थूलशरीरं किल करोतीत्युच्यमाने व्यापकत्वेन आत्मना सह विद्यमाने प्रे
तशरीरमपि कर्म कुरुतामिति पूर्ववद्देवत्तथा न क्रियते । तस्मात् आत्मना सह विद्य
मान स्थूलशरीरमपि कर्म करोतीति वक्तुं न शक्यते । अनेन प्रकारेण केवलं स्थू
लशरीरमपि कर्म करोतीति न पश्यामः ॥ सूक्ष्मपि केवलं आत्मापि कर्म करोति

नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिन पश्यामः॥ स्थूल शरीरेण सह विद्यमान आत्मापि कर्म करोती त्तिन पश्यामः॥

विद्यमानं

आत्मना सह स्थूलशरीरमपि कर्म करोती त्तिन पश्यामः॥ एवं स्थिता वपि विचित्राणि नाना विधकर्माणि क्रियमाणानि संतिउच्यते॥ एतानि कर्माणि एतेन क्रियंते तदेव सूक्ष्मशरीरं॥ सद्रूप आत्मा तु व्यापकस्तिष्ठतीति॥ निरवयवो निर्विकारस्तिष्ठतीति॥ अद्वितीयस्तिष्ठतीति॥ केनसह कदापि न तिष्ठतीति आत्मापेक्षया किमपि वस्तु नास्तीति तेन सह किमपि न विद्यते॥ कर्म सर्वमपि कारकसापेक्षमिति आत्मा किमपि कर्म न करोति चेद्द्रष्टा आत्मा अनादिकल्पित अविद्यास्वरूप अज्ञानेन कल्पित अपंचीकृतपंचमहाभूत द्वारा कल्पितं सत् आत्मसत्तावशात् सदिव प्रतीत सूक्ष्मशरीरेण सह समस्तकर्माणि करोति एवं विद्यमानसूक्ष्मशरीरं स्थूलशरीरवत् किमपि न प्रतीयते॥ प्रतीयते चेत् एतत्सूक्ष्मशरीरं स्थूलशरीरेण सह किमर्थं कर्म करोति सूक्ष्मशरीरं स्थूलशरीरेण सह कर्म करोति चेद्द्रष्टा कर्म सूक्ष्मशरीरेण क्रियत एव॥ कथं ज्ञातव्यमित्युक्ते इदं सूक्ष्मशरीरं सूक्ष्ममिति॥ स्थूलशरीरवत् न प्रतीयते लोके यद्यद्वस्तु कर्मकर्तृत्वेन तिष्ठति त

स्थूलशरीरं करोति

तद्वस्तुएकमपिआश्रित्यकर्मकरणायोग्यं।तथैवकर्मापिकरोतीतिचेदप्ययद्व
स्त्वाश्रित्यकर्मकरोतीतितत्तत्कर्मआश्रयेणक्रियतइति॥अग्न्यादिषुप्रती
यते।तद्वदेवसूक्ष्मशरीरमपिस्थूलशरीरमाश्रित्यसकलकर्मकरोतीतिचेद
पिआश्रयस्वरूपसूक्ष्मशरीरस्यैवकर्मैवसमस्तकर्मापितस्मादेतत्कर्मद्वारा
स्थूलशरीरवत्सूक्ष्मशरीरमपिएतत्स्थूलशरीरापेक्षयाभिन्नत्वेनविचारि
तपुरुषंप्रत्याययति।ममचक्षुःममश्रोत्रंममवाक्ममप्राणाःममांतःकर
णंममबुद्धिरित्यनुभवेनापिस्थूलशरीरापेक्षयाभिन्नत्वेनसूक्ष्मशरीरंएकंप्र
तीयते।एवंकार्यरूपस्थूलसूक्ष्मशरीराभ्यांतत्तत्कारणीभूतंआत्मनोजीव
त्वेईश्वरत्वेजगत्कारणत्वेचउपाधिभूतंअवयवत्वादिभिःअनिर्वचनीयंश्रु
त्यादिभिःप्रकृतिरितिमायेतिअविद्येतिउच्यमानंकारणशरीरंएकमस्तीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्प्यते ।। किंच अहं अज्ञः अहं जडः अहं किमपि न जानामीत्यनुभवेन कारणशरी
रमेकमस्तीति कल्प्यते । अनेन प्रकारेण समस्तप्राणिनामपि त्रीणि शरीराणि सं
तीति निश्चयः ।। एवमात्मापि त्रिणि शरीराण्यपि जानन् सन् नपि त्रिभिः शरीरैः
सह विद्यमानः सन्नपि आकाशवत् तादृशशरीरैः सह मेलनरहितः सन् कालत्
त्रयेऽपि तिष्ठतीति । सद्रूपत्वेन समस्तसमष्टिव्यष्टिरूपशरीरत्रयात्मकप्रपंचनि
ष्ठपदार्थेषु एकेनापि पदार्थेन स्वयं अज्ञातः एतत्समस्तपदार्थानामपि ज्ञाताली
ति चिद्रूपः परप्रेमस्वरूपः अत एवानंदस्वरूप इति च प्रतीयते ।। एतादृश आत्मा
अहं मुमुक्षुणा ज्ञातव्यं । कार्यरूपशरीरत्रयमपि कारणस्वरूप एवं यथा द्वयोपि
ग्रत्सक्षेपाद्दृश्यते । श्रुत्यादिनिरूप्यमानाद्वितीयसमपि परिपूर्णत्वमपि आ
त्मनः कथं संगच्छतइति चेत् समष्टिव्यष्ट्यात्मकशरीरत्रयमेव तदेव शरीरत्र
यात्मकप्रपंच आत्मन्यारोपितं तिष्ठतीति । रज्ज्वादारोपितसर्पादीनां यथा रज्जु

५म ते १७

श्रीहरि
मननं
१००

प्र० १५

मात्रस्वरूपत्वं तथा आत्मन्यारोपितप्रपंचस्य आत्ममात्रस्वरूपं ॥ आत्मनो व्यतिरेके
ण वस्त्वंतराभावात् तस्मादात्मनः सद्वितीयसंपादकवस्त्वंतराभावात् अद्वितीय
त मेवेति सिद्धं ॥ सर्वदा अद्वितीयत्वेन परिपूर्णत्वं सिद्धं ॥ तथापि आत्मनो भ्रांत्या
व परिच्छेदकं प्रतीयमानदेशकालवस्तुनि आत्मनो व्यतिरिक्तानि न संतीति त्रि
विधपरिच्छेदशून्यस्वरूपपरिपूर्णत्वं सिद्धं ॥ एवंरूप आत्माहमिति मुमुक्षुणा
ज्ञातव्यं ॥ एवं यो जानाति तस्य कालत्रयेपि प्रपंचो नास्ति ॥ अस्ति चेदपि प्रा
रब्धं यावत्तिष्ठति तावद्देहेंद्रियादिप्रपंचः मिथ्याभूतः प्रतीयते तथाप्र
तीत्या जीवन्मुक्तस्य मिथ्याभूतः आभासरूपसुखदुःखप्रतीत्या न बाध
ते ॥ मिथ्यात्वं नाम रज्जुसर्पादिवत् ॥ स्वाधिष्ठानज्ञानेन बाध्यमानत्वे सति
स्वप्नमनोराज्यादिवत् ॥ पदस्यापि परस्यापि सत्ता नास्ति अहंवृत्तिनाशा
त् नश्यति ॥ मरीचिजलादिवत् अनिर्वचनीयमपि घटादिवत् सत्ताराहि
त्येन प्रतीयमानं तथा सत्योर्क्तं मिथ्यालक्षणमपि एतत्सम्यक् व्याख्या

यं

१००

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म

स्मकदेहेंद्रियादिप्रपंचे विद्यमाने तस्मात्सारमार्थिक स्वरूप आत्मा परम तत्वं त
द्दृशात्मापेक्षया भिन्नत्वेव त्वमात्मा प्रतीयमानस्य जगतो मिथ्यात्वे अस्मिन् संदेहो तनि
नास्ति ॥ तस्मात्त्वयो वा को वा शास्त्रोक्तसाधनसंपन्नः परमार्थाद्वितीयपरि
पूर्णसच्चिदानंद आत्माहमिति मां विना जगं नास्त्येव मिथ्याभूतत्वात् ॥ ज
गतामस्पर्शी एव नास्तीति संशयसंभावना विपरीतभावना न संतीति ज्ञा
तासि एव मुक्तः सएव विद्वान् सएव शास्त्रेपाद्यः सएव सर्वेषां पूज्यः इ सर्व आदि
ति शास्त्रसिद्धः ॥ एतस्मिन्नर्थे संशयलेशोपि नास्तीति सिद्धं । इति म
ननग्रंथे शरीरत्रयवर्णकं पंचदशावर्णकं समाप्ते ॥ ५ ॥ अथ तापत्रय
प्रकरणमारभ्यते ॥ अतः परं तापत्रयं निरूपयामः ॥ आध्यात्मिकाधि
दैविकाधिभौतिक भेदेन त्रिधा ॥ आध्यात्मिकं नाम शरीरमधिकृत्य वि
द्यमानक्षयरोगास्रोतज्वरसंनिपातादिकं ॥ अधिभौतिकं नाम मनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीहरी
मननेन
१०१

प्र॰१६

व्याद्रिभिः क्रियमाणोपद्रवाः ॥ अधिदैविकं नाम हिमातपजलवर्षवात्यादिभिः
क्रियमाणोपद्रवाः ॥ अनेन प्रकारेण तापत्रयं ज्ञानानंतरं । एतत्तापत्रयं शरीरं
क्रियाणामेव च । न तु साक्षिणो मम इति यो जानाति स एव मुक्त इति वेदांतसि
द्धः ॥ अथ ज्ञानस्य भूतवर्तमानभाविप्रतिबंधत्रयं तन्निरसनं च निरूपयामः ॥
तत्कथमित्युक्ते ॥ भूतप्रतिबंधो यथा ॥ यो कश्चन बहुकुटुंबी ब्राह्मणः । जी
वनार्थं एको महिषीं संपाद्य तत्क्षीरादिकं विक्रीय पुत्रभार्यादि संरक्षित
वान् । तदेकनिष्ठः एवं कंचित्कालमुषित्वा कर्मवशात् पुत्रादिषु नष्टेषु एतावत्पर्यं
तं अयं संसारः सत्य इति व्यवसितवानस्मि अधुना तु स्वप्नवज्जातः संसारे तुच्छ
त्वबुद्धेः स सो संसारस्त्याज्यः इति वैराग्यबुध्यनंतरं संन्यस्य सद्गुरूणां निकटे श्र
वणमनननिदिध्यासनादीन् सम्यगभ्यस्य स्थितस्यानंतरं गुरवः एनं माकुर्यमप्र
श्नुः । एतावंति दिनानि त्वया श्रवणादीन्यभ्यस्तानि किं एतावता ~~कृतकृत्योसि~~ कृतकृत्यो

१०१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हमितिबुद्धौतिष्ठतिवा। इतोपिकर्तव्यापेक्षास्तीति पृष्टे तेनोक्तं। इतःपरं किंचिद
प्यिन पश्यामि। पूर्वाश्रमे मम एका महिषी आसीत्। सा महिषी मृता। सैव श्रवणे म
नने निदिध्यासने जपकाले च साक्षात्कारितया तिष्ठति। गुरुणा तु यथार्थमेव व
क्तव्यमिति प्रस्तुतरं दत्तवानिति लोके गाथा प्रसिद्धिः। ततो गुरवः अयं भूतप्रतिबंध
इति विचार्य एतन्निरसनार्थं तस्यामेव महिष्यां स्नेहमनुसृत्यैव तत्रोपदेशं कृतवं
तः। तेनैव प्रकारेण शिष्यमाकार्नं कृत्वा तव साक्षात्कारीभूत महिषी अस्ति भाति
प्रियनामरूपात्मकपंचावयवसहिता तिष्ठति। तत्र पंचावयवेषु नामरूपं चेति द्व
यमपि निरस्य अस्ति भाति प्रियात्मकं चिंतयेत्युपदिष्टवंतः। तथैव सोपि बकुरः
चिंतयित्वा नामरूपं चेति द्वयं निरस्य सच्चिदानंदरूप आत्माहमिति विदितवे
द्यः आसीदिति प्रसिद्धं। एवमेव विद्यारण्यस्वामिनः प्रतिबंधत्रयं तन्निरसनं
च पंचदशीप्रकरणे निरूपितवंतः। तत्र वर्तमानप्रतिबंधो नाम विषयासक्तिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रज्ञा

रतिर्मांद्यमिति कुतर्क इति विपर्ययदुराग्रह इति चतुर्धा। तत्र विषयासक्तिर्नामेति स
र्वविषयेषु रूढासक्तिः। प्रज्ञामांद्यं नाम उक्तार्थः सर्वात्मना बुद्धौ नारोहति॥ कुतर्को
नाम गुरूक्तेऽर्थे विपरीतार्थचिंतनं विपरीत दुराग्रहो नाम अहं श्रोत्रियः अहं पंडि
५दि तः अहं विरक्त इत्यादि देहे क्रियाध्यासबुद्धिः। एतेषां निवृत्तिप्रकारस्तु शमादिषड्भिर्वि
षयासक्तिर्निवर्तते॥ पुनः पुनः श्रवणेन प्रज्ञामांद्यं निवर्तते॥ पुनः पुनः मननेन
कुतर्को निवर्तते॥ पुनः पुनः निदिध्यासनेन विपर्ययदुराग्रहो निवर्तते॥ अनेन
प्रकारेण प्रतिबंधनाशे विद्यमाने मुमुक्षोः स्वयमात्मेति बुद्धौ निश्चयो भवति॥ आ
गामिकप्रतिबंधो नाम कदा प्राप्यते वा न ज्ञायते। तत्र पापकर्मणा प्राप्नोति॥ तस्य
ज्ञानं कथं भविष्यति उपस्थितं पापं मुमुक्षौ। कंचिद्विषयं प्रतिवारूढत्वेन आसक्तिं
स्थापयति। अथवा उपस्थितं वा पुण्यं दयारूपमासक्तिमुत्पादयति। मुमुक्षुपुरुषः
तां आसक्तिं विप्रतिबंधत्वेन जानीयात्। अकर्ता असंगोऽहं एतादृशं मोक्षमास

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

।ति

क्तिः किं करिष्यतीति तोमः परिगण्येव लिष्ठाः तस्य कानिचिज्जन्मानि ददात्येवज
न्मानि ददाति इत्यस्मिन्नर्थे श्रुतिस्मृतीतिहासपुराणानि प्रतिशं कुर्वंति ॥ यथा वा
मदेवेन एकं जन्म प्राप्तं । भरतेन त्रीणि जन्मानि प्राप्तवान् । अन्येपि अनेकानि प्राप्तवं
तः ॥ तस्मात् मुमुक्षुः एतत्प्रतिबंधत्रयं सम्यग्विचार्य यथा प्रतिबंधो नायाति तथा
तन्निरस्य स्थितश्चेत् स [illegible] मुक्तः नोचेत् । तस्य कानिचिज्जन्मानि प्राप्नुवंति संदे
हलेशोपि नास्ति ॥ एतत्त्रितयमध्ये एकस्मिन्नपि विद्यमाने तस्मिन् जन्मनि तस्य मुक्ति
र्नास्तीति सिद्धं ॥ इति प्रतिबंधत्रयप्रकरणं ॥ अथाध्यात्मनिरूपणं तत्र श्रोत्रमध्या
त्मं मिस्फक्तं ॥ शब्दस्तत्राधिभूतं । दिक् अधिदेवतं ॥ त्वक् अध्यात्मं । स्पर्शोधिभूतं ॥
वायुरधिदेवतं ॥ घ्राणमध्यात्मं । गंधोधिभूतं । अश्विनावधिदेवतं । वागध्यात्मं ॥
यकव्यमधिभूतं ॥ अग्निस्तत्राधिदेवतं ॥ हस्तावध्यात्मं ॥ आदायमधिभूतं । इंद्रो
ऽधिदेवतं ॥ पादावध्यात्मं ॥ गंतव्यमधिभूतं । उपेंद्रोधिदेवतं ॥ पायुरध्यात्मं । विसर्गोधि

३ चक्षुः अध्यात्मं रूपं अधिभूतं आदित्सः अधिदेवतं ॥ जिह्वाध्यात्मं

रसः अधिभूतं वरुणो अधिदेवतं

भूतं ॥ मृत्युरधिदैवतं ॥ उपस्थमध्यात्मं ॥ आनंदोऽधिभूतं ॥ प्रजापतिरधिदैवतं
॥ मनोऽध्यात्मं ॥ मननमधिभूतं ॥ चंद्रस्तत्राधिदैवतं ॥ बुद्धिरध्यात्मं ॥ निश्चयो
ऽधिभूतं ॥ चतुर्मुखोऽधिदैवतं ॥ अहंकारमध्यात्मं ॥ अभिमानोऽधिभूतं ॥ रुद्रो
ऽधिदैवतं ॥ चित्तमध्यात्मं ॥ धारणामधिभूतं ॥ क्षेत्रज्ञोऽधिदैवतं ॥ तमोऽध्यात्मं ॥
विकारोऽधिभूतं ॥ ईश्वरो दैवतं ॥ एतत्सर्वं मिलित्वा जाग्रत्स्वप्नसुषुप्त्यवस्था
भवंति ॥ एतत्त्रितयसाक्षि आत्मा [illegible] विकारः ॥ आनंदरूपश्चिति यो जाना नि
ति तस्य जन्ममृत्युशोकादि नास्तीति सिद्धांतः ॥ ७ ॥ नवविध संसारं निरूपया
मः ॥ तत्कथमित्युक्ते ॥ ज्ञाता ज्ञानं ज्ञेयं ॥ भोक्ता भोज्यं भोगः ॥ कर्ता करणं क्रिया ॥
अनेन प्रकारेण नवविधा संसारः ॥ ८ ॥ पक्षांतरमप्युच्यते ॥ पंचभूतानि ज्ञाने
द्रियाणि ॥ कर्मेंद्रियाणि ॥ प्राणादिपंचकं ॥ मनादिचतुष्टयं ॥ स्थूलशरीरं ॥
त्रिविधकर्म ॥ अवस्थात्रयं ॥ एतेषां कारणीभूतमज्ञानमपीति नवविधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संसारः॥ एतस्यैव नवविधप्रपंचस्यापि नाम एवं नवविधः संसारस्वरूपम्
पि अहंकारस्यैव साक्षिणो मम नास्त्येवेति यो जानाति स एव मुक्त इति वेदांतसिद्धां
तः॥ ७॥ ज्ञानेंद्रियाणि खलु पंच तथापराणि कर्मेंद्रियाणि मन आदि चतुष्ट
यं च॥ प्राणादिपंचकमथो वियदादिपंचकामश्च कर्मतमः पुरमष्टमी पुरः॥ ८ च४
वैराग्यबोधोपरतीनां हेतुस्वरूपकार्याणि तेषामवधिमपि [illegible] निरूपयामः॥
पु वैराग्यबोधोपरतयः॥ विवेकिषु एकैकं सहायीभूयैव प्रायेण मिलित्वा तिष्ठं
ति कर्मवशात्॥ एकैकस्य समये एकस्मिन् पुरुषे केचिन्नास्ति चेन्मास्तु नाम॥
तेषां वैराग्यबोधोपरमाणां हेतुः कः स्वरूपं किं कार्यं किमिति विचार्यमसे
के मुमुक्षुणा ज्ञातव्यं॥ तेषु त्रिष्वपि मध्ये वैराग्यहेतुस्वरूपकार्याणि का
नीत्युक्ते समस्तविषयेषु दोषदृष्टिरेव हेतुः तेषु विषयेषु तुच्छेषु मध्यनंतरं
देहधारणाव्यतिरिक्तविषयाणां वांस्याराग्नवलप्रतीतिरेव स्वरूपं॥ तादृशो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयाणांअनुभवमकृत्वैव किमर्थं विषयास्त्यक्ताइतिपुनर्विषयेध्यानि
रस्यतत्रासक्तिराहित्येन स्थितिरेवकार्यं॥एतत्रितयमपिवैराग्यस्यअ
साधारणंजातं पररंबोधस्यहेतु स्वरूपकार्याण्युच्यंते॥श्रवणमनन
निदिध्यासनान्येवहेतवः॥तैः श्रवणादिभिः देहेंद्रियादिप्रपंचसकाशा
त्आत्मस्वरूपंविभज्यपृथक्कृत्वाआत्मस्वरूपमेवाहं॥एतद्देहेंद्रियादिप्रपं
चोनाहं॥एतस्मिन्देहेंद्रियादिप्रपंचेप्रतीयमानेपिकालत्रयेपिना
स्तीतिबुद्धैर्दृढीकृतायायोनिश्चयः तज्ज्ञानंस्वरूपं॥पुनरपि
अनात्मस्वरूपेदेहेंद्रियादौअहमितिबुद्धिनिराकरणपूर्वकत्वेन
स्थितिरेवकार्यं॥एतत्त्रितयंबोधस्यासाधारणं॥अथोपरतेःहे
तुःस्वरूपकार्याणि निरूपयामः॥यमनियमादयःहेतवः

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्तनिरोधनं स्वरूपं ॥ सर्वव्यवहारभानानं कार्यं ॥ एतत्त्रितयमप्युपरतेरसा
धारणं ॥ अनेन प्रकारेण बोधादीनामन्योन्यं पृथक् कार्याभावपूर्वकं निरूपितं ॥ एते बो
धादयोपि मोक्षस्य समप्रधाना वा नो चेत् कोप्रधानो वा एकमुपसर्जनं नो चेदेकं प्रधा
नं द्वावुपसर्जनमिति एषु साधनानांतरं निरपेक्षेण मोक्षसाधकत्वेन ज्ञानस्यैव
प्राधान्यं वैराग्योपरती साधने एतत्त्रितयं कस्मिन्पुरुषे विद्यमानं चेत्स्वकृत
पःफलं एकस्मिन्पुरुषविशेषे ऽतत्त्रितयमध्ये एकं बोधः क्रमेणाप्रतिबध्यते चे
७पि त् मोक्षो प्रतिबध्यते यस्य पुरुषस्य वैराग्योपरती पूर्णे वर्तेते ज्ञानं नास्ति तस्य
मोक्षो नास्ति ॥ तर्हि वैराग्योपरतोसौ वैयर्थ्यं प्राप्तमिति चेत् वैराग्योपरती
जाते चेत् ताभ्यां पापनिवृत्तिद्वारा पुण्यलोकावाप्तिः यस्य पुरुषस्य ज्ञानं संपू
र्णं वैराग्योपरती न स्तः तस्य मोक्षोस्त्येवेति किं प्रसिद्धं ॥ वैराग्योपरत्योः सुप्र
योजनं प्रत्यक्षदुःखनिवृत्तिः । तर्हि वैराग्यबोधोपरतीनां अवधिः किं पर्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीहरि
मनन
१०५

प्र० १९६

श्च निरूपितः प्रारब्धस्य नानाविधत्वात् ज्ञानिनामपि व्यापारा अपि ना

तेत्युक्ते अतः लोके तपणीकारपर्यंतं वैराग्यावधि अज्ञानकाले एतद्देहेंद्रिया
दिसंघाते एवाहमिति दृढनिश्चयवत् अनात्मबुद्ध्यभावेन आत्मस्वरूपं अह
मिति दृढनिश्चयपर्यंतं बोधावधिः सुषुप्ताविव जाग्रत्यपि मुमुक्षुः सर्वविष
यानपि विस्मरत्स्य यदा तिष्ठति तावत्पर्यंतं उपरत्यवधिः ॥ एवं वैराग्यबोधोप
रतीनां तारतम्यमपि अवधिं विवेकिनस्तु तेषां व्यापारान् दृष्ट्वा शास्त्रार्थमे
वाज्ञात्वि नोपेक्षेवमेव व्यवहारतः स्थिता इति न भ्रमंति ॥ तेषां तेषां कर्मणा
तेते नानाविधव्यापारे मिलिताश्चेदपि ज्ञानमपि ज्ञानफलीभूता मुक्तिर
पि सर्वेषां समानैवेति शास्त्रसिद्धांतः ॥ ४ ॥ अतः परं ज्ञानस्य प्रतिबंध
कवासनात्रयं निरूपयामः ॥ लोकवासना देहवासना शास्त्रवासना
चेति तासु मध्ये लोकवासनाम लोके सर्वे पुरुषा अपि स्वस्य निंदाय

तत्व च चालित्वं ति

१०६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थानकुर्वंति सर्वदा स्तोत्रमेव यथा कुर्वंति तथा अभिनिवेशः लोके वासनेत्युच्य
ते॥ तन्निवृत्तिप्रकारो ऽप्युच्यते॥ अहं केनोपि निंद्यो न भवामि मां सर्वे स्तुवंत्वेवे
ति ईश्वरेणापि तं संपादयितुं न शक्यते इति अज्ञो जनाः। निंदंतु चेन्निंदंतु न
म स्तुवंतु चेत्स्तुवंतु नाम निंदास्तुतिभ्यां मम हानिर्लाभो न स्त इति यज्ञानं त
द्वप्रतिबंधक निवृत्ति शब्दवाच्यं॥ तर्हि ईश्वरमपि निंदंतारः संति वेति
वेत्सुक्ते सर्वलोकेश्वरः चतुर्मुखः ब्रह्मा शिवेनापि कुमारस्वामिनापि शि
क्षित इति ज्ञात्वा ब्रह्मणो महिमानं अजानंतः तं ब्रह्माणमपि निंदयंति।
किंच सर्वेषामपि आत्मस्वरूपः लक्ष्मीपतिः विष्णुः जीवैर्[illegible]क इति शि क्षेत
वेन शिक्षित इति उत्कृष्टोभूत्वा तन्महिमानमजानंतः [illegible]मपि विष्णुं निंदयं
ति। किंच सर्वेषामपि गुरुः सुहृत् महादेवः दक्षप्रजापतिप्रभृतिभिः दुर्वि
ल इति उत्कृष्टोभूत्वा तमपि शिवं निंदयंति। एवं अंतर्यामिणामपि निरीश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीहरि
मनन
१०६

म.१६

रसांख्याः केचन मीमांसकाश्च अंतर्यामीनास्त्येवेति निंदयंति॥ एवं ईश्वराइति
संमताये रामकृष्णादयः शिशुपालप्रभृतिभिर्निंदिताइति पुराणप्रसिद्धेः पामरज
नाः बहिर्मुखाः तन्महिमानमजानंतो निंदयंति। तर्हि कस्येयं निंदेति विचारया
मः॥ आत्मन इति चेत् अद्वितीयस्य परिपूर्णस्य सर्वात्मकस्यात्मनः निंदा केर
पि कर्तुं न शक्यते कथमिति चेत्॥ स आत्मा सर्वप्राणिनामपि स्वरूपमिति स्व
स्य स्वयमेव निंदाकारको जातः॥ इष्टापत्तौ तु लोके स्वेन अन्यनिंदा दृष्टा कोपि
स्वस्य स्वयं न दूषकः। तर्हि देहस्येति चेत्। तादृशदेहः मुमुक्षुभिः पूर्वमेव निं
दितात्ति सदेहः परेण निंदितश्चेत् मुमुक्षूणां तल्लाभ एव भवति। कथमिति
चेत् एकस्य शत्रुः अन्यस्य निंदां करोति चेत् तादृशनिंदाकर्तुः यथा प्रियं तथ
दिवविवेकिनामपि स्वदेहं निंदितवान् स्वस्य प्रिय इति ज्ञातव्यं। एतत्त्रिविधश
रीरत्रुमध्ये स्थूलशरीरमेव निंघते। अन्ययोस्तु अदृश्यत्वात्। निंदाविषयत्वं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संगच्छते ॥ एतानि शास्त्राण्येव नित्यं विषयाणि न जातानि । इति सर्वात्मतस्य स-
र्वेषामात्मभूतस्य असंगस्य साक्षिणः स्वप्रकाशस्वरूपस्यात्मनः नित्यस्पर्शेना-
त्मेति विचार्यमाणे पुरुषस्य लोकवासनास्वरूपप्रतिबंधो न स्यादिति प्रपंचातीतस्य
परमात्मनेदंस्वरूपस्य मम केनापि किं प्रमाणास्तु ति निराकृतिश्रयः नोसघतेन स्प-
र्श्यतीति विचारवतो पुरुषस्य हर्षे स्वरूपविकारः न स्य स्वेव अस्मिन्नर्थे श्रुतिस्मृति
इतिहासपुराणानि प्रमाणानि ॥ छ ॥ देहवासना नाम ॥ आयुः संपादनीयमिति आ-
रोग्यं संपादनीयमिति लावण्यं संपादनीयमिति अभिनिवेशो देहवासना ॥ आ-
युर्नाम जीवच्छरीरस्य चिरकालावस्थानं तद्देहस्थितिरपि कर्माधीना सति
सा देहस्थितिः पुरुषयत्नात् साध्यत इति एवं न युज्यते इति वक्तुं न शक्यते ।
लोके केचन योगाभ्यासं कृत्वा तेन दीर्घकालमायुः संपादयंतीति पुराणे
सु दृश्यत इत्युच्यते चेत् उ योगाभ्यासः अनात्मविषय इति ज्ञानस्यान्त

गम प्रकार एव क्रियते तस्मात् देहः कर्माधीन इति कर्म यावत्पर्यंतं तिष्ठति तावत्प
र्यंतं देहस्तिष्ठति तस्मात् देहोपि वा ऊकालं स्यात् अस्मिन्नर्थे सस्मिन्न मयायतः कृ
नकृत इति ॥ देहे मुमुक्षुणा उपेक्षा कर्तव्या अस्मिन्नर्थे श्रुतिस्मृतीहासपुराणा
नि प्रमाणं ॥ एवमेव आरोग्यमपि पुरुषेण संपादयितुं न शक्यमेव आरोग्य
मपि कर्माधीनमिति पुरुषप्रयत्नेन न सिध्यति सिध्यति चेदपि मुमुक्षूणां त
द् शास्त्रलाभो वा निर्वाहो नास्ति तादृशआरोग्य सिद्धिवशात् हेतु ऽसन्देह
र्थे स्वरूप विकारोपि आरोग्यं न सिध्यतीति ॥ तदुसन्देहः स्वस्वरूप
विकारोपि अंतःकरणस्यैव अंतःकरणसाक्षिणो मम नैते विकारान
संसैवेति विचार्य आरोग्यं न सिध्यति अस्मिन्मुमुक्षुभिः अभिनिवेशोन
कर्तव्यः ॥ अस्मिन्नर्थे श्रुतिस्मृतीहासपुराणानि प्रमाणं ॥ नदेव श्रुति
लावण्यवतिपुरुषेपि कालांतरे कुरूपप्राप्तिर्दृष्टेति लावण्यप्राप्तिरपि भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतिचेत् तादृशायत्नः व्यर्थो जात इति दृष्टत्वात् लावण्यं केरपिन संपाद्य
मेव तल्लावण्यसंपादनाभिनिवेशपूर्वकत्वेन जायमाना प्रवृत्तिः समस्तपारलौ
किकप्रवृत्तेः विघातकत्वेन अनर्थपरंपराहेतुत्वात् तल्लावण्यं सिध्यतीत्यस्मिन्न
मुमुक्षुणाऽभिनिवेश उपेक्ष्य एवेति श्रुतिस्मृतीतिहासपुराणप्रामाण्यं ॥ श्री ॥ ति नि
शास्त्रवासना ॥ शास्त्रपाठेन ज्ञानतदनुष्ठानेच व्यसनं शास्त्रविषयवासना
रूपप्रतिबंधः मोक्षसाधनानां प्रतिबंधः कथमिति चेत् भारद्वाजनारदादयः
वेदशास्त्राणि सांकल्येन अध्येष्याम इत्युपक्रम्य बहुदुःखं प्राप्य असाध्य
मिति ज्ञात्वा परित्यज्य एवं तद् इति श्रुत्यादिषु श्रूयत इति वेदांतवेदांतव्यक्तिलिं
अन्यशास्त्राभ्यास आलविचारस्य विरोध इति तत्प्रतिबंध इति तत्प्रतिबंध
लिरुच्यते। तस्मात् शास्त्रपठनमपि तज्ज्ञानमपि तदनुष्ठानमपि सांकल्ये
न संपादयितुं न शक्यत इति मुमुक्षुणा एतेषु सांकल्येन संपादनाभिनिवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शास्त्राज्यएवलोकेशास्त्राभ्यासिनःपूर्वाभ्यस्तंविस्मृत्य दुःखमेवोदेति॥स्व
यंवादतोजयेपिपराभवेपिदुःखमेवोदेतितस्माच्छास्त्राभ्यासादयः सर्वेदान
र्थहेतुत्वात्मुमुक्षुणाअन्यशास्त्राभ्यासादुपरतिरभ्यासितव्याएवंक्रिया
र्येअन्यशास्त्राभ्यासादुपरतिरभ्यासितव्याएवंविचार्येअन्यशास्त्राभ्या
सादुपरतिंप्राप्तश्चेत्तेशास्त्रविषयवासनालक्षणप्रतिबंधःनस्यादिति
९ति श्रुतिस्मृतीहासपुराणेषूच्यतइतियएवंविचार्यप्रतिबंधंनिराकरोतिआ
त्मप्रतिपादकशास्त्रार्थविचारेणज्ञानंसंपादयतिसमुक्तइतिशास्त्रप्रतिबंधो
क्तः॥श्रीहरी॥अथासुखवासनारूपप्रतिबंधंनिरूपयामः॥सप्रतिबंधः
स्वस्मिन्नप्रतीयतेचेद्दर्पिकस्मिंश्चित्समयेपुत्रस्याचारदर्शनानंतरंआ
क्षेपादिभिःसप्रतिबंधःप्रकटीभवतिकथं॥अरेभ्रष्टाचारःएवमेवक्रियते
वातर्हिसंभ्रष्टोसिसंदेहोनास्तिअरेतवआचारोपदेष्टागुरुःकोवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोपि भ्रष्टो भविष्यति संदेहो नास्ति । अरे भ्रः प्रभृतिः अस्मत्संमुखे त्वया नागंतव्यं अरे ल
अस्मान् नमस्कृत्य जीवितः गच्छ अस्मत्पादतीर्थं गृहीतजीवितः सन् गच्छ अस्मच्छु
श्रूषापेक्षया वर्तंतं तद्विचारे किं तिष्ठति अस्मत्सेवन पातु सकलाभीष्टसिद्धिर्भविष्यति
अस्मान्विना अन्येषां शुश्रूषा न कर्तव्या । नमस्कारोपि न कर्तव्यः ॥ अरे त्वं न सुहृद्वा
र्ता कृतवानसि तस्य नमस्कारं कृतवानसि । अस्मत्संनिधौ त्वया नागंतव्यं । अरे स्तः ल
अ स्माद् अगणय्य अस्मत्स्वागतेषु उत्थानादिक्रियां न कृतवान् यो गुरुः ततः तस्यभा
गुः एतावतैव समाप्तमिति । भृगुर्वामसोपि भस्मीभूतः अन्योपि ऐश्वर्यमदेन अ
स्मत्परामर्शमकृत्वाव तस्यैश्वर्यं तावतैव परिसमाप्तम् भस्मासुरो नामः तस्या
चैश्वर्यं निरागमत अरे अस्मत्संनिधौ मंत्रोपदेशं गृहीत्वा अस्मान परिगणय्य
तिष्ठसि अतस्त्वं भस्मीभूतो भवसि इति अस्माभिरुक्तं तथैव स भस्मीभूयो
भवत् ॥ अस्माकं महिमा प्रवादैः ज्ञायते चेत् ज्ञायते ॥ नान्यैः वयमेव विभु
त भविष्यवर्तमानकालवर्त्तान् सर्वान् विस्मः पुरापि अनेकसंरक्षणं कृतवंतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥१०८॥

स्मः॥अधुनाप्यनेकान् संरक्षयामः॥इतोप्यूर्ध्वं अनेकान् संरक्षिष्यामः॥अस्माभिरेवहृद्य
संपादनं कृतं सर्वदानकर्म कृतं च॥अस्मन्मनः यथा कामयते तत्सर्वं पुरस्तिष्ठतीति ममइद
द्रव्यं तिष्ठति इदं सर्वद्रव्यं प्राप्यत इति किंच अयं अधः शिरोभूत्वा तिष्ठतीति सु अधः शिरोभू
त्वा तिष्ठतीति॥अन्येप्यधः शिरः सोभूत्वा तिष्ठंति येमत्ताः ता सर्वानपि संहर्तुं गच्छामीति तव
मरो आयाति मरिष्यसि॥अहमैश्वर्यवान् अहमेव भोगी अहमेव सिद्धः अहमेव बलवान्
अहमेवाढ्यः अहमेव जनसंमतः मम समानः कोपि नास्ति॥यज्ञं करोमि चेदहमेव करोमि
ब्राह्मणभोजनमपि मयैव कर्तव्यं दानमपि मयैव कर्तव्यं मम सामर्थ्यं कस्यापि नास्ति ममस
गुणाः कस्यापि न संति॥अहं मंत्रशास्त्रेपि महाबुद्धिवानस्मि॥कश्चन मम द्वेषी स्थितः॥त
स्य एको मंत्रो मया प्रयुक्तः स त्रिभिरेव दिनैः भस्मीभूतः एकः शुश्रूषुः स्थितः तस्य एको मं
त्र उपदिष्टः सोपि षष्ठेश्च यादि वर्द्धिमासः अन्योपि कश्चित् अस्मत्सान्निध्यावागंतुं प्रवृत्तः॥
एकमंत्रोपदेशं कृतवान् अस्मि॥स एतन्मंत्रं ध्यात्वा त्रिभिरेव दिनैः कृतार्थो भवत्॥पूर्वमपि के
चिन्मुद्यते स्थिताः तेषां अस्मन्महिमा नास्ति॥ये अस्माकं शुश्रूषवो ऽवस्थिताः ते कृतार्थाः॥
यद्यदुयुं तत्सर्वमत्यमेवदत्तं चेते कृतार्था भविष्यंति एतच्छरीरं संरक्षितारः तेषां परलोकः
सिद्ध एवेति॥अस्माकं दर्शनं येषां लभ्यते तेषां सर्वाणि पापानि नश्यंतीति॥अस्मत्सा

ज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नूएवशिरोभिः वहंतिते कृतार्थाइति अस्माकं एतावन्महिमानास्ति चेत् सर्वेपि अस्मान् किमर्थ
मुपासीरन् तस्मात् वयमेव श्रेष्ठाः संदेहो नास्ति॥ बहुप्रकारेणोच्यमानं किं तिष्ठति॥ एतच्छ्रु
रिवंचनानंत्वा मनोवाक्कायैः ईश्वरबुद्धिं कृत्वा ये पूजां कुर्वंति॥ तेषां मोक्षः करतलस्थितः संदेहो
नास्तीति सिद्धमिति॥ एवमनर्थरूपचित्तवृत्तिः असुरवासनाप्रतिबंध इत्युच्यते॥ एवं प्रतिबंधो
महानर्थहेतुरिति अनात्मविषयत्वात्॥ आत्मज्ञानस्य विरोधित्वाच्च मुमुक्षुणा एतत्प्रतिबंधविना
शे साध्यमेव॥ एतत्प्रतिबंधे विद्यमाने श्रवणादीन् [illegible]यः करोति तस्य तस्मिन् जन्मनि ज्ञानोत्पत्तुमर्ह
ति॥ तर्हि श्रवणाद्यभ्यासो व्यर्थ इति चेन्न॥ अश्वमेधादीन् कृतवंतः ये लोकाः तान् लोकान् प्राप्य
बहून् भोगान् भुक्त्वा ब्रह्मनिष्ठानां कुले संभूय संसारासक्तोपि सन् पूर्वजन्मवासनावशात् श्र
वणादिकमेव पुनः पुनः अभ्यस्य तस्य प्रतिबंधाः कुत्रचन वर्तंते वेति विचार्य ते प्रतिबंधनिवृत्तिं श्रवणा
दिभिरेव कृत्वा तैरेव ज्ञानं संपाद्य मुक्तो भवतीति इति श्रुतिस्मृतीतिहासपुराणानि ब्रुवंति॥ एवं
यः प्रतिबंधं निरस्य श्रवणाद्यभ्यासेन ज्ञानं संपादयति स मुक्तो भवतीति वेदांतसिद्धांतः॥१४॥
अथ श्रवणमनननिदिध्यासनानि निरूपयामः॥ श्रवणं नाम सर्वेषां वेदांतानां षड्विधलिंगैः
ब्रह्मस्वरूपे आत्मनि तात्पर्यनिर्धारणं॥ मननं नाम श्रुतस्यार्थस्य श्रुतानुसारियुक्तिभिः एकवाक्यत्वा
नुचिंतनं॥ निदिध्यासनं नाम विजातीयकामक्रोधादित्यागपूर्वकं सजातीयाहं ब्रह्मास्मीति

नैरंतर्य चिंतनं एतेषां प्रयोजनं तु सर्वदा श्रवणं सर्वसंशयान् निरस्यति ॥ सर्वदा मननं तु
असंभावनां निरस्यति ॥ सर्वदा निदिध्यासनं विपरीतभावनां निरस्यति ॥ प्रतिबंधवाहुल्य
वतः सर्वदा एतत्त्रितयं कर्तव्यमेव प्रतिबंधनिवृत्तिपूर्वकं सूक्ष्मबुद्धिमतः श्रवणकालेम
नननिदिध्यासना न्यपि सिध्यंति ॥ कथमित्युक्तौ ॥ स्वयं बुद्धिशालिः सन् गुरुसंनिधौ पा
वचीसयुक्तिभिः वाक्यार्थालोचनं कृत्वा अर्थस्यैकवाक्यत्वात् मतद्वैतस्य मननं चि
तस्य विषये ष्वप्रवृत्ता श्रवणमननाभ्यां सर्वसंशयादिरहितस्वरूपेण एकाग्रेण
संस्थाप्य तिष्ठतीति ॥ तस्य निदिध्यासनमपि सिध्यति ॥ सर्वदा यः प्रतिबंधैः सहति
तितस्य सर्वदा श्रवणमनननिदिध्यासनानि बहुशः कर्तव्यान्येव सर्वदा यः सूक्ष्मबुद्धिः प्र
तिबंधैः रहितः तिष्ठति तस्य श्रवणकाले श्रवणमनननिदिध्यासनानि सिध्यंति एवं अ
स्मिन्नर्थे संशयलेशोऽपि नास्तीति सिद्धं ॥ छ ॥ छ ॥ अथ संशयः असंभावना विपरीतभावना
२ग च निरूप्यते ॥ दृष्टपूर्वकं संशयो नाम ॥ वस्तु द्वयमंते व्याप्य तिष्ठति ॥ यथा मार्गे गच्छतः पुरु
षस्य पुरः वर्तमाने दर्शने स्थाणुर्वा पुरुषो वेति चित्तवृत्तिः संशय उच्यते ॥ असंभावना नाम इह
स्थाणोरागमने कारणं किं स्थाणुरयं तु नार्हतीति चित्तवृत्तिः असंभावना विपरीतभावना

CC-0, In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामायं सर्वस्मिन्नास्थापुर्नभवति ॥ किंतु पुरुष इति निश्चयरूपचित्तवृत्तिः ॥ दार्ष्टांतिके तु प्रमा
णगतसंशय इति प्रमेयगतसंशय इति प्रमाणगतासंभावनेति प्रमेयगतासंभावनेति प्रमा
णगतविपरीतभावनेति प्रमेयगतविपरीतभावनेति ॥ द्वैध्यं ॥ एतेषु प्रमाणगतसंशयो नाम प्र श्रुति
माणं कर्म प्रतिपादयति वा नो चेत् सिद्धप्रसंग ब्रह्मप्रतिपादयति वेति चित्तवृत्तिः ॥ प्रमेयगत
संशयो नाम ब्रह्म जगत्कारणं प्रधानादयो वेति चित्तवृत्तिः ॥ प्रमाणगतासंभावनानाम ब्र
६त ह्मणः सिद्धवस्तुत्वात् प्रमाणांतरेणापि विद्यादिवत् ज्ञातुं शक्यत्वात् तादृशसिद्धब्रह्म कथं प्रति मा ६
पादयतीति निश्चयः ॥ प्रमेयगतासंभावनानाम जगदपेक्षया ब्रह्मणो वैलक्षण्यात् जगतः ब्र
ह्मकार्यत्वाभावित्वं नार्हति किंतु प्रधानादय एव जगत्कारणमिति निश्चयरूपचित्तवृत्तिः प्र
माणगतविपरीतभावनानाम ब्रह्मसिद्धवस्त्विति श्रुतीनां तात्पर्यनिर्धारणात् ब्रह्मप्रतिपाद
नेतात्पर्यं नास्ति किंच श्रुतयः सिद्धब्रह्मप्रतिपादिकाश्चेत् तद्रूपस्य प्रवृत्तिनिवृत्त्योरदर्शना
त् प्रयोजनं भवेत् स्यात् ॥ लोके प्रवृत्तिनिवृत्तिपूर्वकत्वेन पुरुषार्थदर्शनात् सर्वे वेदांता अपि
कर्मपरा एवेति ॥ प्रमेयगतविपरीतभावनानाम लोके तदुपजनाकार्यकारणानां सारूप्यद
र्शनात् तथैव भूम्यादिविकारैः सह विद्यमानस्य जगतः कारणरूपब्रह्मापि अभूम्यादिभिः
सह वर्तत इति वक्तव्यं तथा तु न दृश्यते तस्मात् प्रधानादय एव जगत्कारणमिति दृढो निश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री...सिंह
...ग्रंथ
॥११९॥

पः प्रमेयगतविपरीतभावना एवमांतरे प्रतिबिंबजीवोनामाहं जगन्मध्येकोप्यहं प्रतीयमानः अहं
जगद्विलक्षणं ब्रह्मास्मि न वेति प्रत्यगात्मविषयकः संशयः ॥ तथैव कर्तृत्वसाधनेकर्मसुकृतः ॥ अहं
परिच्छिन्नोहं जननमरणादिसहितः एतादृशस्य मम एतेषां विपरीतलक्षणो निवृत्ति ब्रह्म ति२
स्वरूपत्वं कथं संघटत इति निश्चयः प्रत्यगात्मविषयासंभावना ॥ एवं स्वयमेव कर्ता चेत् स्वबु
५ मापरप द्धिस्थकर्म कुरु न कुरु एतत् ... पश्य एतत् ग्रहाण मा ग्रहाण एतत् भक्ष माभक्ष इति विधि
निषेधकशास्त्रं कथं प्रवर्तते ॥ तस्मात् अहं कर्ता च सदेहो नास्मीति तत्कोप्यत्वोपयोग्याभिम
नादीनां स्वधर्मप्रतीतिलक्षणा प्रत्यगात्मविषया विपरीतभावना ॥ एवं यः संशयासंभावना
विपरीतभावना विचार्यतां निरस्य ज्ञानं संपादयति स एव मुक्त इति वेदांतसिद्धांतः ॥ ७ ॥
अथ श्रुतितात्पर्यनिर्णयषड्विधलिंगानि निरूपयामः ॥ उपक्रमोपसंहारावभ्यासोपूर्वता
फलं अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णयः इति षड्विधलिंगेषु उपक्रमोपसंहारौ एकं लिं
गं अभ्यासः ॥ एकं लिंगं अपूर्वत्वमेकं लिंगं फलमेकं लिंगं अर्थवादमेकं लिंगं उपपत्तिरे
कं लिंगं ॥ एतैः षड्विधैः श्रुतीनां तात्पर्यनिर्णयो भवति अतस्तेषां लिंगानि इति नाम ॥
उपक्रमो नाम सदेव पूर्वं मिदं जगत् नामरूपरहितं सत् सत्तामात्रतया स्थितमिति
प्रतिपादनमुपक्रमः ॥ उपसंहारो नाम इदं प्रतीयमानं सर्वं जगदपि तादृशासत्ताया

॥११३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वरूपं तत्त्वमसि त्वं तदेवासीति प्रतिपादनमुपसंहारः॥ इदं द्वयमपि अद्वितीयात्मस्वरूपप्र एवं
तिपादनात् द्वयं मिलित्वा एकं लिंगं॥ अभ्यासो नाम ब्रह्म त्वं ब्रह्मासीति नववारोपदेशेन च
तेन प्रति स्वरूपोपपादनात् अद्वितीयात्मबोधनात् अभ्यासो द्वितीयं लिंगं॥ अपूर्वत्वं नाम
प्रत्यक्षानुमानशब्दार्थापत्त्यनुपलब्धि असंभव इति वाक्यं काष्ठासु प्रमाणेषु उपनिषत्प्र
माणेनैव आत्मलक्षणात याज्ञातव्यः॥ इतर प्रमाणैर्न ज्ञायते॥ तदेवापूर्वत्वं इदमपूर्वत्वं अ
द्वितीयात्म निःसिध्यतीति तृतीयं लिंगं॥ फलं नाम अद्वितीयात्मज्ञानिनः प्रारब्धं याव
त्पर्यंतं न नश्यति तावत्पर्यंतं देहेंद्रियादिप्रपंचस्य मिथ्याभूतत्वेनानुप्रतीतिरपि तादृशप्रार
ब्धस्य निःशेषनाशो यदा भवति तदा जगत् सर्वात्मना अप्रतीतिरेव अद्वितीयात्मस्वरूप
त्वेन स्थितिः यथा भवति तथा प्रतिपादनं फलं चतुर्थं लिंगं॥ अर्थवादो नाम यस्य वस्तुन
श्रवणेनाश्रुतं वस्तु श्रुतं भवति यद्वस्तु मननेन मतं सत् अमतं भवति यद्वस्तु ज्ञानेन ज्ञातं सद्वस्तु अ
न ज्ञातं भवति सोऽर्थवादः॥ एतस्यार्थवादस्य स्वार्थतात्पर्यं नास्ति॥ अतः अद्वितीयात्म
स्वरूपेण तात्पर्यमिति एतस्यार्थवाद इति नाम इदं पंचमं लिंगं॥ उपपत्तिर्नाम यथा
मृदात्मकाशात् उत्पन्नाः घटशरावादयः मृद्व्यतिरिक्ता न भवंति॥ यथा वा सुवर्णा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
श्रीनृसिंह
मननेग्रंथ
॥११२॥

डसत्वाः कटककमौकुण्डलादयः सुवर्णव्यतिरेकेण न संति॥ यथा वा अयसः सकाशादुत्पन्नाः ख लोह
ड्गादयः कारणाऽयसोऽवेन प्रतीयमाना अपि अयोव्यतिरेकेण न संति॥ उच्चारणमात्रेणावि
नाऽयसः पृथक् नास्तीति॥ युक्तेरुपपत्तिप्रसिद्धं प्रतीयमानं जगदपि प्रत्यगात्मस्वरूपं ब्र
ह्मविकारत्वात्॥ ब्रह्मवृत्ताद्दृशाच्छ्रुत्या युक्त्या जगतः प्रत्यगात्मव्यतिरेकेणाभिन्नत्वं प्रति
पाद्य प्रत्यगात्मनः अद्वितीयत्वं सूचितं॥ अतः षष्ठं इदं॥ एवं षड्विधलिंगैः श्रुतिनां तात्पर्य
पदार्थः निश्चिनोतीति तस्य श्रवणमात्रादेव अद्वितीयज्ञानं प्राप्नोति स देहो नास्तीति सिद्धं॥५॥
अथ चतुर्विंशतितत्त्वानि निरूपयामः॥ ज्ञानेंद्रियाणि पंच॥ कर्मेंद्रियाणि पंच॥ प्राणादयः
पंच॥ शब्दादयः पंच॥ मन आदि चतुष्टयं॥ एतानि चतुर्विंशतितत्त्वानि एतेषां विलक्षणोऽहं
असंगोऽहं साक्ष्यहं इति यो जानाति स एव मुक्त इति वेदांतसिद्धांतः॥ षड्विंशतितत्त्वानि निरूप
यामः॥ तत्रोक्तान्येव चतुर्विंशतितत्त्वानि पंचीकृतपंचमहाभूतान्यपि॥ शरीरत्रयमपि अ
४नि वस्थात्रयमपि॥ अज्ञानमपि॥ एतानि षड्विंशतितत्त्वानि यो विचार्य तद्विलक्षणोऽहं असंगोऽहं
साक्ष्यहं इति यो जानाति स एव मुक्त इति वेदांतसिद्धांतः॥६॥ ७॥ ७॥ अथ षण्णवतितत्त्वानि
निरूपयामः॥ उक्तान्येव षड्विंशतितत्त्वानि॥ षड्भावविकारा अपि॥ षडूर्मयोऽपि॥ षट्कोशा
अपि॥ अरिषड्वर्गा अपि॥ अंगत्रयमपि॥ गुणत्रयमपि॥ कर्मत्रयमपि॥ वचनादानगम

॥११२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीर्त्तननामप्रीसास्त्रौंदर्यवर्णनं गुह्यभाषणं नामप्रीसा एकांतेभाषणं संकल्पो नामप्रीसामेतनेन

नविसर्गोनं प्राअपि॥ संकल्पाध्यवसायाभिमानाध्यारणान्यपि॥ मैथ्यादिचतुष्टयमपिस्त्रियु
ताकोदिचतुर्दशा अपि॥ गुरुअधिष्ठानदेवता अपि॥ एतानिषण्णवतीतत्त्वानि॥ एतादृलक्षणो
हं अहंसंगोहंसाक्ष्यहमितियोजानातिसएवमुक्तइतिवेदांतसिद्धांतः॥ छ॥ छ॥ छ॥ अथब्रह्म
चर्यनिरूपयामः॥ दर्शनस्पर्शनकेलिकीर्त्तनंगुह्यभाषणं॥ संकल्पोध्यवसायश्चक्रियानि
र्वृत्तिरेव च॥ १॥ एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः॥ विपरीतंब्रह्मचर्यमनुष्ठेयंमुमुक्षुभिः॥ २
अत्रसर्वरागादिपूर्वकत्वमेव विशेषेणास्त्येव्यं॥ अजिह्वःषंढकःपंगुरंधोबधिरएव च॥ मुग्ध
श्चमुच्यतेभिक्षुःषड्भिरेतैर्नसंशयः॥ १॥ अजिह्वोनाममृष्टमिदंप्रियमप्रियमितिविकल्परहितो
मानादिरहितःसन्यथाप्राप्तंभक्षयतिसअजिह्वः॥ षंढोनामसद्योजातांस्त्रीं षोडशवा
र्षिकीमपितथाशतवार्षिकीं वृद्धामपियुवतीं दृष्ट्वा यःसमचित्तःसन्निर्विकारःतिष्ठतिसः
षंढकः॥ पंगुर्नामभिक्षार्थं ग्रामप्रवेशार्थं पुरीषोत्सर्जनार्थंबाह्यदेशगमनंकृत्वापि
ग्रामांतरगमनेष्वाचेत्योजनमात्रमेवगंतव्यं अधिकंनगंतव्यमेवंयःतिष्ठतिसःपंगुः
अंधोनामस्थितस्याटनस्यापिसंचरश्चक्षुःप्रियःसन्यासीचतुःपुरुषपरिमितभूमिसागेनततो
धिकभूमिदर्शनंकरोतिसोऽन्धः॥ बधिरोनामसहितवचःअहितवचश्चश्रोत्रयोर्म्यंक्वापि
पिहिताहितगूढनंमक्तायःतिष्ठतिसःबधिरः॥ मुग्धोनामसमस्तविषयसन्निधावपि

२न १ अष्टविधमैथुनाभावरूपंब्रह्मचर्यंमुमुक्षुणा॥ अभ्यसितव्यं॥ इदं ब्रह्मचर्यं
यस्यास्तितस्य ज्ञानेभावितुमर्हतिइतिशास्त्रसिद्धांतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रियपटुत्वेपि तद्विषयानुभवेसमर्थोपि निद्रितइवयःतिष्ठतिसमुग्धः॥एतादृशान् गुण
वान् श्रवणद्वाराज्ञानसंपाद्यमुक्तो भवतीतिशास्त्रसिद्धांतः॥ ७॥ ७॥ ७॥ शुद्धमीश्वरचैतन्यं
जीवचैतन्यमेव च॥प्रमाता च प्रमाणं च प्रमेयं च फलं तथा॥१॥इतिसप्तविधं प्रोक्तं भिद्यते
व्यवहारतः॥मायोपाधिविनिर्मुक्तं शुद्धमित्यभिधीयते॥२॥मायासंबंधतश्चेशो जीवोविद्ययाव
शस्तथा॥अंतःकरणसंबंधात्प्रमातेत्यभिधीयते॥३॥तथा तद्वृत्तिसंबंधात्प्रमाणमिति क श्लो०४
थ्यते॥अज्ञानमपि चैतन्यं प्रमेयमिति कथ्यते॥४॥तथा ज्ञानं च चैतन्यं फलमित्यभिधीयते॥५॥
अस्यार्थः॥शुद्धचैतन्यमित्यपि जीवचैतन्यमित्यपि प्रमातृचैतन्यमित्यपि प्रमाण
चैतन्यमित्यपि प्रमेयचैतन्यमित्यपि फलचैतन्यमित्यपि व्यवहारे एकचैतन्यमपि एवं सप्त
विधोच्यते॥सप्तविधानां भेदोच्यते॥मायारहितचैतन्यं शुद्धमित्युच्यते॥मायोपहित
चैतन्यं ईश्वर इत्युच्यते॥अविद्योपहितचैतन्यं जीवचैतन्यमित्युच्यते॥अंतःकरणोपहित
चैतन्यं प्रमातृचैतन्यमित्युच्यते॥अंतःकरणवृत्त्युपहितचैतन्यं प्रमाणचैतन्यमित्युच्यते॥
अज्ञायमानचैतन्यं प्रमेयचैतन्यमित्युच्यते॥ज्ञायमानचैतन्यं फलचैतन्यमित्युच्यते॥
अनेनप्रकारेण एकएव परिपूर्ण आत्मा उपाधिभेदेन अनेकविध इत्युच्यते॥तान्युपा

ईश्वरचैतन्यमित्यपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धीनृ निरस्त अद्वितीयपरिपूर्ण आत्मा अहमिति यो जानाति स मुक्त इति शास्त्रसिद्धांतः॥५॥५॥
भ्रमपंचभ्रमा निरूपयामः॥ जीवात्मा परमेश्वरात् भिन्न इति भ्रमः॥ आत्मनि प्रतीयमानं कर्तृत्वादिकं
वास्तवम् इति भ्रमः॥२॥ शरीरत्रयावच्छिन्नात्मा संगीति भ्रमः॥३॥ जगत्कारणस्य ब्रह्मणो विकारित्वं भ्रमः॥४॥
कारणात् भिन्नप्रपंचस्य सत्यत्वभ्रमः॥५॥ एतेषां भ्रमाणां निवृत्त्युपायमुच्यते॥ बिंबप्रतिबिंबदृष्टांते
न भेदभ्रमो निवर्तनीयः॥ स्फटिकलोहितदृष्टांतेन पारमार्थिककर्तृत्वभ्रमो निवर्तनीयः॥ घटका
शमठाकाशदृष्टांतेन संगित्वभ्रमो निवर्तनीयः॥ रज्जुसर्पदृष्टांतेन जगत्कारणस्य ब्रह्मणो वि
कारित्वभ्रमो निवर्तनीयः॥ स्वर्णलोहदृष्टांतेन कारणात् भिन्नप्रपंचस्य सत्यत्वभ्रमो निवर्तनीयः॥
अनेन प्रकारेण पंच भ्रमाः अविद्यायाः प्राप्ता इति विचार्यः॥ एतं [illegible]भ्रमनिवर्तनोपायमिति तज्ज्ञानं
संपादयति॥ स एव मुक्त इति वेदांतसिद्धांतः॥५॥५॥५॥ अथ प्रारब्धत्रयं निरूपयामः॥ कथमि
त्युक्ते॥ इच्छाप्रारब्धमिति॥ अनिच्छाप्रारब्धमिति॥ परेच्छाप्रारब्धमिति॥ एवं त्रिविधं वर्तते॥
त्रिविधमपि प्रारब्धं अविवेकिनां विवेकिनां च समानमेव तिष्ठति॥ तथापि विवेकीप्रारब्धस्य॥ अवि
वेकिप्रारब्धस्य च भेदो[illegible]स्ति॥ तत्कथमित्युक्ते दृष्टांतपूर्वकं निरूपयामः॥ अविवेकिनः इच्छा॥
आश्विनमासे मेघवत्॥ कथं आश्विनमासे मेघः स्वल्पतया दृश्यते॥ स एव मेघः सर्वत्र व्या
प्यकुंभद्रोणवत्॥ दृष्टौ औषधिः सर्वाः प्रपूर्णस्य गृहभीत्यादीनपि नाशयति॥ सर्वेषां प्राणिना

१ नाथयि वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनंदलह
मननग्रंथ
॥११६॥

५ मनर्थमेव सैव समेषां पुरुषकं भवत्यानर्थयति तद्धेव विवे किनः

सर्वानर्थमूलं भाति॥ तदुक्तं अज्ञस्यापि इच्छा स्वल्पा विषयाप्राप्ति जाता सती मेघवत् सर्वत्र
व्याप्य परेषां मनेकदुःखकृत्या तस्यापि इहलोके दुःखकरी सुखाभावकरी च परलो
केपि नरकसंपादनकरी॥ विवेकिनः इच्छा तु मकरमासे मेघवत् तद्यथा मकर
मासे मेघः सर्वत्र व्याप्य उदेति॥ चेदपि स्वल्पमेव वर्षति सस्यादीनामपि मेघस्म
कात्रूपस्यानुपद्रव ये नैव स्वस्यापि परलोकसंपादनकारादेहधारणमात्रेण यत्न
रोति॥ अनेन प्रकारेण विवेकिनः प्रारब्धस्यापि अविवेकिनः प्रारब्धस्यापि भेदो
१अ इदानीं प्रारब्धं सामान्येन निरूपितं॥ अतः परं विशेषतो निरूपयामः॥ कथमिति चेत्
विवेकिनः लोके पथ्यानि स्वामित्ववत्स्व चौरयीत्याशिरच्छेदभावबलाः स्वर्यो अपि शिरछेद
शं स्वगत्वा राजाभिछेदितस्य च घट्टा वयमपि एतादृशा कार्याद्विपुरु एता स्वयत्त एवं दितस्व
नि कार्याणि भविष्यंति अतः एतानि कार्याणि वयमपि कर्मस्येतु॥ अस्माकमपि
एते अनर्थाः संभाव्य युरिति स्वानर्थं आयाएव तावकि यन्मान्ते ते असमर्था भे
तादृशा अनर्था न संप्राप्नुवंतः वयं तु समर्थाः तादृशा अनर्थं निबर्हणाय इति स्वय
मेव अधिकाभूत्वा तादृशा व्यापारेषु प्रवर्त्य शिरस्छेदादिकार्यं प्राप्नुवंति अनेन प्र

॥११६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारेण अविवेकिनः इच्छाप्रारब्धं विवेकिनस्तु प्रारब्धं तथा न भवति किंतर्हि विवेकिनः मन्यंते प
कृतिमात्रं सर्वं अनर्थमिति विचार्य लोके अर्थासक्ताः संसारिणः अर्थसंपादने तद्रक्षणे च एत
दर्थस्य नाशे च संजायमानं दुःखं दृष्ट्वा वयमपि एतस्मिन्नर्थे आसक्तिं न करिष्यामः ॥ कर्मश्चेत्
तेषां दुःखं यथाप्रासं तद्दृष्ट्वा अस्माकमपि दुःखं स्यात् समस्तविषयेष्वपि असक्तिं परित्यज्य यथा
लाभसंतुष्टाः असाम ॥ तेषां शरीरधारणमात्रं क्रियासु स्नानाचादिक्रियासु प्रवृत्तिः अन्यत्र इच्छा
नोदेति अनेन प्रकारेण अविवेकिनां मिथ्याप्रारब्धं जानिच्छाप्रारब्धं तु अविवेकिनां विवेकिनां
च समानमेव तत्कथमित्युक्ते शिरस्फोटयति ॥ किंचित्पादे स्फुटति ॥ किंचिदुदके स्फुटति ॥
किंचित् अग्निः स्फुटति ॥ किंचिद्वर्षेण आर्द्रभवनादिकं किंचित् आतपशुष्कभवनादिकं
किंचित् ताड्यमानं क्षयरोगप्रभृतिभाध्यश्च अशनिपातश्च गोपुराट्टालादिपतनं च ए
तत्प्रभृतिवशात् जायमानदुःखान्यपि अनेकवर्षप्राप्तसुखमपि एतत्प्रभृतिसुखानि वि
वेकिनामपि अविवेकिनामपि समानान्येव एतेषां अनुभवस्य अनिच्छाप्रारब्धमिति ना
म ॥ ६४ ॥ ६५ ॥ ६६ ॥ अथ परेच्छाप्रारब्धं निरूपयामः ॥ परेच्छाप्रारब्धं विवेकिनां अविवेकिनां
च समानमेव कथ्य ॥ तत्कथमित्युक्ते ॥ एकः पुरुषः स्थित्वा मौनी सन् तिष्ठति ॥ अन्यः कश्चि
त् आगत्य तं नमस्कृत्य त्वमेव मम कार्यं कुर्विति ॥ बहुशः संप्रार्थ्य तिष्ठति ॥ दाक्षिण्ये स्यप्

प भातपप्रासमसुखमपिवायुवनाप्रापसुखमपिअग्निनप्राप्तसुखमप ६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतत्कार्यं विस्यात दशाप्रासस्तु स्वदुःखा दीननुभवति॥ एतदनुभवविचारस्तु विवेकि विवेकि
नोः समानः॥ इदं परेप्यप्रारब्धं अनेन प्रकारेण प्रारब्धत्रयं विचार्य एतत्प्रारब्धत्रयानु
भवः अहंकारस्यैव साक्षिणो मम नास्तीति यो वेद स एव मुक्तः इति वेदांतसिद्धांतः॥ प्रारब्ध॥
अतः परं संचितप्रारब्धागामिकर्मणां पितनाशं च सदृष्टांतं निरूपयामः॥ दृष्टांतस्तावत्
एकस्य ब्राह्मणस्य दश क्षेत्राणि संति तत्र च दशसु क्षेत्रेषु स्वयमेव बीजावापं करोति एकै
कस्य क्षेत्रस्य सहस्रभार संख्यायां प्रतिवर्षं दशसहस्रभारसंमिताः व्रीहयः प्राप्नुवंति
त सहस्रभारमिताः व्रीहयः ग्रहस्थ्याससंनिर्वाहाय पंचशतभारपरिमिताः व्रीहयः बीजार्थं स्था
पिताः॥ अन्ये च पंचशतभारपरिमिताः धर्मार्थं स्थापिताः॥ अन्ये च सहस्रभारपरिमिताः
व्यवहारार्थं स्थापिताः॥ अन्ये च सहस्रभारपरिमिताः राज्ञः शुल्कदानार्थं अनेन प्रकारेण व्य
यसंपत्तौ प्रतिवर्षं षट्सहस्रभारपरिमिताः व्रीहयः उर्वरिताः तेउर्वरिताः व्रीहयः संरक्षि
ताः अनेन प्रकारेण प्रतिवर्षं षट्सहस्रभारपरित व्रीहिषु उर्वरितेषु सत्सु संरक्षितेषु च
महर्घसमये विक्रेतुं मिच्छायां एतद्धान्यस्य संचितमिति नाम गृहस्थाश्रमार्थं॥ यत्प्रा
रब्धमिति नाम बीजार्थं यत्स्थापितं तस्यागामीति नाम॥ एवं स्थितेषु एकस्मिन्न स
मये कलहप्राप्तः तस्मिन्नपरराष्ट्रस्थिताः संचितधान्यादिकं संगृह्य गताः आगामी॥

२

॥१॥ म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ

बीजारोपेण प्राप्यमाणसस्यपरिपाकव्रीह्यः तस्करैः नीताः विद्यमानं धान्यादिकं तृणादिकं च
अश्वानां पृष्ठे नाचलवित्रेण स्थितास्य सर्वत्र तृणानि फाल्य इत्तं तत्तोयञ्जमानः बंधुशः विचार
संत्रस्तः गृहे विद्यमानपूर्णानं भूमिमध्ये निक्षिप्य संरक्ष्य तच्छुजानः सन्तिष्ठति ॥ ततो बं
धुजनाः यासार्थी किं करोषीति पृच्छति ततो वदति संचितं बंधुशः स्थितं तत्सर्वं परस्परं स्थि
ताः गृहीत्वागताः इतः परं संपद्यमानं धान्यादिकं सस्यादिकं च चोरैः नीतं तस्य मूलशः
स्थित्वा जश्वादिभ्यो दत्तं गृहे विद्यमानं किंचिद्भूमौ निक्षिप्य संरक्षितं ॥ तद्वत् भुंजानः स
न् तिष्ठामीति बंधुजनेभ्यो निवेदयति ॥ एवं चास्मात् प्रतिबंधेन किं संचितमित्युक्ते संचिता
गामिनोः नाशस्तु संचितमिति संचितं प्रारब्धस्य तु अनुभवेनैव निवृत्तिरित्यपि संचितं ॥
तथैव दृष्टांते संचितप्रारब्धागामीनि यथा तथैव दार्ष्टांतिकेपि समस्तप्राणिनामपि सं
चितप्रारब्धागामीनीति स्पष्टं निरूपयामः ॥ कथमित्युक्ते लोके अनादिजीवः पुण्यपापक
र्मापि कुर्वन्नेव तिष्ठति एवं बहुकाले कुर्वति सति एकस्मिन्दिवसे कृतपुण्यपापकर्मैव ब
हुजन्मनां कारणत्वेन स्थितं एवं जन्मावधौ क्रियमाणं चेत् तत्पुण्यपापकर्माणि सुबी
जरूपिराशित्वेन संभूय तिष्ठति तस्य संचितमिति नाम ततः मरणं प्राप्य ततः जन्म प्राप्य
पूर्वसंचितं किंचित् संगृह्णाति तत् संचितं भावीशरीरस्य कारणीभूतं पंचीकृतपंचम
हाभूतानि शरीराकारत्वेन परिणामत्वेन शरीरेण कानिचित्कर्माणि कारयितात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीन्सिंह
मननग्रंथ
॥११६॥

तत्कर्मद्वाराकानिचित्सुखदुःखानिकर्मविनाशक्लैवकानिचित्सुखदुःखानिअनुभ
वतितस्यप्रारब्धमितिनाम॥ एतत्प्रारब्धफलमनुभुंजानः मरणपर्यंतंक्रियमाण
पुण्यपापानांआगामीतिनाम॥ इदंसर्वंसंचितमध्येअंतर्भवति॥ अनेनप्रकारेणजीवः
कर्माणिअनादितयाकुर्वन्नेवतिष्ठति॥ एतत्संचितमपिप्रवृद्धमेवतिष्ठति॥ तस्मादेव॥
तस्यजन्मनामवर्धिनीस्ति॥ तर्हिजन्मनामवर्धिः केनप्राप्यते इति चेत् निरूपयामः॥
अनेनप्रकारेणकर्माणिकुर्वतिसतिएकस्मिन्जन्मनिएकस्यपुण्यकर्मणः परिपाक
वशात्एतस्यसंसारापथ्योनाशितिता[illegible]कर्तव्यइतिविवेकःसमुत्पन्नैतिकथमित्युक्ते
अहंएतावत्कालंकाम्यकर्माण्येवाकरवं॥ ततः तन्निमित्तांचित्तशुद्धिरपिममनासीत्
स्वस्यसंसारोपिननिवृत्तइतिविचार्यकाम्यकर्माणिपरित्यज्यविहितनित्यनैमित्ति
कान्येवईश्वरार्पणत्वेनकरोमीतितत्कर्मणाभक्तिःतद्वाराचित्तशुद्धिःप्राप्नोति॥ चित्तशु
द्धिद्वारासद्गुरुलाभःप्राप्नोति॥ ताद्दशसद्गुरुसन्निधौस्थित्वातच्छुश्रूषापूर्वकंश्रवणम
ननिदिध्यासनादिकंविधेततःज्ञानंसंप्राप्य[?]ज्ञानंयदाप्राप्नोतितेनज्ञानेनअग्नि
नाअज्ञानंनिर्दहेत्। अज्ञानंयदादग्धंभवतिज्ञानप्राप्त्यनंतरंक्रियमाणपुण्यपाप
दिअकर्तृत्वस्वरूपंएनंज्ञानिनंनस्पृशंत्येव॥ तर्हितेषांपुण्यपापकर्मणांगतिःक

क

व[?]

न ५

॥११६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेत्युक्ते एतस्याज्ञानिमोयः स्तुतिं करोति स पुण्यं ग्हीत्वा गच्छति यो दूषणं करोति स पापकर्म
ग्हीत्वा गच्छति ॥ प्रारब्धं तु भोगादेव नश्यतीति ॥ तस्य एष युगेव नाशो न कर्तव्यः ॥ वक्तव्यश्चेत्
क्तदोषाः प्राप्नुवंति अस्मिन्नर्थे संमतिवचनं च ॥ ५४ ॥ प्रारब्धं भोगतो नश्येत् तत्वज्ञानेन संचितं ॥
आगामि द्वितीयं कर्मैतत् द्वेषि प्रियवादिनोः ॥ १ ॥ अनेन प्रकारेण संचित प्रारब्ध्यागामि कर्माणि कल्प
कस्य तो विचार्य एतत्संचित प्रारब्ध्यागामी कर्माणि अहंकारस्यैव न त्वहंकारसाक्षिणो ममेति यो वि
जानाति स एव मुक्तः इति वेदांतसिद्धांतः ॥ ५५ ॥ अतः परं प्रलयस्वरूपं निरूपयामः ॥ नित्यप्रलयः ॥ १
अवांतरप्रलयः २ दैनंदिनप्रलयः ३ ब्रह्मप्रलयः ४ असंतिकप्रलयः ५ ॥ इति पंचविधाः प्रलयाः ॥
तत्र नित्यप्रलयो नाम समस्तप्राणिनां सुषुप्तिः ॥ अवांतरप्रलयो नाम ॥ कृतत्रेतद्वाप
रकलियुगाः सहस्रगताश्चेत् ब्रह्मणो अहः तस्मिन्नह्नि चतुर्दशानां मनूनां चतुर्दश
प्राणां आधिपत्यं नश्यति तस्मिन्नाधिपत्ये नश्यति सति लोकाः ॥ सर्वे निस्तेजस्काः
जायंते पुनराधिपत्यांतपर्यंतं तस्य नाम अवांतरप्रलय इति तस्मात् ब्रह्मणः एक
स्मिन्नहनि चतुर्दश अवांतरप्रलयाः एतेषां नैमित्तिकप्रलय इत्यपि नाम ॥ युग
प्रलयोपि एतेष्वेवांतर्भवति ॥ दैनंदिनप्रलयो नाम ब्रह्मणः सुषुप्तिः ब्रह्मप्रल
यो नाम ब्रह्मणः नाशावस्था तस्यां नाशावस्थायां आकाशादिप्रपंचः सर्वो

ब्रल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मसिद्ध
मननग्रंथ
॥११७॥

नो

॥७उपदामया याचयंतितच्च अयं पशु राजकीयानिमित्तं मयानीयते रस्यु क्ते ते शुल्ककाराः

मनानास्त्येव अज्ञानमात्रमेवमहाप्रलयीभूय प्रतिष्ठति ॥ तस्य प्राकृतप्रलयः इत्यपि महासुषुप्ति
रित्यपि नामत्रयं ॥ आत्यंतिकप्रलयो नाम मुक्तिः ॥ तस्यामवस्थायां अज्ञानेन सर्वात्मना नाशमेव
त्ते पंचप्रलयाः अन्योन्यव्यावृत्ताः एवं तिष्ठंतीति कृत्वा अनात्मस्वरूप एव एतेषां प्रलयानां स्व
यमाधारः सन् एतेषु प्रलयेषु अनुस्यूतः सन् असंगः सन् स्थितः ॥ आत्माहमिति यो जानाति ॥
स एव मुक्तः इति वेदांतसिद्धांतः ॥ ७ ॥ ५ ॥ ५ ॥ लोके वेदांतशास्त्रव्यतिरिक्तकाव्यनाटकशब्दतर्का
दीन् पठंतश्च केवलकर्मठाश्च मुमुक्षु [illegible] नानापुण्यैर्भेदं संपाद्य नाशयिष्यंतीत्यर्थे दृष्टांतपूर्वकं
निरूपयामः ॥ कथमित्युक्ते लोके मंडलेश्वरः स पुरोहितमाहूय यज्ञकर्म कुर्वेइत्याज्ञाप्य सर्वान्
पदार्थान् अददात् ततः पशुरेकोनलब्धः तत्र पशुं परिदृश्यके ब्राह्मणमाहूय किंचित् द्रव्यं दत्त्वा
पशुरानेय इति प्रेषितवान् ततः सोपि ब्राह्मणः ग्रामांतरं गत्वा यत्र पशवः तत्र विचार्य तत्र यात्
व्यं दत्वा लक्षणयुक्तपशुं विक्रीय ॥ आगतमध्यान्हकाले शुल्कपथे शुल्ककाराः भूयाविष्टाः
उपदामयाचयित्वैव एनं प्रेषितवंतः ततः कश्चिदन्यः आगत्य तं शुल्कयाचकं बोधयित्वा
वयमुपायेन तं पशुं ग्रहीष्यामहे इति परस्परं तदुपायस्वरूपनिरोपणद्वारा संबोध्य स्थि
ताः ॥ तदुपायकः इत्युक्ते शृणु एवं वयं चत्वारः तिष्ठामः सत्तु पांथ एव घटिकामार्गस्य एक
शुल्ककारः एवं घटिकाचतुष्टयमार्गस्य चत्वारः शुल्ककाराः स्थापितव्याः तत्र प्रथमो
दृष्टपोत ॥ अहो ब्राह्मण अयं पशुः न भवति किंतु उन्मत्तश्वान इति सर्वे वयं वदामः ॥

क॰ ९३

॥११७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ग तत्र चतुर्णामुत्तमं नरं सम्भ्रमाविष्टः सन् तं पशुं विहाय गमिष्यतीति योजयित्वा परस्मिन् दि
वसे तस्मिन् मार्गे सति चत्वारः चतुरः पशु चतुर्दिक्षु स्थित्वा एनं ब्राह्मणं छागपशुं रज्वाबद्ध्वा ग्री
हस्तेन गृहीत्वा गमनसमये प्रथमः स्थितो ब्राह्मणमाहूय अवदत् ॥ हे ब्राह्मण तव शुनकः सर
क्षणं उचितं न भवति ॥ तथापि सर्वेषां मारकः उन्मत्तो श्वान ॥ तस्य संरक्षणे च सर्वेषां मरण
मेव अन्यशुनको न लभ्यो वा संरक्षणे इत्युक्त्वा इत्थं सर्वान् मारयिष्यति ॥ अस्मिन् निकटे म
नेयमित्युक्त्वा स्वयं पलायितः सोपि ब्राह्मणः एतस्य वार्तां श्रुत्वा एतत् कि पैस भ्रमलग्नो वा
नो चेत् ॥ एतं पशुं दृष्ट्वा कथमवोचत् ॥ इत्यालोच्य तदा तीयां स्फाहे लेव आगच्छत् ततो
द्वितीयशुल्ककारः ब्राह्मणमाहूय पूर्वोक्तप्रकारेणैव उक्तवान् ततो ब्राह्मणस्य मनसि वि
लक्षणा बुद्धिर्जाता किमयं पूर्वशुल्ककारवदेवोक्तवान् उन्मत्तश्चेति नो चेत् वयमेव भ्रश्य
मानाः इति ब्राह्मणस्य संशयः समजनि ॥ ततः पर्यालोचयन् अयं उन्मत्तश्चेत् ममापि दंशिष्य
तीति चकितः चकितं दृष्ट्वागतः ततः तृतीयशुल्ककारः एनं ब्राह्मणं दृष्ट्वा दूरादागमनसमय
तो एव उच्चैः शापपूर्वकं आहूय अत्राय मुन्मत्तश्वानः अस्मान् मारयिष्यति अस्मिन् निकटे अयं
नानेयः त्वयाप्यस्मिन् निकटे नागंतव्यमित्युक्त्वा स्व निकटस्थान् आदाय पलायितः ततोऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं ब्राह्मणः सर्वात्मना चकितो भूत्वा उन्मत्तश्वानमेवं द्रष्टव्यं यो रूसगृह्णीतवान् अत्र संदेहलेशो ना
स्तीति विचाराविष्टः सन् एनं विहाय मया गतं चेत् अयं मां विहाय गच्छति इति ज्ञात्वा मामपि पृ
ष्ठभागे लग्नः सन् मारयिष्यतीति संदेहो नास्तीति निश्चित्य एतस्य विमोचनोपायं चिंतयन् जगाम
ततः चतुर्थः शुल्ककारः एनं दृष्ट्वा पूर्वोक्तप्रकारेण वादोऽभवत् ॥ तस्यापि वाक्यं श्रुत्वा ब्राह्मणः त
माहूय अयमुन्मत्तश्वानः तस्य विमोचनोपायं मम आचक्ष्व तव बहु सुकृतं भविष्यति एतत्
ब्राह्मणवचनानि श्रुत्वा अहमेनं निकटे आगंतुं बिभेमि तद्विहाय गमनमार्गं वदामीत्युक्ते ब्रा
ह्मणः उपायः कथमिति पृष्टवान् ततः शुल्ककारोपि ब्राह्मणमाहूय एवं पारज्वा(?) इमं मत्तश्वा
नं वृक्षे बध्वा प्रदक्षिणत्रयं कृत्वा गमनार्थं कृत्वा दूरासन्नो भूत्वा गच्छ इत्युपायमुक्तवान् ॥ ततो ब्राह्मणः
तथैव बध्वा तव धर्मेणाहं जीवितः मां संरक्षितवानसि ॥ नो चेन्मम दुर्मरणप्राप्तिः अतः पशुक्रयणा
र्थं मां गंतुमुचितं न भवतीति निश्चित्य स्वयं स्वगृहं ययौ अनेन प्रकारेण तादृशा वंचकाः शुल्कका
राः प्रसह्यमेव पशुं जगृहुः ॥ स्वयं गृहाणार्थं पशुमुन्मत्तश्वेति निर्दिश्य ब्राह्मणस्य बुद्धिमपि
मुग्धां नाशितवंतः ॥ तद्वदेव तार्किकाः शाब्दिकाः पौराणिकाश्च कर्मठाश्च मुमुक्षुपुरुषमाहूय तत्त्व
गीता किमर्थं पठ्यते संन्यासिना संविधातव्यं किं कार्यमस्ति उपनिषदः किमर्थं पठ्यते ॥ त
व किं चिंतापसमुत्थिता वा नारदादेः शौनकनास्तीति पिङ्गलादीनामपि नास्त्येवेति ॥ पुराणेषु च

ति

॥११८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति॥ एके जीवपक्षवादिनः सर्वात्मना ज्ञानं नोचितं इत्येवं दूषयां चक्रुः॥ सन्न्यासं गृहीतवान्॥ स
वात्मना नश्यतीति दूषितवंतः कलियुगे सन्न्यास एव नास्तीति शास्त्रप्रसिद्धिः॥ तर्हेति किमर्थं स
न्यासं गृहीतवतः इत्यके उदरपोषणार्थमेव तत्वज्ञानं किं नाम सर्वं वयं सकलशास्त्राणि अधी
तवंतः॥ तादृशानामप्यस्माकं ज्ञानं नोचितमिति विचार्य कर्माण्येव कुर्मः॥ तत्वमुक्तिरपेक्षिता
चेत् तर्कपठनो चेत् शब्दशास्त्रपठनो चेत् काव्यनाटकादि पठन सर्वात्मना गीतादुपनिषद
भ्यसनं तु योग्याः॥ ये तत्वज्ञानबोधनार्थं संप्रवृत्ताः तानवं चकार इव जानीहि॥ तेषां ज्ञान

मप्प

मस्ति चेत् खलु तत्वज्ञानोपदेशः कर्तव्यः॥ तेषां पुनः प्रथमतः अमानित्वादि साधनान्येव न सं
ति क्षणमात्रमपि आतपं सोढुं न शक्नुवंति॥ स्वयमेव ज्ञानिन इति नाम धारकाः॥ तेषां
ज्ञानी लक्षणानि स्थितप्रज्ञत्वादि लक्षणानि एकैकमपि नास्ति केपि तामससादृश्यः तेष्वधिक

७० श्लो

तया दृश्यते॥ एकस्य लोकस्य अर्थः पृष्टश्चेत प्रतिवक्तुं नार्हति एते वंचकाः अनेकपुरुषा
गतस्यापि नाशं प्रासाः त्वमपि कुत्रापि नाशं प्राप्स्यसि॥ इति त्वदुपरि दयया वयं तदुपायमेव
चामः त्वमपि सम्यग्विचार्य॥ वर्तंति नो यत्र तिष्ठति तत्संगतिः सर्वात्मना त्याज्या संदेहो ना
स्ति॥ तत्वमुक्तिरपेक्षिता चेत्॥ सुलभो मार्गो मया उपदिश्यते पतकथामितःके वयं दृढस्मर
जानं जानीमः तत्र किंचिन्मंत्रमुपदेक्ष्यामहे॥ तं मंत्रं जपस्व॥ स मंत्र अस्मिन् लोके तत्व
ज्ञानं भिक्षान्नं दास्यतीति इति संदेहो नास्ति॥ तत्वशातथा ब्रवीमि॥ मम वाक्यं शृणोषि चेत्

८ क्षणमात्रमपि शीतं सोढुं न शक्नोति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मननग्रंथ
॥११०॥

प्रकरण १८

जीवन्मुक्तो न्येतन क्ष्यति ॥ संदेहो नास्ति ॥ अनेन प्रकारेण पूर्वोक्तसुल्कका रवत् वंचकाभूत्वा
तार्किकाद्यः मुमुक्षोः बुद्धिं नाशयंति ॥ संदेहो नास्ति ॥ तस्मान्मुमुक्षुः गुरुपः सम्यग्विचार्य
वेदांतशास्त्रमेव अस्माकं सारं केनेतराणि ॥ आत्मस्वरूपोपदेष्टारं सद्गुरुं ज्ञात्वा तद्व
चनाः गुरुर्वा न भवंतीति विचार्य वेदांतशास्त्रमेव आत्मस्वरूपोपदेष्टारं गुरोर्विश्वासंप्र
तास्य शुश्रूषापूर्वकं श्रवणमननादि कृत्वा ज्ञानं संपादयन् कृतार्थो भवेत् संदेहो नास्तीति सिद्धं ॥ ४ ॥
पंचविधमुक्तयो निरूप्यंते ॥ कथं ॥ सालोक्यमुक्तिः ॥ सामीप्यमुक्तिः ॥ सारूप्यमुक्तिः ॥ सार्ष्टिमु
क्तिः ॥ कैवल्यमुक्तिः ॥ ५ ॥ तत्र सालोक्यं नाम उपासनामहिमावशात् ब्रह्मलोकं गत्वा ब्रह्मणः स्वस्य सं
मुखमस्थित्वैव कस्मिंश्चित् प्रदेशे स्थित्वा समस्तभोगाननुभुज्य तिष्ठतीति सालोक्यमुक्तिः ॥ सामी
प्यं नाम ब्रह्मणः सन्मुखं स्थित्वा समस्तभोगाननुभुज्य तिष्ठतिष्ठति ॥ सारूप्यं नाम ब्रह्मणो यद्रूपम
स्ति तद्रूपेणास्थित्वा समस्तभोगाननुभुंक्ते ॥ सार्ष्टिं नाम ब्रह्मणो यदैश्वर्यमस्ति तादृशैश्वर्येण
मिलितः समस्तभोगाननुभुंजानः तिष्ठति ॥ एतेषां चतुर्णां मुक्तेरेकरूपत्वेपि उपासनातारत
म्यात् फलतारतम्यमस्ति ॥ कैवल्यं नाम मुमुक्षुः पुमान् शमाद्यादिभिर्युक्तः गुरूणां निकटे श्रव
णमननादि कृत्वा ज्ञानं संपाद्य सच्चिदानंदस्वरूपं आत्माहमिति ज्ञानानंतरं स्वस्वरूपमात्रं यथा
यथा स्थितिः कैवल्यं ॥ एतादृशकैवल्ये विचारसमर्जनित ज्ञानेनैव कैवल्यसिद्धिः ॥ कर्मो
पासनायोगेन प्राप्नोति ॥ तस्मात् ब्रह्मलोके विद्यमान उपासकाः ब्रह्मणो निकटे विचार्य

न

॥११०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येयु

त्वाब्रह्मणासहमुच्यते॥ अनेनकिमुक्तंभवति॥ समस्तप्राणिनांज्ञानेनैवमुक्तिःभवति॥ कर्मोपासनादि
भिःनभवतिइतिसंदेहोनास्तीतिसिद्धं॥५२॥ लोकेज्ञानीपुरुषःसर्वदासमाधिनिष्ठःसन्तिष्ठतु॥ योगा
३न भावेसंप्राप्तज्ञानमपिविस्मरिष्यतिइतिव्यवहारेणतेषांज्ञानंनास्तीतिविवेकिनांमध्येकेषांचित्अनेकवि
धसंशयाःप्राप्नुवंति॥ तेषांसंशयनिवृत्त्यर्थंब्रह्मवित्१ ब्रह्मविद्वर२ ब्रह्मविद्वरीयान्३ ब्रह्मविद्वरिष्ठः४
एतेषांब्रह्मविद्वरवर्यवरिष्ठानांस्थितिप्रकारंनिरूपयामः॥ ब्रह्मवित्पुरुषःस्वस्यकोलयाबाध्यत्वं
प्रपंचस्यस्वप्नतुल्यत्वंचसर्वदापश्यन्यज्ञादिकर्माण्यतिथिपूजादीनिस्वस्वधर्मान्संध्यावंदन ७५
स्नानादिक्रियाश्चभोजनादिक्रियाश्चसर्वदाकुर्वन्स्वयंसाक्षीस्वकीयमपिकर्मनकृतवान्अस्मी
तिअहंकारादयःस्वस्वविषयेषुप्रवर्तंतेअहमसंगोस्मिममसाक्षित्वमपिकल्पितमेवेतिनिश्चि
त्यसकलव्यवहारान्कुर्वन्तिष्ठतितस्यब्रह्मविदितिनाम॥ ब्रह्मविद्वरस्यस्थितिप्रकारउच्यते॥
ब्रह्मविद्वरस्तुपरिदृश्यमानव्यापारंसर्वंदुःखमितिमत्वाएतस्माद्व्यापारादस्माकंप्रयोजनंना
स्तीतिविचार्यइमंव्यापारंपरित्यज्यसर्वदाअंतर्मुखःसन्एवसर्वदानिश्चितइवास्तेकालत्र
येपिप्रपंचोनास्त्येवप्रतीयतेचेदपिमिथ्याभूतएवस्वस्यसाक्षित्वमपिकल्पितमेव॥ साक्ष्या
भावेसाक्षित्वाभावइतिनिश्चित्यसमुमुक्षूणामुपदेशंकुर्वन्अनिवार्याणिशौचान्नपानादि
कर्माणीतितन्मात्रेप्रवृत्तःसन्नपिसकलव्यापारान्अहंकारादिभिःकृतान्जानातिस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं किंचित्कर्मापि नाकरवमिति निश्चित्य बाह्यव्यापारान् परित्यज्य सर्वदा एकांतनिष्ठः सन् तिष्ठति त
स्य ब्रह्मविद्वर नाम॥ ब्रह्मविद्वरीयसः स्थितिप्रकार उच्यते॥ ब्रह्मविद्वरीयान् पुरुषः बाह्यसर्वदुःखमि
ति निश्चित्य परित्यज्य सर्वदा निदिध्यासनपरः सन् परैः प्रेरितः सन् अन्नपानादिक्रियाः कुर्वन्नपि स
र्वव्यवहारानहं कोपादिराचेतान् ज्ञात्वा कोपि व्यापारो मम नास्ति अहं साक्ष्येव वस्तुतस्तु साक्षित्वम
पि मम कल्पितमेव असंगत्वात्॥ स्वस्य केनापि कर्मणा बंधो नास्तीति निश्चित्य संशयरहितः सन् सक
लसंशयछेत्तैव सर्वदा निदिध्यासनपरः सन्नेव तिष्ठतीति॥ तस्य ब्रह्मविद्वरीयानिति नाम॥ वरिष्ठस्तु
बाह्यव्यापारं सर्वदुःखमिति परित्यज्य सकलसंशयादिरहितः सन् सर्वदा निर्विकल्पसमाधिप
रः सन्॥ अंतरव्यापारं बाह्यव्यापारं च विस्मृत्य स्वस्वरूपे निमग्नचित्तः सन् तिष्ठति॥ तस्य स्वतो व्युत्थानं पर
तो व्युत्थानं च नास्ति॥ तस्य अन्नपानादिक्रियाः सर्वात्मना अनुसंसेवतस्य अनेकपुण्यकर्मपरिपाकवशात्
एतत्समाधिसिद्धिः॥ तादृशसमाधिवशात् सर्वदुःखविनाशः ततः सर्वदा निर्विकल्पसमाधिनिष्ठः
सन्नेव तिष्ठति॥ तस्य नाम ब्रह्मविद्वरिष्ठः इति॥ एतेषां चतुर्णां तारतम्येन उत्तमसुखमस्ति॥ एतेषां
चतुर्णां मुक्तिः समाना॥ तर्हि उत्तरोत्तरं तावत् प्रयासः किमर्थ इति चेत्॥ कर्मणां नानाविधत्वात्
दृष्टसौख्यमेव प्रयोजनं॥ तस्मात् कर्मणो नानाविधत्वात् ज्ञानी पुरुषः अनेन प्रकारेण तिष्ठतीति व
क्तुं न शक्यं॥ एतस्मिन् प्रमाणं किमित्युक्ते॥ जनको राज्यं चकारेति॥ जडभरतो असंगः तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वितिच॥ शुकऽउपनयनात्पूर्वमेव गृहान्निर्गम्युयमावितिः॥ दुर्वासाः कंचिच्छपितवाकोश्चिदनुगृह्ही
तवानिति॥ श्रुतिस्मृतिइतिहासपुराणेषु श्रूयते॥ तस्मात् कर्मणो नानाविधत्वात्॥ ज्ञानिनः एकं वदेके
न तिष्ठतीति अत्र श्रुत्याप्ययः जनकादयश्च प्रमाणं विद्येकिनो ज्ञानिनः एवं तिष्ठतियथा वर्तते तथा वर्तते
इति वक्तुं प्रयोजनमेव नास्ति येषां एवं क्रमेते तत् तथा वर्तते अत्र संदेहो न कर्तव्यः॥ तेषां कर्म कथं तिष्ठति
तथैव ते तिष्ठति॥ संदेहो नास्तीति सिद्धं॥ ७॥ स्थितिः कर्मानुसारिणीति सिद्धांतः॥ ब्रह्मवित् क्रमेण कर्ता
स्यात् ब्रह्मवर्यो नुसंदध्यात्॥ वरियान्सर्वमत्याख्यानी वरिष्ठः काष्ठलोष्ठवत्॥ ८॥ जनकोराज्यकर्ताभूत्
भरतः संगवर्जितः॥ शुकोनुपेतो दुर्वासाः शापानुग्रहकारकः॥ ९॥ इति ब्रह्मविदादिचतुष्टयस्वरूप
स्थितिप्रकारः समाप्तः॥ एवं तिष्ठति॥ लोके केचशास्त्रज्ञाः समस्तवाक्यानि परोक्षज्ञानजनकान्येव
अपरोक्षज्ञानजनकानि न भवंतीति॥ सर्वदा अपरोक्ष आत्मापरोक्षापरोक्षज्ञानानां विषयो न भव
तीति स्वप्रकाशस्यात्मनः ज्ञानाज्ञानाश्रयत्वं न संभवतीत्यपि वदंति तेषां वार्त्ताः श्रुत्वा अनेके बुभुक्षुः॥
एतेषां भ्रमनिवृत्यर्थं दृष्टांतपूर्वकं आत्मनि समस्तवस्तूनि निरूप्यंते॥ दृष्टांतः कथमित्युक्ते॥ लोके पुर
मानदजायां वापि कश्चन संन्यासी स्थितः तस्मान्निकटे अंतेवासिनः तेषु दश आहूय किंचित्कार्यं आचार्यो
निर्दिष्टवान् ते अंतेवासिनः अवश्यं कार्यं कुर्म इति गतवंतः तेषु गच्छत्सु मध्येन दीउपलब्धां तां
नदीमुत्तीर्य परपारे गतवंतः तेषु प्रधानः अस्मास्वागतेषु दशसु मध्ये कोवास्ति कोवानास्तीति वि
चार्य संख्यातवान् तत्र एकः दौर्बल्य इति सर्वान् परिगणयित्वा स्वेन परिगणितवान् तथा च स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बु

मि

तिनवैवमनुष्यालब्ध्वाइति॥मनसिनिधायप्रत्यक्षंपश्चात्तथापश्यन् अज्ञानेनगणनकर्त्तारंस्वंद
शमंइतिनबुध्येयत् अबाधनंतद्देवाज्ञानं॥अवगणनेनिरूपयामः॥तदसदावरणमिति॥भानाव
रणमितिचद्विविधमुच्यते॥तत्कथमित्युक्तेनिरूपयामः॥पौयदशामःस्वयदशामःसन्नेवस्वंदश
मेतिनज्ञातवान्॥दशामःअस्तिवेतिपृष्टदशामंनजानीमःइति॥स्वयदशामएवसन्दशमंनो
पलभेनप्रतीतवान्॥तस्मात्दशमोनास्तीतिवदति॥एतद्व्यवहारस्यकारणत्वेनयत्स्थितंतत्
अज्ञानकार्यंआवरणद्वयमुच्यते॥अज्ञानकार्यंविशेषस्वरूपंविक्षेपंनिरूपयामः॥तर्हिद
शामःकिंजातइत्युक्तेनघांविमृश्यसंस्मृतवान् इतिनिश्चित्यदशामःउरःप्रताड्यक्रोदनंत
रोदनमज्ञानेनक्रियमाणंविक्षेपत्वेननिरूपयामः॥दशामस्यताद्दशासदावरणनिवर्त्तकंप
रोक्षज्ञानंनिरूपयामः॥दशामेअनेनप्रकारेणरुदतिआप्तःकश्चनकिमर्थंरोदिषि॥मारो
दीःदशामःनममारतिष्ठत्येवेतिब्रवीति॥तदाऽप्तवाक्यंश्रुत्वाततदादशामःशास्त्रेणस्वर्गादि
ज्ञानवत्दशाममपिपरोक्षत्वेनबुध्येइदंपरोक्षज्ञानमित्युच्यते॥एवंप्रकारेणताद्दशादशाम
स्यभानावरणनिवर्त्तकंअपरोक्षज्ञानंनिरूपयामः॥सएवदशामःतमेवा[illegible]जनमारूयद
शामःकोऽस्तीतिपृच्छति॥ततःसआप्तजनःतस्यदशामस्यपूर्वोक्तप्रकारेणनववमनुष्या
न्गणनेनप्रत्यदशामस्त्वमसीतिनिर्दिदेशाततःसदशामःस्वतोगणनेनदृष्ट्वा

तू

३ प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयमेव दशमोस्मीति निस्संदेहः॥ एतावंतं कालमज्ञानेनाहं बभ्रामः॥ कालत्रयेप्यहं दश
मएवनात्र संदेहलेश इति स्वयमेव अपरोक्षत्वेन परिज्ञाय रोदनादिकं सक्तो संतोषं प्राप॥
एवं दशमेस्सप्तावस्था निरूपिता॥ एवमेव आत्मन्यपि ससावस्था निरूप्यते॥ चिदाभासः
संसारे आसक्तिवान् भूत्वा कदापि स्वस्य स्वरूपभूत प्रकाशस्वरूपं कूटस्थं न परिज्ञात
वान् इति॥ तदज्ञानं कश्चित् एवं चिदाभासमाहूय कूटस्थं त्वं जानीषे इति पृष्टे कूटस्थ इति
कश्चन नास्ति॥ अस्ति चेत प्रतीयेत तस्य प्रतीत्यभावात् कूटस्थ इति कोपि नास्तीति॥ अस्तु तर
हृदे॥ इदमज्ञान कार्यं आवरणद्वयं॥ विक्षेपं कीदृशमिति उक्ते अहं कर्ता अहं भोक्ता अहं सु
खी अहं दुःखी अहं मनुष्यः अहं ब्राह्मणः इत्याद्यारोपस्य कारणीभूत देहद्वयेन मिलित
श्चिदाभासः विक्षेपः इत्युच्यते॥ गुरूपदेशात् प्रथमं कूटस्थं कश्चन अस्तीति परोक्षत्वेन
जानाति तत् परोक्षज्ञानमित्युच्यते॥ अयमेव चिदाभासः गुरुसन्निधौ श्रवणमनननिदि
ध्यासनादिकत्वा ज्ञानं संपाद्य तदनंतरं अहमेव कूटस्थ इति यदा जानाति तदपरोक्षज्ञा
नमित्युच्यते॥ अनर्थनिवृत्तिः कदेति पृष्टे॥ अयं चिदाभासो निर्विकारः असंगः आत्मा
हमिति ज्ञानानंतरं कर्तृत्वादि शोकजालं विमुंचतीति यदस्ति तदनर्थनिवृत्तिरित्युच्यते॥

नि
यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
मनन
॥१२२॥

वर्णक १५

३ परोक्षमिति

आनंदावाप्तिस्तावत् कर्त्तव्यजातं यावदस्ति तत्सर्वं मया कृतं प्राप्तव्यं यत्फलं जातमस्ति तत्स
र्वं मया प्राप्तमेवेति संतोषं प्राप्नोति स एव संतोषः आनंदावाप्तिरित्युच्यते॥ अज्ञानमिति
आवरणमिति विक्षेप इति॥ अपरोक्षमिति पुनरर्थऽनिवृत्तिरिति आनंदावाप्तिरिति
एवं प्रकारेण सप्तावस्था निरूपिताः॥ तत्र आद्यास्तिस्रोवस्थाः बंधहेतवः इतरामो
क्षहेतवः इति विचार्य एताः सप्तावस्थाः मय्यारोपिताः अहंकारस्यैवाऽहंकारसा
क्षिणो मम निर्विकारस्य न संतीति यो जानाति स एव मुक्त इति वेदांतसिद्धांतः॥ छ॥
तादात्म्यत्रयं निरूपयामः॥ कथमित्युक्ते॥ सहज तादात्म्यमिति कर्मज तादात्म्यमिति भ्रां
तिजन्यतादात्म्यमिति॥ त्रिविधं तादात्म्यं॥ तत्र सहज तादात्म्यं निरूप्यते॥ कथमित्युक्ते॥
चिद्वस्तु अहंकारे प्रतिबिंब्यते तस्य प्रतिबिंबं अहंकारेण मिलितो॥ तत्सापः चिद्वदेवए
कीभूतमभवत्॥ तत् चिदिदं प्रतीयते॥ चित्प्रतिबिंबेन सहिताहंकारस्य प्रतिबिंबेन स
हिततादात्म्यं सहज तादात्म्यं सहज तादात्म्यमित्युच्यते॥ तस्य सहज तादात्म्यमिति नाम॥
कथमागलमित्युक्ते॥ उत्पत्तिसमये देहमपि मिलितैव उस नामेति कृतावाद्यपोस्तादात्म्य
स्य सहतादात्म्यमिति नाम॥ कर्मजन्यतादात्म्यं नाम॥ चित्प्रतिबिंबेन मिलिता चिद्देह

न

॥१२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतीयमानस्याहं[illegible]स्य स्थूलशरीरेण सह संबंधमभ्यासात्प्राप्नोति तदा तस्य अहंकारस्य स्थूलशरीरेण
मिलित्वा तादात्म्यं कर्मजतादात्म्यमित्युच्यते॥ तस्य कर्मजत्वमिति कथमागतमित्युक्ते॥ जाग्रद्भोगप्रदक
र्मउत्पन्नं चेत्तदा तादृशतादात्म्यमुत्पद्यते॥ तत्कर्मनाशे तादृशतादात्म्यमपि नश्यतीति इति कृत्वा तादृशप्र
तिबिंबेन मिलित्वा विद्यमानस्याहंकारस्य स्थूलशरीरेण तादात्म्यं कर्मजतादात्म्यमित्युच्यते॥ कर्म
२ अस्ति चेत् तादात्म्यमस्ति तदभावे तदभावः इति॥ तत् जाग्रत्सुषुप्त्यादौ दृष्टव्यं॥ एतादृशतादात्म्याल्लिंगस्थू
लदेहोपि चेतनवदेव भवेत् भ्रांतिजन्यतादात्म्यं नाम अहं ब्राह्मणः। अहं क्षत्रियः। अहं वैश्यः। अहं
शूद्रः। अहं ब्रह्मचारीत्यादिचित्तवृत्तिभिः सह विद्यमानस्याहंकारस्य अहंशब्दार्थसाक्षिणा
तादात्म्यं भ्रांतिजन्यतादात्म्यमित्युच्यते॥ तस्य भ्रांतिजन्यं कथमिति चेत्॥ सर्वाधिष्ठानं आत्म
स्वरूपमिति अज्ञानात् प्राप्तमिति कृत्वा तस्य भ्रांतिजन्यत्वमिति नाम॥ अनेन प्रकारेण सह
जतादात्म्यमिति कर्मजन्यतादात्म्यमिति भ्रांतिजन्यतादात्म्यमिति च क्रमेण त्रिप्रकारतादात्म्य
मिति एतादृशतादात्म्यत्रयस्य निवृत्तिः कदा भवतीत्युक्ते संबंधीभूतचिच्छाया अहंकारो
यावत्पर्यंतं सहजतादात्म्यस्य निवृत्तिर्नास्ति॥ तर्हि तस्य निवृत्तिः क इति चेत्॥ विदेहकैव
ल्ये तस्यात्यंतिकनिवृत्तिः॥ कर्मजन्यतादात्म्यं तु प्रतिदिनं निसस्थूलभोगप्रदेन कर्मणा
उत्पद्यते इति कृत्वा तस्य कर्मणः सुषुप्तिकाले नाशः प्राप्नोति तादृशः कर्मजन्यतादात्म्यस्य

२ तिष्ठतिलाव पर्यंतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मननग्रंथ
श्रीनृसिंह
॥१२३॥

१८

नाशइतिज्ञातव्यमिति॥ अनेनप्रकारेण कर्मजन्यतादात्म्यस्य नाशइतिज्ञातव्यं॥ अनेनप्र
कारेण कर्मजतादात्म्यप्रति नित्यं नाशः सर्वानुभवसिद्धः॥ एतत्कर्मजतादात्म्यस्य विदेह
केवल्ये अत्यंतिकनाशः॥ भ्रांतिजन्यतादात्म्यंतु अहंब्रह्मेतिज्ञानं यदोत्पद्यते तस्मिन्नेव
क्षणे नश्यति॥ अनेनप्रकारेण तादात्म्यत्रयस्य निवृत्तिः॥ इदं तु त्रयं निरूपितमित्युक्तं
५७६ विद्यारण्यस्वामिभिः दृश्यविवेके निरूपितं॥ अस्माभिः यद्यत्तु यत्त्रयं यत्र निरूपितं
तत्सर्वं शास्त्रसिद्धमेव निरूपितं न प्रतिभाति चेत् तेषु शास्त्रेषु जिज्ञासा विधेया एतस्मिं
न्नर्थे संदेहो नास्तीति सिद्धं॥ पुः एवंप्रकारेण तादात्म्यत्रयं विचार्य इदंत्रयमपि अहंकारस्ये
व अहंकारसाक्षिणो मम निर्विकारस्य निरवयवस्य असंगस्य नास्ति इति यदा वेद स मुक्त
एवेति वेदांतसिद्धांतः॥ छ॥ छ॥ छ॥ जीवेश्वरस्वरूपं निरूपयामः॥ जीवो नाम अंतःकरणं॥ अं
तःकरणाधिष्ठानचैतन्यं अंतःकरणप्रतिबिंबितचैतन्यं च त्रयमिलित्वा जीवः इत्युच्यते॥
त्रयं मिलित्वा जीव इति किमर्थमुच्यते॥ केवलस्यांतःकरणस्यैव जीवत्वमुच्यतामित्युक्ते
घटस्यापि जीवत्वं स्यात्॥ तच्च न संपद्यत इति केवलांतःकरणस्य जीवत्वं वक्तुं न शक्यते॥
तथा वक्तुं न शक्यते॥ घटस्य स्वच्छद्रव्याभावात्॥ अंतःकरणस्य स्वच्छद्रव्यत्वात् जीवत्वमु

॥१२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्यतामित्युक्तं॥ दर्पणादीनामपि स्वच्छत्वात् तेषामपि जीवत्वं स्यात्॥ तच्च न संघटतीति
अंतःकरणस्य स्वच्छत्वेपि जीवत्वं वक्तुं न शक्यते॥ ननु तर्हि दर्पणादीनां बाह्यपदार्थत्वात्॥
अंतःकरणस्य च अंतरत्वात् जीवत्वमुच्यतामिति चेत्॥ इंद्रियाणामप्यांतरत्वात्॥ तेषाम
पि जीवत्वमापद्येत तन्न संभवति इति अंतःकरणस्य जीवत्वं न वाच्यं॥ तर्हि इंद्रियापे
क्षया अंतःकरणस्यांतरत्वात् जीवत्वमुच्यतामित्युक्ते॥ अज्ञानस्य ततोप्यांतरत्वात् जी
वत्वमापद्येत तदपि न संघटते॥ तस्मादंतःकरणस्यांतरत्वेपि केवलांतःकरणस्य जीव
त्वं वक्तुं न शक्यते॥ एतावदेव न जीवस्य चेतनत्वात् अंतःकरणस्य अचेतनत्वात्॥ अचे
तनस्यांतःकरणस्य जीवत्वं वक्तुं न शक्यते॥ तर्हि केवलप्रतिबिंबस्य जीवत्वमुच्यतामि
ति चेत्॥ अंतःकरणाभावे प्रतिबिंबाभावात् केवलप्रतिबिंबस्य जीवत्वं न संभवति॥ त
र्हि प्रतिबिंबार्थं अंतःकरणमंगीकृत्य केवलप्रतिबिंबस्यैव जीवत्वमुच्यतामित्युक्ते प्र
तिबिंबस्य स्वयं विकारित्वेपि कर्तृत्वादि विकाराभावात् तस्य जीवत्वं कथं घटते॥ त
र्हि अधिष्ठानचैतन्यस्य जीवत्वमस्त्वित्युक्ते तादृशचैतन्यस्य निर्विकारत्वात् विका
रस्वरूपजीवत्वं कथं घटते॥ तर्ह्यंतःकरणं प्रतिबिंबेन युक्तं सत् जीवशब्दवाच्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

मस्त्वित्युक्ते एतत्त्रयस्य कल्पितत्वात् जीवस्य निसत्वं न सिध्येत् ॥ इष्टापत्तौ तु मुक्तः सन्
कोपि न तिष्ठेदिति चेत्सत्या अंतःकरणं प्रतिबिंबद्वयमपि मिलितं सत् जीवशब्दवाच्यं न भ
वति ॥ तर्ह्यधिष्ठानचैतन्यं प्रतिबिंबचैतन्यं च मिलित्वा जीवशब्दवाच्यमस्त्वित्युक्ते
केवलचैतन्यमात्रस्यापि निर्विकारत्वात् प्रतिबिंबचैतन्यस्य कर्तृत्वभोक्तृत्वविकारलक्ष
णं जीवत्वं वक्तुं न शक्यते ॥ तर्ह्यधिष्ठानचैतन्यं अंतःकरणमिलितं सत् जीवशब्दवाच्यं
भवत्विति चेत् ॥ दर्पणदर्पणाधिष्ठानचैतन्यं च मिलित्वा जीवशब्दवाच्यं स्यात् ॥ तस्य जी
वत्वायोगात् अधिष्ठानचैतन्यांतःकरणयोः जीवत्वं न भवति ॥ तस्मात् अंतःकरणं अंतः
करणाधिष्ठानचैतन्यं अंतःकरणप्रतिबिंबचैतन्यं च त्रयं मिलित्वा जीवशब्दवाच्यं भव
तीति वक्तव्यं ॥ जीवत्वे एतावतैव नालं ॥ कथं कर्तृत्वभोक्तृत्वादिविशिष्टस्य जीवत्वात् कर्तृ
त्वभोक्तृत्वादिसिध्यर्थं अंतःकरणाधर्मीवच्छिन्नं सूक्ष्मशरीरं सर्वमपेक्षितं ॥ एतावतैव
नालं सूक्ष्मशरीरं स्थूलशरीरं विहाय न तिष्ठतीति ॥ तत्स्थूलकं विना तत्तदिंद्रियस्य वि
षयग्रहणं न सिध्यतीति ॥ ब्राह्मणत्वाद्यभिमानाभावे कर्मकर्तृत्वं न संभवतीति कर्तृत्वाय स्थू
लशरीरमपेक्षितमेव ॥ असंगस्वरूपस्यात्मनः अज्ञानाभावे शरीरद्वयाध्यासाभा
वात् प्रकार्यं सर्वं कारणं ॥ विहाय न तिष्ठतीति कारणाकारणशरीरमपेक्षितमेव ॥ तस्मात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधिष्ठानचैतन्यप्रतिबिंबचैतन्यं शरीरत्रयं चतेष्वध्यासेन मिलित्वा जीव इत्युते ॥ अत ईश्वर
स्वरूपं निरूप्यते ॥ ईश्वरो नाम मायामायाधिष्ठानचैतन्यं मायाप्रतिबिंबचैतन्यं च मिलित्वा
ईश्वर इत्युच्यते ॥ त्रयं मिलित्वा किमर्थमीश्वरत्वमुच्यते ॥ केवलमायायाः ईश्वरत्वमस्तित्यु
क्ते ॥ तदा आकाशस्यापि ईश्वरत्वमापद्येत तस्यासंभवात् मायायाः ईश्वरत्वं वक्तुं न शक्यते ॥ न
त्वाकाशस्य उत्पत्तिमत्वात् कथमाकाशस्य ईश्वरत्वमुच्यते ॥ अनादिमायायाः स्तु वक्तुं शक्यत
इत्युक्ते असत्ताभावस्यापि ईरत्वमापद्येत तस्य ईश्वरत्वं न संभवति ॥ अनादिमायायाः ईश्वरत्व
वक्तुं न शक्यते ॥ तर्हि भावस्य पदार्थत्वाभावात् मायाया भावत्वाच्च तस्य ईरत्वमुच्यतामित्युक्ते ॥
जातेरपि भावपदार्थत्वात् ॥ तस्यापि ईश्वरत्वमापद्येत तत्तु न संभवतीति कृत्वा मायायाः भावपदा
र्थत्वेपि ईरत्वं वक्तुं न शक्यते ॥ मायायाः अनिर्वचनीयत्वात् ईश्वरत्वमस्तित्युक्ते अनिर्वचनी
यशुक्तिरजतादीनामपि ईश्वरत्वं स्यात् ॥ तस्येश्वरत्वं न संभवतीति कृत्वा अनिर्वचनीयमा
यायाः ईश्वरत्वं वक्तुं न शक्यते ॥ किंच ईश्वरस्य चेतनत्वेन अचेतनायाः मायायाः ईश्वरत्वं न
सिध्यति ॥ तर्हि केवलप्रतिबिंबस्य ईश्वरत्वमुच्यतामित्युक्ते मायायाभावे प्रतिबिंबाभावा
त् तस्येश्वरत्वं वक्तुं न शक्यते ॥ तर्हि बिंबार्थं मायामंगीकृत्य केवलप्रतिबिंबस्येश्वरत्वमुच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभिमुक्ते मायायाः अभावे सर्वज्ञत्वाद्यो न संभवतीति कृत्वा प्रतिबिंबमात्रस्य ईश्वरत्वं वक्तुं न
शक्यते॥ तर्हि अधिष्ठानचैतन्यस्य ईश्वरत्वमस्त्विति चेत् अधिष्ठानचैतन्यस्य निर्विकारत्वा
त्॥ जगत्स्रष्टृत्वाद्यो विकाराः निर्विकारस्य न संभवतीति कृत्वा ईश्वरत्वमपि वक्तुं न संभ
वति॥ तदधिष्ठानचैतन्यं मायां च मिलित्वा ईश्वरशब्दवाच्यमस्त्विति चेत्॥ आकाशं आका
शाधिष्ठानचैतन्यं च मिलित्वा ईश्वरशब्दवाच्यस्यासंगतेश्च न संपद्यत इति॥ मायातदधि
ष्ठानचैतन्ययोरीश्वरत्वं दुरुपपादं॥ तर्हि मायाप्रतिबिंबं च मिलित्वा ईश्वरशब्दवाच्यम
स्त्विति चेत् एतद्द्वयस्य कल्पितत्वात् द्वयोरीश्वरत्वं न संभवति॥ यद्युच्येत ईश्वरस्य नित्यत्वं
न सिध्येत॥ इष्टापत्तौ तु ईश्वरस्य नित्यत्वप्रतिपादकश्रुत्यादिभिः सह विरोधापातात्॥ मा
यातत्प्रतिबिंबयोः ईश्वरत्वं दुरुपपादं॥ तदधिष्ठानचैतन्यमेव प्रतिबिंबेन मिलितं सत्
ईश्वरशब्दवाच्यमस्त्विति चेत्॥ केवलप्रतिबिंबमात्रं स्वतो विकारी भवति चेदपि केवला
धिष्ठानचैतन्यस्य निर्विकारत्वात्॥ विकारस्वरूपं ईश्वरत्वं वक्तुं न शक्यते॥ तस्मात् मा
याअधिष्ठानचैतन्यमायाप्रतिबिंबचैतन्यं च मिलित्वा ईश्वरशब्दवाच्यं॥ अनेन प्रका
रेण जीवेश्वरौ विद्यारण्यस्वामिभिः पंचदशीप्रकरणे निरूपितौ॥ तानुदाहरिष्यामः॥
चैतन्यं यदधिष्ठानं लिंगदेहश्च यः पुनः॥ चिच्छाया लिंगदेहस्था तत्संघो जीव उच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते॥१४॥चि... मप्रतिबिंबसमन्वितः॥तमोरजःसत्वगुणाःप्रकृतिर्द्विविधाचसा॥१५॥
सत्वशुद्ध्यविशुद्धिभ्यांमायामायाविद्येचतेमतेमाया॥बिंबोवशीकृत्यतांस्यात्सर्वज्ञईश्वरः॥१६॥
अनेनप्रकारेणजीवेश्वरस्वरूपंविचार्यजीवेश्वरौमायाकल्पितावितिनिश्चित्यजीवेश्वर
योरधिष्ठानभूतनिर्विकारनिरवयवस्वप्रकाशसर्वसाक्षीप्रत्यगात्माअहमितियोजानातिस
एवमुक्तइतिवेदांतसिद्धांतः॥१७॥मनसःचंचलत्वंनिरूप्यते॥मनसःअतिचंचलत्वात्॥एक
स्यामपिदिशिअवस्थानाभावात्स्वेनचपरिसपुरुषंसार्वकालिकप्रयोगेणसंतापयुक्तंकरोति
मनः॥एकस्मिन्विषयेपतितंचेत्तत्सदावर्तितुंनशक्यते॥अत्यंतवेगवान्वायुःयथाअवस्था
तुंनशक्यते॥यथागलबंधसंत्रोप्युपलाय्यमानुसरगजोवरोद्धुंनशक्यते॥तद्वन्मनोपिअवरो
द्धुंनशक्यते॥इममेवार्थमर्जुनायभगवानुपदिशेत्॥तत्रप्रश्नोत्तराणिदृष्ट्वानिवासिष्ठेपि॥अ
प्यब्धिपानान्महतःसुमेरून्मूलनादपि॥अपिवन्ह्यशनात्साधोविषमश्चित्तनिग्रहः॥१८॥एता
वताभगवताईश्वरेणचचित्तनिरोधसौलभ्यंदर्शितं॥तानिवाक्यानिपरित्यज्यलोकेकेचि
त्तुचित्तनिरोधनंकठिनंमन्वानाः॥तद्वाक्यान्येवसर्वेषांपुरतःउद्घाट्यतन्निरोधनंसर्वा
सुनानसंभवतीति॥वृत्तांतविचारेअधिकारएवनास्तीतिवदंति॥तेषांवाक्यानिश्रुत्वाअ
न्येकेचित्प्रभ्रमंतः॥तेषांभ्रमनिवृत्त्यर्थंचित्तनिरोधसौलभ्यंदृष्टांतपूर्वकंनिरूप्यते॥

श्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१५

मनः पशुसदृशं यथा पशुः चौर्येण सस्यभक्षणार्थं गच्छति धर्तुमुद्युक्ते पलाय्य गच्छति प्रयासेन तं
धृत्वा गृहे तृणसन्निधौ बध्वा तन्मात्राय पश्चात् तं चेदपि सस्यमेव मनसा चिंतयति ॥ किंचित्कालं संस्था
पित्वा विमुक्तः परेद्युः सस्यमेव प्रतिगच्छति ॥ पुनरनेकोपायैर्धृत्वा गृहे प्रसानीयतृणादिकं त
लबीजानि चतुरो निक्षिप्य फलीकरणामपि भक्षयित्वा किंचित्कालं संस्थाप्यते पशोः पुनः सस्या
दिध्यानस्येवासंभवात् ॥ पुनः विमोचने तत्परेद्युरपि अनेनैव प्रकारेण कुर्वीत तत्परेद्युरपि
अनेनैव प्रकारेण दृश्यमाने सति गृहस्थ भक्षणमेवाभ्यासितं सत् बहिर्मुक्तस्यापि प्रीति
जनयति पश्चात् गृहे प्रसेवा गच्छति बहिर्मुक्तश्चेदपि न गच्छति तादृशपशुवत् अभ्यासेन गृ
हे बध्वा स्थापितः पशुः यथा निश्चलो बभूव ॥ तद्वदेवं मनोपि अभ्यासेन वैराग्येण च वशीभ
वति अभ्यासो नाम निःसंस्वस्याभीष्टमूर्तौ घटिकाद्वयं ध्याने कृते तत्र चित्तस्य पुनः पुनः विषया
तरासराच्छतिः पुनस्तन्मनो पराच्छ सति तस्यामेव मूर्तौ ध्यानार्थं निवेशनं ॥ अनेन प्रकारेण पर
द्युः घटिकाचतुष्टयं ध्यानं तत्परेद्युः घटिकाषट्कं ध्यानं ॥ तत्परेद्युः प्रहरपर्यंतं ध्यानं ॥ अनेन
प्रकारेण उत्तरोत्तराभिवृद्ध्या ध्यानाभ्यासवशात् चित्तं यत्र स्थाप्यते तत्रैव निश्चलं भव
ति तस्याभ्यासः इति नाम वैराग्यं नाम अनेकेषु जन्मसु विहितकर्माणि ईश्वरार्पणबु
ध्या अनुष्ठीयमानानि पुरुषस्य कस्मिन् जन्मनि चित्तप्रसादयंति ॥ ततो विषये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षुदोष[...]णादिकमपि तृणीकरोति तद्वैराग्यमित्युच्यते॥ तस्य पुरुषस्य चित्तं श्र
वणादौ कु[...]चेत्स्थापितं चेदपि तत्रैव स्थिरीभवति॥ तस्मात् चित्तनिरोधः सर्वत्र नापेक्षित
श्चेदपि ईश्वरसंपूरूकजाक्षवत् अभ्यासवैराग्याभ्यां चित्तनिरोधः सुलभत्वेनैव संपादयितुं
शक्यते॥ तस्मात् वेदांतविचारे साधनचतुष्टयसंपन्नः अधिकारी नास्तीति न भ्रमितव्यमिति
९ स सिद्धं एतच्चित्तनिरोधः कठिनश्चेदस्मिन् सुलभश्चेदस्मिन् संमतित्वेन श्लोकाः उदाहरिष्यंते॥
चंचलं हि मनः कृष्ण प्रमाथी बलवद्दृढं॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं॥१॥ अप्य
द पि ब्धिपानान्महतः सुमेरोन्मूलनादपि इति पूर्वोक्तश्लोकस्य समाधानं॥ असंशयं महाबाहो
मनो दुर्निग्रहं चलं॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते॥१॥ अपि पुष्पावदलनाद मैथ्यो
पि लोचनमीलनात्॥ सुकरोहं कतिसागो न क्लेशोत्र मनागपि॥ अनेन प्रकारेण विचार्य वै
राग्यं संपाद्य वैराग्यपूर्वकत्वेन श्रवणादिकं कुर्वन् यो ज्ञानं संपादयति स एव मुक्तः इति वेदां
तसिद्धांतः॥७॥ अतः परं देहेंद्रियादीनां आत्मनश्च वैलक्षण्यं निरूप्यते॥ देहेंद्रियादयः अ
नित्याः आत्मा नित्यः॥ देहेंद्रियादयः अशुद्धाः॥ आत्मा शुद्धः॥ देहेंद्रियादयः जडाः॥ आत्मा
चिद्रूपः॥ देहेंद्रियादयो दुःखरूपाः॥ आत्मा सुखरूपः॥ देहेंद्रियादयो दृश्याः॥ आत्मा द्रष्टा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तसिंह
तनग्रंथ
॥१२८॥

देहेंद्रियो सविकाराः॥ आत्मा निर्विकारः॥ देहेंद्रियादयो नानारूपाः॥ आत्मा एकरूपः॥ देहें
द्रियादयो सापेक्ष्यप्रकाशाः॥ आत्मा निरपेक्ष्यप्रकाशः॥ देहेंद्रियादयो परिछिन्नाः॥ आत्मा अ
परिछिन्नः॥ देहेंद्रियादयो सकलंकाः॥ आत्मा निष्कलंकः॥ देहेंद्रियादयो आधेयाः॥ आत्मा आधा
रः॥ देहेंद्रियादयो सावयवाः॥ आत्मा निरवयवः॥ देहेंद्रियादयो अप्रकाशाः॥ आत्मा प्रकाशकः॥
देहेंद्रियादयो आद्यंतसहिताः॥ आत्मा आद्यंतरहितः॥ देहेंद्रियादयः सजातीयविजातीयस्वग
तभेदसहिताः॥ आत्मा तद्रहितः॥ देहेंद्रियादयो कार्यरूपाः॥ आत्मा कारणरूपः॥ देहेंद्रियादयः गु
णवंतः॥ आत्मा निर्गुणवान्॥ अनेन प्रकारेण देहेंद्रियादीनामात्मनश्च वैलक्षण्यं विचार्य तादृ
श आत्मा अहमिति यो जानाति स एव मुक्तः॥ स एव विद्वान्॥ स एव ... श्रुतीनां तात्प
र्यं॥ ... लोके श्रुतिस्मृतिइतिहासपुराणागमाभियुक्तवचनानि त्वमेवात्मा त्वमेव ब्रह्मेति वद
ति चेत् पितुरग्रे पित्वमेवात्मा त्वमेव ब्रह्मेति श्रुतिषु त्वयनुभवेः॥ केन प्रकारेणाउपदेशं कुर्व
ति चेत् पिईश्वरकृपालक्षणं महत्कोपि संनास्ति चेत् सापात्मनो बुद्धिः उभौ गीतायां उपदेशात॥
तादृश सच्चिदानंदस्वरूप आत्मा अहमिति अगृहीत्वेव जडस्वरूपाणां इंद्रियाणि अहमिति मन्य
तांकरोति ... पूर्वकं निरूपयामः॥ दृष्टांतः कइत्युक्ते शृणु लोके धर्मगुप्त इति कश्चन रा
... दुःखीयमानो ...

॥१८॥

जास्थि... स धर्मेणा सर्वेषां परिपालनं कृतवान् अनेन प्रकारेण किंचित्कालं उषित्वा
भर्जुर्नाम ... एवं च पापिष्ठप्रधानपुरुषं चकार ॥ ततः तस्य राज्ञः अधर्ममेव भर्जुर्बोधयामास ॥
ततः बोधप्रकारः कइत्युक्ते ॥ राजन्नेह्णीतितं आहूय एतेभ्यो विप्रप्रभृतिभ्यो द्रव्यं किमर्थं दीयते ॥
एतत्सकाशात् अस्माकं किंप्रयोजनं ॥ स्नानापत्तयः संप्रतयः ॥ तेषां अन्ये ये केचन अहिंसा
दयः ॥ तेषां सं बलानि किमर्थं दीयंते ॥ एतेभ्यः सकाशात् अस्माकं किंप्रयोजनं ॥ अनेन प्रका
रेण राजानं बहुशो विरुद्धधर्मं प्रबोध्य । केषामपि जीवनं यथा नास्ति ॥ तथा कृत्वा सर्वेरपि
द्विषं संपादितवान् ॥ राज्ञः मम च मित्रत्वे विद्यमाने अन्यैः द्वेषवास्नेहवा किंप्रयोजनमिति ॥
सर्वानप्यवधीरयामास ॥ सर्वानपि अवमान्य स्थिते कस्मिंश्चित्समये सर्वे मिलित्वा भ
र्जुनामकं पापिष्ठप्रधानपुरुषं राज्ञः संमुखं यथा नायाति तथा कर्तव्यमिति संकेतं कृत्वा राजद्वारे
तस्य प्रतिबंधकं कृत्वा राजसंमुखस्य आगमनप्रतिबंधके कृते आयुस्यादि दिशि उपलभ्यते ॥
भर्जुः तत्र तत्र तमाद्रितवंतः तेषु यथा आगतेष्वपि पलाय्य पलाय्य गतो भर्जुः ततो राज्ञा भर्जु
र्मम निकटे किमर्थं नायातीति पृष्टे तस्य ज्वर आगत इत्युक्तवंतः ॥ ततो राज्ञा बहुश एवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंह
तिनग्रंथ
१२८॥

प्र० १०

प्रातः पश्चात् भिषजः प्रेषिताः ते भिषजः वयं परामर्शितवंतः स्मः । तस्य दोषवशात् सन्निपाते
न मरणं भविष्यतीत्युक्तवंतः ॥ ततो राज्ञी बहुदुःखं लब्ध्वा । तस्य दर्शनं विना अहं कथं स्था
स्यामीति ... ततो गच्छति ॥ रथ्यां प्रजा अन्येपि केचित् मिलित्वा भर्तृमंत्रिणः एवं तस्य स्म
शानं तीर्थं शवं नीतवंतः ॥ तद्दर्शनं राज्ञः सर्वोपि शास्त्रं ... मितिउक्तवंतः पश्चात् राजानं प
राक्रमसराजग... प्रसन्नानीतवंतः ॥ हे महाराज त्वयि चिरं जीवति सति एतादृशाः कि
यंतः वराकाः मर्तुं ... तिष्ठंति ॥ त्वया शोको न कर्तव्यः । इति तस्य राज्ञः विवेकमुपदिष्ट
ते
वंतः ॥ एवं स्थिते तेन भर्तृ... राज्ञ्यहीभूत्वा अहं राजसमीपं गच्छामीति ततः एतान् सर्वान् पि
= चौ
शिक्षे... ततः क्षौरकर्म प्रतिपाद्यत इति प्रतिज्ञाय ततः राज्ञः समीपे कोवा तिष्ठति
तिरहसि रहसि पश्यन् कस्मिन्नपि दिवसे राज्ञि मृगयां जिगमिषौ तस्य आगमन
मार्गे अश्वत्थमारुह्य सर्वेषामपि अंतर्हितो भूत्वा स्थितः तत्र राजा स्वसैन्येन साकं
गतवा... मिन समये विजयी भवेति राजानं बहु भाषितवान् ॥ ततः सर्वेपि ...

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केतवंत... वत्संमुखे आगंतुं नकारितवंतः इति पुनः पुनः भर्जुना आक्रोशे क्रियमाणे
राजाऽश्वेनारूढ्य वर्त्तमानं भर्जुं ददर्श ॥ ततः संनिविष्टा जनाः सर्वे एकसंकेतपर्यवसिताः
राजानं प्रस्तुः ॥ मृतो भर्जुर्ब्रह्मराक्षसो भूत्वा अश्वमारुह्य तिष्ठतीति राजानं प्रबोध्य
वस्त्रैः राजानं आच्छाद्य विभूतिमभिमंत्र्य ललाटे निक्षिप्य मा भैषीर्महाराजेति प्रबोध्य
माना ॥ परावृत्य सगृहं प्रस्थे वेनीतवंतः ॥ ततो भर्जुं गृहीत्वा कशाघाततांडनैः सं...प ताज्य
लायनं कारितवंतः ॥ सोपि राजा तेषां वाक्यानि श्रुत्वा निर्दुष्टचक्षुषा ... भर्जुं ...
तश्चेदपि अयं ब्रह्मराक्षस एवेति पश्चान्निश्चयं प्राप ॥ तथा श्रुतिस्मृती ॥ तत्र हासंपुराणा
नियुक्तवचनानित्यमेव आत्मा त्वमेव ब्रह्मेति ॥ उपदिष्टातिच्चेदपि गुरवोपि त्वमेवाऽ
मा त्वमेव ब्रह्मेति श्रुतिमुत्स्यानुभवैः बहुप्रकारेणोपदिष्टातिच्चेदपि श्रुतिप्रमाणैः
ज्ञानमुत्पन्नं चेदपि प्रतिबंधकवंधैः विपरीतत्वेन जडस्वरूपदेहेंद्रियादयः...
हमिति गृह्यते ॥ अयमर्थः ॥ कुत्र निरूपित इत्युक्ते ॥ संक्षेपकाचार्याः सर्वापि...रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तसिद्ध
न्तग्रंथ
११२८॥

प्र...

णानिसंशोध्य तमेव पुराणार्थं संक्षेपशारीरे निरूपयां चक्रुः ॥ तद्वाक्यं श्रीछा[illegible]
स्तुते वदामः ॥ पुरुषापराध्यमलिनाध्यिषणानिरवद्य[illegible]रुष्या पितृया ॥ विफ
लायभज्जु विषया भवति श्रुतिसंभवापि तथात्मधीः ॥ इति श्रीपरमहंसपरिव्रा
जकाचार्य श्री प्रद्धरवासुदेवेन्द्र शिष्येण विरचितं षोडशवर्णकं समाप्तं ॥
छ॥छ॥छ॥ राज्योपनाम्ना जनार्दिनात्मजेन त्र्यंबकटेरो[illegible]लेखि ॥

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.12.19 16:02
,TRANSFERRED=2019/12/23 at 16:39:50
,PAGES=245
,TYPE=STD
,NAME=S0002384
,Book Name=M-2305-SHODASVANKAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection